नं: १३३ घ ख २

सिद्धान्तकौमुदी व्याख्या

बृहच्छब्देन्दुशेखरः

पत्राणि १४६

६००

[illegible]

नं० १३३ — घ-ख-२

सिद्धान्तकौमुदीव्याख्या

बृहच्छब्देन्दुशेखरः

पत्राणि १४६-ख-२

६००

च्यंते सामर्थ्यात् संख्याशब्देव बहुगणवतुडति षु वसां न त्वासंभवात् तदेतदाह संख्येति संनिपा
तपरिभाषयेति नुमो बहिरंगासिद्धत्वं तु न संज्ञायाः कार्यापन्नत्वेन समत्वात् स्पष्टं चेदमत्रैव
भाष्ये षकारसाहचर्येणागमात् नस्य नकारस्यैवात्र ग्रहणमिति तिनदोषइतिकश्चित् यत्तु उपदे।
शेयौ षकारनकारौ तदंतायाः संख्यायाः षष्णां फलानीत्यादौ न षट्संज्ञेति तत्र सन्निपातपरिभा
षयैव सिद्धे फलाभावात् असमर्थसमासापत्तेश्च षष्णां ब्राह्मस्यानित्यसाकांक्षत्वाभावेन तदवद
त्तस्य गुरुकुलमित्यत्रेव षम्यात् किंचोपदेशग्रहणनिर्मूलमपि श्रेनग्रहणफलं संख्येत्युपक
र्षः स्त्रावदिमुक्तौ हि त्राप्योपस्थापितस्य तदंता स्त्रीलिंगशब्दमात्रस्य ग्रहणापत्तिः किंचो
णादीनामव्युत्पत्तिपक्षे प्रातिपदिकानामुपदेशाभावेन सूत्रस्यासंभवदुक्तिकत्वापत्तिरिति
दिक् नलुमिति एवं च फलाभावात्तत्र षट्संज्ञापि नेति बोध्यं नोप नलोपस्यासिद्धत्वान्ना
मीति दीर्घाप्राप्तेरयमारंभः दिकानामुपदेशाभावान्नसूत्रस्यासंभवदुक्तिकत्वा) नचोपधाग्र
हणं व्यर्थं दीर्घश्रुत्योपस्थितनाच इत्यस्य नाम्परत्वेन विशेषणाद्येन नाव्यवधानन्यायेन न
कारमात्रव्यवहितस्यैव दीर्घे सिद्धेरिति वाच्यं उत्तरार्थत्वात् अत एव नृ न इ षार्यमणामिति उप
धादीर्घमात्रस्य नियमः स्यात् कर्तुः प्रत्ययस्यांगांशे उस्थितनाकांक्षत्वे नाच इत्यस्यासंभवाच्चात्र
चोपधायहस्येहरणमपि मानं नेति चतुर्ग्रहणषष्ठीकमंगस्य विशेषणं नेति किं चतुर्णां नामि
किम् वर्मणां नलोप इति बुवः पंचानामिति लिंगात्तत्र संनिपातपरिभाषाविरोधः गोणत्वेन्विति

श्रा॰ श्री॰

एतदभिप्रायः षट्चतुर्भ्यश्चेतिसूत्रेउक्तः प्रियपञ्चानामिति जद्दयमध्येचकारः अष्टनआ पथि
मथ्यीतिवद्द्वत्वाप्याकारप्रश्लेषान्नानुनासिकः रायोहलीत्यपकृष्यते इत्याहहलादाविति तथा
चभाष्ये हलीत्युभयोः शेषइति कृतात्वनिर्देशइति कृतात्वानुकरणमित्यर्थः लक्षणवशात्सं
पन्नत्वेहितस्यवैकल्पिकत्वयालाघवादष्टन्आरन्यैववदेदितिभावः ज्ञापयतीत्ययंभावः हली
त्यपकृष्यमाणेवाक्यभेदेनपुनर्विधानार्थतेनाष्टनइत्यस्यक्वचिदत्त्वपिप्रवृत्तिरिति एतेनह
लीतिपूर्वत्रैवकर्त्तुमुचितमित्यपास्तं हलिरायइतितुसूत्रेपिनुमुचितम् आत्वमिति आत्व
मात्रमित्यर्थः सवेइतिदीर्घान्ताइष्टनः परः सर्वनामस्थानविभक्तिरुदात्तेतितदर्थः ज्ञापका
दिति तर्हिअष्टभिरितिहलादावितोदात्तत्वव्यावृत्त्यर्थं नन्वष्टाभिरित्यत्रसावकाशमप्याष्टनइतिसू
त्रस्यपरत्वाज्झल्युपोत्तममित्यनेनबाधेसकृद्गतावितिन्यायेनपुनरप्रवृत्तेर्व्यर्थमेवतत् नह्य
ष्टाभिरित्यत्रझल्युपोत्तममितिप्राप्नोति अनान्तत्वेनषट्त्वाभावात् अल्विधित्वेनस्थानिवत्त्वा
भावाच्चअकृतव्यूहपरिभाषयापूर्वसंज्ञायाअप्रवृत्तेश्चेतिचेन्न यथोद्देशपक्षेआत्वस्यबहिरंग
त्वेनान्तरंगायांषट्संज्ञायामसिद्धत्वान्नान्तत्वेनषट्त्वेजातेप्रगृह्यसंज्ञाप्रकरणोक्तरीत्याना
न्तसंख्यावाचकत्वसमानाधिकरणधर्मविशेषषट्त्वस्यानुधर्मत्वाभावेनतत्प्रयुक्तस्य
रादेरल्विधित्वाभावेनस्थानिवद्भावेनलोकन्यायसिद्धैकदेशविकृतन्यायेनचाकारान्तेपिन
स्यासिद्धत्वादष्टनइत्यस्यषट्स्वरापवादत्वादष्टाभिरित्यत्रैवाष्टभिरित्यत्रापिप्रवृत्तिः स्यादि

तद्यास्तत्वार्थे दीर्घग्रहणं विकल्पज्ञापकमित्याशयात् यथोद्देशपक्षाश्रयणेनाशास्त्रविषये षट्संज्ञा
यामप्रवृत्तिं कृत्वा तत्परिभाषाप्रवृत्तौ चेदमेव दीर्घग्रहणं मानं भविष्यतीति किं चैतेन प्रयोजनमित्य
भिसंधिमात्रेणैव यथोद्देशपक्षे संज्ञाप्रवृत्तेः प्रगृह्यसंज्ञाप्रकरणे कैयटादिभिरुक्तत्वात् एतेन यथो
द्देशेऽपि सर्वफलाभावात्संज्ञाप्रवृत्तिरीदूदेदित्यपादे न्यपास्तं स्पष्टं चेदं षट्संज्ञासूत्रे ह्रस्वनोदीर्घादिति सूत्र
भाष्ये न चाकारान्तस्य षट्त्वे ऽष्टाविंशत्यत्र लुगापत्तिः ओमिति सामर्थ्यात् केचित्तु कार्यकालपक्षे
ऽपि दीर्घग्रहणं स्वकृतान्न्यायानित्यत्वज्ञापनार्थं सदात्वविकल्पज्ञापकमाहुः नन्वेवमप्यष्टा
विंशत्यादावष्टन्स्वरस्य चारितार्थ्यं नहि तत्र षट्स्वरः प्राप्नोति हलादित्वाभावात् पाठान्तरं एकदे
शकर्तृके चेकृते एकदेशविकृतन्यायेन टान्तस्याष्टनुशब्दत्वादौरत्वस्यैवस्यानिवत्त्वेन विभक्तित्वाच्च
न दोषः स्वरान्तर्वसंधिकार्याप्रवृत्तेरेहीत्यत्राङः निमित्तं न निघातसिद्ध्ये यद्धि तु परमिति सूत्रे ध्वनि
तत्वाच्चेति स्मर्तं न च तत्र नित्यत्वादन्तरंगत्वाच्चैकादेशकृते व्यपवर्गाभावाद् एन् स्वराप्राप्तिरिति
वाच्यं स्वरप्रवृत्तेः पूर्वमन्तरङ्गस्यापि स्वरसंधिकार्यस्याप्रवृत्तेः स्पष्टं चेदं यद्धि तु परं छन्दसीत्यत्र भा
ष्ये कैयटयोरिति चेत्त्राष्टन् शब्दस्याष्टनादिपाठादन्तोदात्तत्वेनैकादेश उदात्तेनोदात्त इत्यनेनैव
तत्रान्तोदात्तसिद्धेः घृतादावस्य पाठे चेदमेव भाष्यं मानं नन्वेवमपि षट्त्रिचतुर्भ्यो हलादिरित्य
त्र गलुयोगमित्यत्र विहितविशेषणाश्रयणेन समासे षट्स्वराप्राप्त्या प्रियष्टाभिः प्रियष्टाभ्यामि या
त्यादयवकाशः अत एव च तुरः शासीति सूत्रे षट्संज्ञकेषु हलादिग्रहणं व्यावर्त्यं नास्तीत्युक्तम्

शा·शे· समासेऽप्रवृत्तौ हि तन्निमित्तकस्वरादेः संभवेन भाष्यमसंगतं स्यात् कृदुत्तरशब्दस्याव्ययपूर्वपद
प्रकृतिस्वरेणाप्यन्तोदात्तत्वादेकाच्छस्वरेणापि नान्तोदात्तत्वं स्यात् तत्र हि संख्याशब्दो लोके गणना
यां प्रसिद्ध एव गृह्यते इति न कदाचिदनुवृत्तिः समुदायस्य षट्त्वमिति चेन्न एतज्ज्ञापकपरिभाष्यया
मा एषा दृष्टा नो दीर्घादित्यस्यापि विहितविशेषणत्वाच्छ्रवणेन समासेऽप्रवृत्तेः आचार्यैरिवं न प्रव
र्त्तिकर्तृत्वे किं वा तावत् शब्दादौ च षट्स्वरादौ स्वरयोरुभयोरप्यप्रवृत्तिः अभिव्यक्तपदार्था
ये इति न्यायात् न्यायाश्रुत्येवं चेदं च तुरः शसीति सूत्रस्थं च भाष्यं मानं वक्ष्यमाणरीत्या एवा
ढ णुभावात् गणनायां प्रसिद्धस्यैव ग्रहणमानाभावेन संख्याप्रकारकसंख्येयविशेष्यकबोधजनक
तयोत्तरपदार्थप्रधाने समासे समुदायेऽपि षट्त्वस्य सत्वाच्च इत्यन्तं अष्टानामिति प्रियाष्टाना
मित्यादावात्वप्रवृत्तये हलीति सूत्रे राद्वौ नु तत्राप्यात्वं न नुसंनिपातपरिभाषया नात्वं नांतस्य नु
क्षट्संज्ञकसंनिपातेन जातस्य तद्विघातकत्वात् किं तु नोपधाया इति दीर्घे न नलोपः नस्य
नोदात्तत्वं तु षट्त्रिचतुर्भ्यो हलादिरित्येव सिद्धं न च तस्यापि संनिपातपरिभाषया प्राप्तिः नलोपस्यासिद्धत्वेना
दोषादिति चेन्न उक्तं भाष्ये संनिपातपरिभाषादोषनिरूपणावसरे उदीरयदित्यत्र
पुक् ह्रस्वत्वस्यानिमित्तं स्यादिति ग्रन्थेऽसिद्धस्यापि तद्विघातकविधेरानयानिवृत्तिरित्यर्थ
लाभात् ह्रस्वस्यापि युगपल्लयावहिरंगत्वेनासिद्धत्वात् ज्ञानालेमिनु सामप्यातु ह्रस्वतदप
वृत्तिरिति च कैयटेनोक्तं न हि वहिरंगासिद्धत्वपूर्वत्रासिद्धत्वयोः कश्चिद्विशेषोऽस्ति तस्मात्

लोकेपि परिभाषानित्यत्वेनैव वाच्यं एवं च तस्यासिद्धत्वादात्वमेव प्रवृत्तं तदनित्यत्वेनेति ध्येयं ।
वस्तुतस्तु षट्त्वसंनिपातनिमित्तकएकएनुट्लोपेऽस्यात्वे वानसंनिपातविघातोऽस्तिस्थानि
वद्भावेन षट्त्वस्य सत्वात् इति ध्येयं कार्यकालपक्षे तु अत्र नुडर्थमपि हलीति तदा हि नत्रादि
धिवाक्यानापत्त्रषट्त्वस्यापि बहिरंगत्वेन नित्यत्वादात्वे कृतेऽनोऽनत्वेन षट्त्वाभावान्नुट् नस्या
त् न चात्र यथात्वं तर्हि अन्तरङ्गपरिभाषयानुट् नस्यादिति वाच्यं उक्तरीत्यास्थानिवद्भावे
न षट्त्वस्य सत्वेन निमित्तविनाशाभावात् अन्त्वविषये तदप्रवृत्तेरुक्तत्वाच्च स्थानिवद्भावा
नुक्तेति पूर्वत्रासिद्धे इति तु तस्य दोषत्वेन न निषिद्धमिति भावः ननु संयोगादिलोपसाहच
र्यात् लत्वस्येव णत्वस्यापि रषाभ्यामिति प्रतिपदोक्तस्येव ग्रहणं भविष्यति न तु तत्त्व विधिविधे
यस्येति चेन्न तथा भाष्यकृता मूर्धन्यपदानुवृत्तिमाश्रित्य रषाभ्यामित्यत्र णग्रहणस्य प्रत्या
ख्यानत्वेन तदेकवाक्यतयाऽनित्यत्वमाश्रित्य णत्वांशे प्रतिपदोक्तपरिभाषासाहचर्यप
रिभाषयोरप्रवृत्त्यंगीकारेणाहतेः न चैवं पदान्तस्येति णत्वनिषेधो व्यर्थः अपदान्तस्य मूर्धन्य
वृत्त्यनुवृत्त्यैव सिद्धेरिति वाच्यं णग्रहणवत्स्पष्टार्थत्वात् भगवता प्रत्याख्यानेनाममेव स्व
शाशयो न त्वन्यः कश्चिदिति ध्वनितम् ननु पंचमीसमासः प्रत्याख्यातोऽतस्माह बहिरंगस्ये
ति एतेन सूत्रमतेन पुत्वस्य शास्त्रत्वेन भाष्यमतेपि पंचमीसमासस्यानित्यतया पुत्वं भवत्ये
ग। वेति परास्तं प्रागुक्तयुक्त्या बहिरंगसिद्धत्वेन च सूत्रमतेपि शास्त्राभावात् संदिग्धलक्ष्यप्रव
लकार्यकालपक्षानुगृहीतस्यैव युक्तत्वाच्च कालपक्षशावल्यं च प्रगृह्यसंज्ञाप्रकरणे केय

९३०

षा॰ शे॰ टादेस्पष्टं तस्यटोपदत्वणत्वग्रहणप्रत्याख्यानायणत्वविषयेवहिरंगासिद्धत्वस्यावश्या
श्रयणीयत्वात्तत्र अतएव णग्रहणतत्प्रत्याख्यानयोर्णत्वग्रहणतत्प्रत्याख्यानयोः पंचमी
समासतत्प्रत्याख्यानयोश्चनफलेविशेषइत्याहुः एवंचप्रियाष्टणइतिहरदत्तोदाहृतंतुन्त
चिंत्यमितिवाच्यं प्राधान्यएवेति अयंभावः औङिधावष्टनःप्राप्तोप्यपरःशाद्वस्तुविशेषणं
अतएवबहुवचनं अन्यथाकृतात्वानुकरणेप्येकवचनेनैवनिर्देशोनस्यष्टाऔङितिस्पष्ट
इतिवाच्यस्यशसोऽष्टनुशाब्दवदर्थान्तरत्वंतस्यगतसंख्यानुवादकत्वसंबंधेन एतज्ज्ञा
पकवाक्यभेदासिद्धत्वाद्वान्यमपिनत्वेव नपचावभाष्यं हलीत्यपकर्षेप्रियाष्टौप्रियाष्टाइतिन
सिध्यति प्रियाष्टानौप्रियाष्टानइतिप्राप्नोति यथालक्षणमप्रयुक्तेइति नभवत्येवात्रात्व
मित्यर्थइतिकैयटः अत्रइतिप्राप्नोतीत्यस्यइत्येवप्राप्नोतीत्यर्थः अन्यथापकर्षाभावेप्रिया
ष्टस्यवैकल्पिकत्वेनप्रियाष्टानइत्यस्यदुर्वारत्वेनयथाश्रुतभाष्यस्यासंगतापत्तेः गौण
ह्लेवो त्वेप्यौत्त्वप्रवृत्तौहिबहुवचनोत्त्वौङ्वोऽसंगतइतिस्पष्टमेव यत्तुकाशिकायां आत्वाभावादौ
त्त्वंगौणतायांनेत्युक्तः तत्रविपरीतंवक्तुंयुक्तं अनुमीयमानात्वाभावसाधकोपाययेनैवौ
शाभावस्यापिसाधयितुंशक्यत्वात्तद्वाहावदिति पथमैकवचनेपिहल्ङ्याब्भ्योदिलोपात्प
रत्वादात्वेनतोलोपाप्राप्तेः प्रियाष्टाःइतिरूपमितिभावः नचलोपोन्तरंगःअनित्यत्वेनत
स्याःहाप्रवृत्तेः नचहल्ङ्यादिलोपस्यापिसंभावितत्वेनहलीत्यपकर्षेऽकृतव्यूहपरिभा
षयाआत्वात्प्रेरिदमसंगतमितिवाच्यं प्रत्ययलक्षणसूत्रस्यविध्यर्थत्वपक्षेस्तुपक्षेप्या
लोप

केचित्तु वेति

त्वस्य तु वीरत्वेनोक्तपरिभाषायाश्च श्राणात्ः नियमार्थत्वपक्षेऽपि अहलीति किं त्वाम्यनादेशादूतिन।
त्वमपक्षेत्यापर्युदासवृत्त्याविनेत्वर्थनादेशात्व अतएवापकर्षानपकर्षपक्षयोरुद्धेलोकामित्या
हुः इदं सर्वं वृत्तिहरदत्तायनुरोधेन वस्तुतस्तु यथालक्षणमप्रयुक्ते इत्यस्याप्रयुक्ते लक्षणाभाव
स्येव योग्यतानानुलक्षणप्रवृत्तेरित्यर्थः आद्यव्याख्यायाम प्रयुक्ते इति वाक्यशेषासंगतिः प्रयु।
क्तेऽपि लक्षणानतिक्रमसत्वात् प्रयुक्तानां हीदमन्वाख्यानमित्यभियुक्तोक्तिविरोधाच्च किंच
भाष्यकारस्य लक्ष्यैकचक्षुष्कतया रूपमेव व्याख्योचिताः अपि च यस्य प्रयोगो न स्मर्यते नापि
तन्निषेधस्तत्र यथालक्षणमिति व्याख्यानेऽभवत्येवात्रात्वमित्यपि व्याख्यातुं शक्यत्वेन तन्निर्णा
यकं न च पक्षान्तरेषु व्यवस्थितविभाषयाऽस्त्वात्वाभावसाधकोपायवत् अहलीत्यपकर्षे आत्वसा।
धकोपायाभावः अहलीत्यस्य निष्ठायां सेटीति वल्कलावधारणार्थत्वमाश्रित्य वाक्यभेदेन हला।
दित्वेनातेऽप्यात्वमर्थाद्यत्र हलादित्वं भावि तत्रेत्यर्थेन पूर्ववाक्यसर्वे त्रात्वस्य सुलभत्वात् अतए
व हलङ्गादिसूत्रे अस्याप्रयुक्तेलक्षणाभावइत्येवं व्याख्यादृत्ताकैयटेन एवं चैतेषामनभिधाना
दसाधुत्वेन सर्वोऽपि विचारो निष्फलः अतएव विभाषाऽऽत्वं पदयमात्वभूतस्य ग्रहणं करोतीति
स्पष्टाभ्यरतिस्वन्पष्टाम्रष्टन्नरस्त्यवश्यादित्यादिस्पष्टाभङ्गोऽशितादिसूत्रस्थभाष्यसंगच्छतेऽ
त्वेवं दन्ति किंचिदिति अत्त्वानुपपदेयज्ञेः किन्नधृष्णोर्हिंत्वमनोदात्तत्वं च सृज्ञेः कर्मणि क्विन
मागमश्च दिशेः कर्मणि उदः स्निहेः क्विप् उदोऽन्तलोपः षण्वेर अंचेः सुपि क्विन कुंचो निरुपपदात्

क्विन्नलोपाभावश्चेति भावः निरुपपदाद्युजेरिति नुमोऽसमासएव विधानेन सोपपदे चोः कुरिति
कुत्वेनैव सिद्धत्वेन क्विनिक्विपि च विशेषाभावात् क्विन्विधिवैयर्थ्यापत्त्येति भावः नच यङ्लुकि
स्वरविशेषार्थं त्रुसाहचर्येण तत्राप्रवृत्तेः वक्ष्यमाणरीत्या यङ्लुकः प्रवृत्तेश्चेत्याहुः केनावि
नाविति ककारो गुणवृद्धिप्रतिषेधाद्यर्थः नकारः क्विन्प्रत्ययस्य त्वत्र विशेषणार्थ इति भाष्यम्
एतेन स्वरितेत्स्वत्रागमस्यागमाश्चनुदात्ता इति वाधित्वा नित्स्वसामर्थ्यादाद्युदात्तत्वमिति परा
स्तं अमागमात्पूर्वमकृतव्यूहपरिभाषया धातुस्वराप्रवृत्तेश्च दधृगित्यत्र निपातनाद्विशिष्टे
वंतोदात्तत्वं भाष्योक्तं नच स्पृशधातोर्युजिक्रुंचभ्यां च यङ्लुकि स्वरे विशेषः नास्ति स्वरे विशेष
इत्येतज्ज्ञाप्यप्रामाण्येन यङ्लुकः प्रवृत्तेः ञ्नित्यादिरित्यनुवंधनिर्देशेन यङ्लुकः प्रवृत्तेश्च एवमि
कारस्यापीत्संज्ञेति दिवऔदित्यत्र निरूपितं एतेन इकारउच्चारणार्थो नेत्संज्ञकइत्यपास्तं वस्तु
तः क्विप्रत्ययस्येत्युक्तावपि एकानुवंधकग्रहणे परिभाषयास्यैव ग्रहणं नक्विपः एकारद्वयसं
देहस्तु व्याख्याहारणीयः तस्माद्वाचं क्विन्त्वमित्याहुः यद्यपि वेरपृक्तस्येति सूत्रभाष्येऽपृक्त
ग्रहणाभावे दर्विरित्यत्र लोपः स्यादित्याशंक्य यानुनासिकः प्रत्ययस्य तादृशस्य विशब्दग्रहणमि
ति समाहितत्वे कारापीत्संज्ञक इति लभ्यते तस्यापि वकारोनुनासिक इति तत्स्वरूपशेषस्याभा
वेण पूर्वभाष्यस्य प्रौढिवादपरत्ववोधनात् इकारउच्चारणार्थ इति वोध्यं रुदतिङ्संनिहि
तेति तत्फलं तु णिज्ञादीनां संज्ञाभावः अनिङ्किं पाठान्तरं रुरुदिवत्याद्योनेवृ प्रकृतीति

इत्यस्य निषेधो मा भूदिति । ज्ञापकेन निर्वाहे तु न किंचिल्लाघवमिति सूत्राशयः । इत्थं पचतिचिकीर्ष
ति नुमादि मा भूदिति । युजे उगिदचां सर्वनामस्थानेऽधातोः । सर्वनामस्थाने परे उगितोऽनुम् अधातोरि
त्यतो नुमिति चानुवर्तते । क्विन्प्रत्ययग्रहणसामर्थ्यादतद्गुणसंविज्ञानो बहुव्रीहिरित्याह । किं
न्प्रत्ययो यस्मादिति । न च तदभावे विस्पष्टकुत्वापत्तिः कुत्वस्य बहिरङ्गत्वान्नुमं प्रत्यसिद्धत्वाच्च बलो
पकृते नस्याश्रये । न चानवकाशं कुत्वं किं त्वं नस्य पदस्येत्यस्यार्थे नावकाशस्य सुलभत्वात् । किं
व चंस्य कुत्वे क्विनो घः कृत्य एव वदेदिति भाष्ये कैयटादौ स्पष्टं । न च शोवेत्यत्र घकारस्यैवानुवृत्त्यापि
नदोऽवरूत्याकुः चोः कुः स्कोरित्यतो नरूति झलो झलीत्यतो झलीति चानुवर्तते पदस्येति चाधि
कारः । तदाह । झलीत्यादि । क्विन्प्रत्ययस्येत्यत्र तु झलीति नास्ति । स्वतोग्रहणसामर्थ्येनैका
चोवशादूत्यतस्तन्निवृत्तेः । निष्ठादेशप्रकरणेन विच्छेदाच्च । अत एव स्पष्टमित्यादौ न दोषः । एत
नात्रैव चोरिति वक्तव्यं तत्रैव वा क्विन्प्रत्ययस्येति वक्तव्यं एवं च कुग्रहणं व्यर्थमित्यपास्तं न्या
य्यत्वादाह । असिद्धत्वादिति । अतद्गुणबहुव्रीह्याश्रयणात्प्राप्तिः । स्पृगिति । सत्सूद्विषेति +
क्विप् । धातुपाठे तु प्रथमोपस्थितत्वात् व्याख्यानाच्चेति भावः । स्पृगिति । किं चेति क्विप् । एवं नि
ति एवं ज्ञिगति चैकल्पे दवेडिति । क्विन्प्रत्ययस्येति बहुव्रीह्याश्रयणात्कुत्वं स्यादत आह । इहेति । स्प
ज्ञिदशोरिति सूत्रस्थयज्ञ स्तु भ्यामिति भाष्यप्रयोगात्कामप्रकृते उपपदका स्पृतीति भाष्य
योगाच्च षत्वस्य कुत्वापदत्वाच्चेति भावः । परिमृडिति । नन्वत्र मृजेर्वृद्धिर्डुर्वोरासोः प्रत्ययलक्षणे

232

प्र॰ यो॰

नपरत्वात् नच प्रत्ययस्य प्रकृत्याकांक्षायामुपस्थितत्वाज्जेरेव संबंधेन मृज्प्रकृतिप्रत्यये परत एव वृ
द्धिः ॥ नचायं तत्स्थेति वाच्यं मृजधातोः क्विपि मृड्डित्यादौ दोषस्य दुरुद्धरत्वात् इति चेन्न धातोः स्वरूपग्र
हणे तत्प्रत्यये कार्यविज्ञानमिति परिभाषणान्न दोषः क्विपमाश्रित्य तु न वृद्धिः क्ङिति चेति निषे
धादित्याहुः साहचर्यादिति सहचरितासहचरितयोः सहचरितस्यैव ग्रहणमिति परिभाषणात्
रामलक्ष्मणावित्यादौ साहचर्यस्याभिधानियामकत्वदर्शनाच्चेति भावः परौव्रजेः क्विब्विधि प्राक्
श्रिद्रुप्रुज्वां दीर्घोऽसंप्रसारणं चेत्युणादिसूत्रात् क्विब्दीर्घावनुवर्तेते ताभ्यां च व्याख्यानान्यदं
ते रूपस्यासंबंधः किंतु वेरेवं तत्र तत्संबंधस्य अस्वरसत्वे त्यादौ क्लृप्तत्वाच्चेत्याह क्विबित्यादि
ना केचित्तु परौव्रजेरिति भिन्नं सूत्रं तेन सामान्यतः क्विप् दीर्घौ विधाय परेण पदांतविषये षत्व
मित्याहुः विश्वस्य उ लोपः अत्यमोर्दीर्घस्यानुवर्तते न नुषत्वादीनामसिद्धत्वेन राट्शब्दपरत्वाभा
वः विश्वाराड्भ्यामित्यादौ दीर्घो नापतिश्च राडिति रूपाविवक्षणे तु विश्वराजावित्यादावपि
दीर्घापत्तिरतस्त्राह पदांतोपलक्षणार्थमिति एतेन राषोरिति सूत्रमामित्यपास्तं राड्भिरित्या
दौ रुत्वापि तस्यजायमानत्वात् अत एव विश्वाराडसीति वैदिकप्रयोगः संगच्छते इति भावः
राडोरिति तु नोक्तं महाभाष्ये तत्करणे यत्नगौरवात् एवं तरट्धातोः क्विपि निष्पन्नराट्शब्दस्य
तु न ग्रहणं सूत्रसिद्धत्वेन वसुशब्दसाहचर्यादेकार्थसंबंधस्य प्रतिपादस्य च शास्त्रवाचक
स्य वाराजतेरेव ग्रहणात् अत एव वसोः पूर्वनिपातः संगच्छते आदित्यास्त्वविशेषेवसव।

श्वेति विग्रहे आदित्यविश्ववसव इत्यादौ न दीर्घः विश्वशब्दस्य पूर्वपदत्वाभावात् अत्र चोत्तरपदा
धिकारेण पूर्वपदस्याक्षेपात् स्कोः पदान्ते झलि च यौ सकारककारौ संयोगादी तयोर्लोप इ
ति न सूत्रार्थः संयोगादित्वस्य पदान्तत्वस्य चैकस्मिन्न संभवात् अतः संयोगविशेषणं पदान्ते झ
लि चेति न चोपसर्जनत्वं पृथक्पदत्वादित्याशनाह पदान्ते झलि च यः संयोग इत्यादि मृदिति
मज्जतीत्यर्थे क्विप् यत्वत्र झल इति पंचम्यंतमनुवर्तते तेन झलः परयोरेव स्कोर्लोपः अतए
व संयोगान्तस्य लोप इति सूत्रे संयोगान्तलोपे यणः प्रतिषेधो वाच्यः दध्यत्र संयोगादिलोपे।
च काकार्थमित्युत्तरं न वा झलो लोपादिति वचनं प्रत्याख्यातं तेनात्रापि स्पष्टमेव झल्ग्रहणं।
संबंध उक्त इति नात्र संयोगादिलोप इति तत्रैव वार्तिकं किं कारणं झलो लोपात् झलो लो
पः संयोगान्तलोपो वक्तव्यः बहिरंगलक्षणत्वाद्वा अथवा बहिरंगो यणादेशः अंतरंगो लो
प इति तदुत्तरभाष्येण संयोगान्तलोपसूत्र एव झल इत्यस्य संबंधेन संयोगादिलोपे इत्यर्थस्य
स्पष्टमेवोक्तत्वात् अत एव झलो लोपः संयोगान्तलोप इति संयोगान्तपदोल्लेखः अंतरंगो लो
प इत्यत्र तदनुल्लेखसंगच्छते झल इत्यस्य विच्छिन्नत्वाच्च अत्र पदस्येत्यधिकृते एकत्वस्य विवक्षि
तत्वान्निमित्तनिमित्तिनोरेकपदस्थत्व एव स्कोर्लोप एव इत्यवधेयम् तेन पृथक्कस्याते इत्यादौ
न पदान्तसंयोगादिलोपस्याखण्डपद एव प्रवृत्तेः सत्वेन न तस्याह चर्यात् झन्निमित्तालोप
स्याप्यखंडपद एव प्रवृत्तिः तेन पयः स्थितिरित्यादौ नातिप्रसंग इत्याहुः सस्य श्चुत्वेनेति तस्त्व

३५२

२३३

धा॰ शो॰

संयोगघट
कवर्णैकदेशः
मित्रपदस्य पाठे
तं

स्यासिद्धत्वात् पूर्वं स्थितत्वमित्यर्थः ऋत्वाग्रुपपदइति अत्रैवेत्यर्थः निपातनसामर्थ्यादिति चोः कु
रित्यनेन कुत्वेनापवादत्वाद्बाध्यते इत्यनयन्नाह किन्नन्तत्वादिति अनेनास्यासिद्धत्वेन न्याय्यत्वा
च्चोः कुरित्येवोपन्यासितं युक्तमितिपरास्तं यद्यपि षत्वं क्विन्प्रत्ययस्येत्यस्यापवादइति न पुंस
केवलस्य तेन प्यापि क्विन्विधानसामर्थ्यादेवापवादस्यापि बाध इति भावः ऋत्विग्यजतीति ऋतुं य
जतीति वा विग्रहः वसन्ताय कपिञ्जलानालभेतेत्यादौ तेषामेव देवतात्वदर्शनात् त्तर्गिति
ऊर्जं बलं प्राणनं वा इत्यनयोरित्यत्र श्रुत्यादि णंतात् भ्राजभासेत्यादिना क्विप् णिलोपः स च चोः कुत्वेन
स्थानिवत्त्वं पूर्वत्रासिद्धत्वात् पदान्तविधित्वाच्च इह ह्रलान्ते प्लवयाइति नोदाहृतं अत्रैव यज इति
एवं नस्तद्धितकादस्य पदान्तविषयेऽस्य कांदसत्वात् अप्पंचडस्रघेतवह्रुककथ्यप्रासपुरोडा
प्रावयज्ञामेवं तत्रैवोपसंख्यानत्वात् तत्र भंत्रे श्वेतवह्योक्थ्यप्रासपुरोडाश्शा एवनितिउपपदा
नां धातूनां च पृथक्पाठे कर्तृत्वे समुदायोच्चारणेनालाह्य णिकमपि किंचिन्निपातनाल्लभ्यते
तत्र श्वेतशाट्येकर्तृवाचिन्युपपदेवाहेः कर्मणि प्रत्ययः सत्वेकार उच्चारणार्थः दाण् दाने इत्य
स्मात्पूर्वः पूर्वे कात्प्रत्ययः कर्मणि दास संज्ञादेर्ईत्वं च उक्थ्ये कर्मणि करणे वा उपपदे शंसः प्रत्य
यो न लोपश्च तस्य वृद्धिः उक्थशासावित्यादि पदान्ते तु दस उक्थ्यशाद्भ्यस्येति भाष्येपि उ
संत इति वहुवः केचित्तु शासेः प्रत्ययः उपधाया ह्रस्वः तत्सामर्थ्यात् एवमपि वृद्ध्यभावः अस्यापि
उसावप्यपक उव॰॰ शाइत्यत्रदीर्घार्थं उव॰॰ शास्त्रशब्दस्येति भाष्ये यथाश्रुतमेव मास्त वा उत्स

दीर्घस्य विधिचैवसिद्धेः आपं एव रूपं तु वेदेनास्त्येव । एवं च उक्थशासिः सोनोपयोग उक्थशासः उक्थश
स्त्रस्य भावेन तस्य कृतिकस्येत्यर्थ इति वहृवः उक्थशासौ इत्यादिमु शासेर्षिचासिद्धं विचूर्णिवनोः ।
स्वरेत्तु न विशेषः एकावत्वात् यदि णिव वनेन तस्य समासस्याद्युदात्तत्वमिष्टं णिवनोनित्त्वसामर्थ्या
त्वविशिष्टस्य प्रकृतिभावेन निर्देशाद्वेत्युच्यते न हि वषादित्वाद्धितं तस्याद्युदात्तत्वं कल्प्यं अत्र पाठस्तु समास
उक्थशोभ्यामित्याद्यर्थः अपदान्तये सोच नेतस्य मात्रेनभिधान इति श्रातुः ध्वनितं चेदं मतं मनोर
माचांपरं किंचिदं मतं गुरुत्वाद्धि तंयत्तु उ स्वविधेयः अवयः षेन वाः परोडा इति पदान्तविषये रूत्वे रूपसिद्धेरि
ति तत्र णिवप्रत्ययनिमित्तत्वाद्धोऽत्र तः परत्वाभावेनोत्वानापत्तेः घेतवोभ्यामित्याद्यसिद्धापत्तेः यत्तु प
दान्तविषये वा सत्त्वपन्यायेन णिवप्रत्ययोपस्थितिनिपातनं चेदमुभयोः इदमेवाभिसंधायावयाः इति श्रुती
कमुपादाय णिवनीति प्राचा व्याख्यातं अत एव रूपकरणे वयाश्वसस्य पाठश्च श्रुरितार्थः अन्यथा उसं
ते ससत्तु षोरुरिति रुत्वे सिद्धे दीर्घमात्रस्य निपातनान्नान्तस्य करणे एव कृतं स्यादिति तत्रा ससत्तु षोरु
रितिसूत्रान्तस्यानुवर्तनेन सान्त एव तत्प्रयत्नेः अत एव ज्ञापकात्सान्तत्वं एवं च उस्तनसूत्रार्थसिद्ध
एवं च सकारस्थानिकरेफान्तत्वमन्य यदीर्घत्वमात्रमनेन विधीयते तच्च दीर्घत्वप्रतिप्रसवविधिला
घवानुरोधात् संबुद्धावेव न च यत्र दीर्घत्वं तत्रैव सान्तत्वं कल्प्यमेनेति वाच्यं बकुलस्य संस्कारानुरो
धेन वार्तिकानुरोधेन च पदान्तविषयत्वस्यैव कल्पनात् उपस्थितपदान्तत्वस्यापि त्यागे मानाभा
वात् एतदमेवात्र प्रकरणे पाठः संनियोगशिष्टन्यायस्य तु न्यायं विषयः एवं च णिवन्त्तंतस्याव ।

न

श॰ श॰ याडित्येव संबुद्धौ वोध्यं मंत्रे पदाविषये णिव नो न भिधानं ध्वनितं चेदं मंत्रेष्वेतेति सूत्रे भाष्ये इत्याहुः श्व
न्नेत्तु णिन नस्यादेशोऽस्य पूर्वेत वाहादीनां उस्पदस्येति वार्त्तिकात् एतत्संबंधिनः प्रत्ययस्य णिवनो उ
सत्त्वे पदत्वस्याभावित्वं इति तदर्थः अत एव वृत्तिकृता णिव न प्रक्रम्याश्रुतवाङ्हत्यनुहृतं इत्याहुः ध्वा
नितं पाठांतरं न्यरादीनामित्यतो नानुवर्त्तनादाहृस्पदादीति तेनानत इत्यादौ न तदोः किम् यः ननु
न तोरित्येव वाच्य नचानेन स्यादौ स्य प्रसंगः नुटः पदद्वयाश्रितत्वेन वहिरंगस्यासिद्धत्वादिति
चेन्न प्रकृतिप्रत्ययसापेक्षत्वेन सत्वस्यापि वहिरंगत्वात् वस्तुतस्तु त्रपदाधिकारस्य कार्य
स्य वहिरंगत्वेपि स्वसिद्धत्वं न अत एवात्मानं प्रियं मन्यते तं कुलं श्रिम न्यमित्यादौ मन्यतेः ए
श्रिश्च एकाचोम्प्रत्ययवच्चेति पूर्वेपदस्यामितस्यामोरितालुक् सिध्यति नच श्रीशब्दस्य न
पुंसकत्वाभावः प्रष्ठादीनां योगात् स्त्रियामिव श्रीशब्दस्यापि परित्यक्तस्वलिंगस्य कुले वृत्तेः अत
एव ह्रस्वो नपुंसक इति ह्रस्वः स्पष्टं चेदमिच एकाच इति सूत्रे भाष्ये न च पूर्वोक्ता नुक्तकर्त्तृमशाकोऽमु
दू प्रसंगादिति स्पष्टमाकरोनन्वनंम्ययोरिति स्पष्टं यीकिमर्थं तदसद्यत्यत्रात्वं वाधित्वा परत्वादुभयो
रपि सत्वे सोर्हल्ङ्याप्रादिलोपे कृत्वे च सद्यादिसिद्धेः नचात्वसंतस्येति दीर्घापत्तिः असोलात्वणिक
त्वेनाप्राप्तेरिति चेन्न स्त्रियां सत्यसिध्यापत्तेः हे सद्यस्यासिध्यापत्तेश्च सकृद्गतिन्यायेन पुनर
तस्य दुर्लभत्वात् वस्तुतः पुनः प्रसंगविज्ञानपक्षे त्यदादित्वसंभवः किंच तदोरित्यनंतरमदस
इति योगं विभज्यादस एव दस्य सत्वं नान्यस्य व्याख्यानेनादोषः नच हीयते क्विपि स्य इत्यत्र

तस्मात् गौणत्वसत्त्वयोरभावेन ह्रीरित्यस्यैव न्याय्यत्वात् तादृशप्रयोगाभावाच्च अपि च तका
रस्यात्यस्याभावात् तस्माद्द्वचर्यणदकारस्याप्यनेनास्यैव ग्रहणं सिद्धं तं त्ययोरिति चिन्त्यप्रयो
जनं सौ किमू तौ अत्वसत्त्वेनेति गणकार्यत्वादिति भावः ङे प्रथम युष्मदस्मत्भ्यां ङ सो
शित्यलोपो युष्मदस्मद्भ्यामिति वर्त्तते प्रथमाशब्दाद्यादृद्ययोर्ग्रहणं तथा प्रथमयोः पूर्वसवर्णे इ
त्यत्रोपादितं ङे इति पृथक्पदं लुप्तषष्ठीकं यद्वा प्रथमाशब्दः प्रथमाद्वितीययोः समुदाये गौ
णः तस्य चैकत्वात् ङे शब्देन समासे द्विवचनं प्रथमयोर्वचैयोस्तु न ग्रहणं व्याख्यानात् ङे
प्रथमयोरिति सुवचं त्वाहो यद्यपि युष्मदस्त्वादेशस्याभावे कवचनत्वेव सिद्धस्तथापि यु
ष्मानतिक्रान्तो तिन्त्वमित्यादिसिध्यर्थं मत्रविधानं युष्मद एकार्थवाचित्वाभावेन तत्र तस्यप्राप्तेः
युष्मदस्मदोरनादेश इत्यत्रो युष्मदस्मदोरित्यनुवर्त्तते तदाह युष्मदस्मदोरिति आत्वयोः प्राप्तु
क्तत्वेन तद्विषयातिरिक्तविभक्तिरिह शेषशब्दार्थस्तदाह आत्वयत्वेत्यादि स्पष्टं चेदं युष्मद
स्मद्भ्यां ङ सोऽशित्यत्र भाष्ये प्रकृतसूत्रे भाष्ये च अत एव साम आकमिति सूत्रे सस्तु द्विनिर्देशस्सं
गच्छते शेषस्येति व्याख्याने तदसंगतिः स्पष्टैव अन्त्यस्येति अलोऽन्त्यपरिभाषयेति भावः अतो
तो गुण इति तत्रान्तरङ्गत्वात् पररूपे कृते लोप इति क्रमो बोध्यः वार्णादाङ्गमिति त्वेकस्य निकविष
यमित्युक्तं ननु न्याहयोरकारस्योच्चारणार्थत्वादस्योपन्यासो व्यर्थः अत एव टिलोपप्रस्ताव भावार्थः
शेषे लोप इति सूत्रतः लुप्तशिष्टैतस्याह कार्यसिद्धिं मनीषिण इति त्यादीनाम इति सूत्रस्थं भा
हि

श्वा॰ श्रो॰

ष्यंत्वन्नेयः श्लिष्टः तस्मिन्कार्यस्य टाबभावस्य सिद्धिः तस्य शेषत्वस्य फलमाहुरित्यर्थकं त्वममा
दिषु चादेशेषु अकारउच्चारणार्थो हलंतास्त्रवादेशा इति न क्वचिदाप्प्रसंग इति कैयटस्य संगच्छते
अन्यथा वर्णादांगपरिभाषया परत्वात्पूर्वमेव टिलोपे टाबभावस्योपपादयितुमशक्यत्वेनाभ
यासंगतिः स्पष्टैव पाठांतरे अकारस्य कार्यद्वयेपि स्थानित्वात् णिजंतात्क्विपि युष्मस्म इति
प्रातिपदकयोस्त्वाहादेशाविषयेंत्यलोपेनेगीकारान्नदोष इति इत्यंतं इति तन्न अहादेशा
कारेणैवोच्चारणेसहायसंपादसिद्धौ त्वाहौसाविति गुरुनिर्देशो वैयर्थ्यापत्तेः इकारांतावादे
शा इति वृत्याद्यनुसारेण तथोक्तेः किंच णिजंतात्क्विपि युष्म इति प्रातिपदिके परत्वात्त्वाहा।
दौ प्राप्ते लोपस्यांत्यलोपत्वपक्षेव कारादिलोपे त्वंतव त्वादिप्रयोगाणामसिध्यापत्तेः ते ते त्वा
दीनामापत्तिश्च एवं च मपर्यंतस्येति सूत्रस्य कैयटविरोधः कैयटस्य तु रूढः भाष्यस्य तु
विभिन्नस्थानिकत्वाद्विभिन्ननिमित्तकत्वाच्च वर्णादांगमित्यस्याप्रवृत्तावंतरंगत्वात्परत्वेप्येक
तोटिलोपेन तु न्न प्राप्तेऽकार्यसिद्धिरित्येवं परतयापि लापयितुमशक्यत्वात् त्वमहमिति न च
गौणे बहुवचनांतादिविग्रहेऽस्य चारितार्थ्यादत्र परत्वात् त्वमाभ्यां भाव्यमिति वाच्यं त्वमावपि
प्रबाधते पूर्वविप्रतिषेधतस्त्य स्यवहस्यमाणत्वात् अंतरंगत्वादिलिंगसंख्याकारकसापेक्षवि
भक्तिनिमित्तकपूर्वरूपापेक्षयाटापः स्त्रीत्वमात्रापेक्षत्वेनांतरंगत्वादिति भावः अलिंगेति त
थाच स्त्रियामनयोर्वर्णनान्न न टाबिति भावः इदं च मतं सामस्याकमिति स्वत्रे भाष्यस्य छम्

यदा विशेष्यवाचकपदांतरसमभिव्याहारं विना लिंगाबोधकत्वमलिंगत्वं एवं चेदत्राविषये यद्यपि वाहि
रंगत्वेन परत्वाद् मि पूर्वत्वमेवेति भावः यद्वेति अयं पक्षस्त्यदादीनामः इति सूत्रे सामग्र्याकमिति च सूत्रे
भाष्यस्पष्टः अधिकरणत्वविवक्षयेति अत एव शेषग्रहणं चरितार्थं अन्यथाऽऽनन्तर्यत्वाभ्यां विशेषा
विहिताभ्यां स्वविषये बाधसंभवेन न हेत्वर्थस्य एमेव मपर्यंताक्केषस्येति इदं चाप्राप्तमतेन त्वमि त
त्यादौ लोपश्च वृत्तिवेलायामपर्यंताक्केषत्वाभावेपि न क्षतिः सांप्रतिकाभावे भूतपूर्वगत्याश्रयणा
दिति भावः यद्यपि युष्मभ्यमिति अत्र सांप्रतिकसंभवस्तथापि नेकमुदाहरणं योगारंभश्च योज्ञकमिति
तात्पर्यं अत्रेदं बोध्यम् सम्बुद्धिनिर्देशशेषग्रहणाभ्यामस्य सूत्रस्यावत्यार्थद्वयपरत्वं तत्र लक्ष्यानुरो
धात्व्यवस्थितं एतेन भ्यमिति टिलोपपक्षे युष्मभ्यमिति स्यादिति परास्तम् ध्वनितं चेदं भ्यसोभ्यमिति
सूत्रे यदि तावद् भ्यमादेशः शेषे लोपे त्यलोप इति प्राप्नोति अथाभ्यमादेशः शेषे लोपष्टिलोप
इत्युदात्तनिवृत्तिस्वरः प्राप्नोति यथेच्छसि तथास्त्विति वदता भाष्यकारेण अन्यथाभ्यमादेशाट्टिलो
पमादाय फलभेदानुपन्यासे बीजानापत्तेरित्याहुः अत्र यथेच्छसीत्यादिभाष्यस्वरसेन भ्यमांत्यलो
पस्याभ्यमिति टिलोपस्यैवोक्तत्वेन च भ्यमभ्यमोः फलेन विशेष इति ध्वनितं एवं मंत्यलोपटिलोपयो
श्वत्वपि एवं व्याख्यानं प्रत्तप्रकृतिककर्त्रेकेपि पत्र भ्यमभ्यमोरंत्यलोपटिलोपयोर्वा फले विशे
षस्तत्रानभिधानमेव शरणीकरणीयमिति किं च यथेच्छसि तथास्त्विति प्रौढोक्त्या तद्भाष्यस्य भ
गवतेव प्रौढिवादत्वं बोधितं यथेच्छसि तथैवास्तु तत्र दोषोद्धारस्य मया सुकरत्वमित्येव तात्पर्यं

प्रा॰ शो॰

दस्य

सूत्रतात्पर्यं तु अस्यमेव तत्र अस्मत्यलोप एव शेषग्रहणं तु स्पष्टार्थमेवेति पाठांतरं युष्मदोरनादेशे शेषे
लोप इति सूत्रभाष्योक्तमेवेति तत्वं एवं नात् क्विपि युष्मद् त्यादौ वृद्ध्यमाणान्येतु मतरीत्यात्वाद्या
द्यादेशाभाव एवेति च तत्वम् अतो गुणे कृते इति वार्णादांगं परिभाषानुपस्थानप्रवर्त्तेनेनत्योक्तं
अकृतव्यूह परिभाषा त्वनित्यत्वान्न प्रवर्त्तेत इति बोध्यं यत्तु शेषग्रहणं सामर्थ्यात्तयोरप्रवृत्तिरिति+
तन्न युष्मभ्यं युष्मत् युष्माकम् इत्यादौ टापूनिरुत्या चारितार्थ्यात् अन्येतु अस्यांगाधिकारस्थ+
त्वाद्विभक्तिनिमित्तकत्वाच्चांतलोपोपि संनिपातपरिभाषयाऽबाध्य अत एव युष्मा वित्यत्रात्रोक्त
परिभाषया दाद्वेति रुजेंजे तन्सूत्रभाष्यकृतः एवं च शेषस्य लोप इत्यर्थे फलाभावः शेषग्रह
णं तु भाष्ये प्रत्याख्यातमेव त्वदादीनाम् इति सूत्रस्य भाष्यं पाठोऽव अगृहित्युक्त्या वा पितारु
चिकं चेत्याहुः आगत्वात्तदंतविधिं मत्वाह परमत्वमिति गोणोऽप्रवृत्तौ वीजाभावादाह अतित्व
मिति पाठांतरं युवावौ द्विवचने शब्दोऽत्र यौगिको व्याख्यानात् द्वयोर्वचनं तत्र समर्थयोर्युष्मदो
रिति वाच्योऽर्थः इत्याशयेनाह द्वयोरुक्ताविति वेति इत्युक्तं द्वित्वे इत्येव विभक्तावित्यधिकारा
तृत्रिकस्य प्रातिपदिकार्थत्वात् द्वित्वे शास्त्रेण विभक्तेर्विधानाच्च द्वित्वे या विभक्तिरित्यर्थला
भसिद्धे वचनग्रहणसामर्थ्याद्द्वयोरुक्तिरित्यर्थो द्विवचशब्दस्य द्वयोरित्युक्तावपि विभक्ती
नां कारकशब्दसंख्याशापि धर्मिवचकत्वमिति मते विभक्तिविशेषणत्वमेव संभाव्येत तद्वा कया
रिति तन्सौत्रो निर्देश इत्याशयेनाह द्वयोरुक्ताविति एतत्फलं तु गोणोदाहरणेषु मूल एव

स्फुटम् । नन्वेवमपि द्वित्वविशिष्टार्थे प्रातिपदिकेति युष्मदस्मदोरित्यंगाधिकारात् तदंतस्यापि विशे
षणं स्यादेवं च गौणे समासे दोष एवेति चेन्न भाष्यादिप्रामाण्येनास्य गृह्यमाणविशेषणतया प
र्यंगीकारेणादोषात् एवं च प्रत्यासत्त्या गृह्यमाणयुष्मदस्मदित्यावर्त्यायादेशा द्वित्वविशिष्टा
र्थप्राकृतादुच्चारणाद्यादि द्वित्वविशिष्टार्थयुष्मदस्मदोरेवादेशा अत एवात्वेयवजुत्वेऽणं नान्तद्वि
पि कर्तृद्वित्वविवक्षायां श्रिष्यमाणं लुप्यमानार्थाभिधायीति न्यायेन युष्मदस्मदोर्द्वित्वसंख्या
युक्तधर्मवाचित्वेन विनादेशाः विशेषीभूतद्वित्वविशिष्टावत्तएकत्वे रूपधर्मिणि युष्मदर्त्वाद्या
नुपूर्व्याः प्रातिकत्वेऽपि युष्मादेरतथात्वात् अत एवात्र यद्वा वा च इति चिन्त्यम् न्यादौ न तिष्ठाद्यादे
इत्याहुः शानिच्छेति कैयटस्तु स्यान्निविङ्गविनानयोरपि गृह्यमाणेरूपेनयाश्राव्योन कर्तृद्वित्वविशि
ष्टार्थयोरप्यादेशानिच्छति त्रिनशब्दस्यानगृह्यमाणः यदागमास्तन्न्यायलब्धस्यापि निर्दिष्टवमा
नत्वानंगीकारादिति तदाशयः म पर्यंतस्येति किमिति अधिकारसूत्रे किमर्थमित्यर्थः युवका
मिति ननु समुदायादेशत्वेऽपि त्वाहोरस्य कारमकारादेरस्तु अपि सर्वनाम्नष्टेः प्रागकच्प्रसंगत्तत्र
सर्वनाम्नः टेः प्रागिति व्यवस्थाया युष्मदस्मदिष्ययोत्वयकेत्यादिसिद्धये वक्ष्यमाणत्वाद् त्र न
दोषस्तत आह हल्ग्योति नन्वत्रापि अच्यवचनिन्यासेन एकारादेशोऽयादेशश्च सिद्ध्येत आह युव
काभ्यामिति नन्वेवमपि मांतस्येत्यवाच्यतां किंपरिग्रहणेन अंतशब्दस्यावयववाचीति चे
सति न एवं युष्मपत्यादेः क्विपि यत्र युष्मदस्मदोर्मांतत्वं नैवं स्यात् सामानाधिकरण्येनान्वयस्यो

शा॰ शो॰

चितत्वात् ननु तदा नञ् इति परिग्रहणं सति तु तस्मिन् तत्सामर्थ्यात् युष्मदस्मदोरव यवौ योमपर्य
न्ताविति व्याख्यानात् सर्वत्रैव सिद्धं युष्मपत्यादेः क्विप्यपि व्यपदेशिवद्भावेन तदवयवत्वं बोध्यं व्यप
देशिवद्भावो ऽप्रातिपदिकेनेति तु प्रत्ययविधिविषयमिति समासे निष्कादिभ्य इत्यादि सूत्रस्थाकर
ग्रन्थे स्पष्टं स्पष्टं चेदमत्रैव भाष्ये एवं च सर्वत्रैव मान्ते ऽमान्ते वादेशप्रवृत्तिः अत एव त्वाहादावकारो
च्चारणं चरितार्थं पाठान्तरं अभिव्यक्तपदार्थायेत्यतिन्यायस्तु पदकार्यविषय एवेति निरूपितं +
अत्र चेदमपि भाष्यमानमिति केचित् इत्यन्तं एतेनाभिव्यक्तपदार्थायेत्यतिन्यायेन मान्ते ऽप्यवत्सा
सामर्थ्याद्युष्मदस्मदोरव यवस्य मान्तस्यैवार्थेनेव इष्टसिद्धौ परिग्रहणमस्तु तन्त्रमित्यपास्तं +
परिग्रहणं कुर्वतः सूत्रकारस्य प्रामाण्येन यत्रैव मान्ते युष्मदस्मदी तत्रैव स्यादिति न्याय्यप्रामाण्ये
न तन्न्यायस्य पदकार्यमात्रविषयत्वांगीकारात् अन्ये तु परिग्रहणं यत्र मान्तापेक्षया परिशिष्ट
मस्ति तत्रैवादेशार्थं कृटिपर्यन्तवस्तुमित्युक्ते ऽग्रे किं वदन्तीति नियमेन प्रतीतिः एवं च युष्मप
त्यादेः क्विप्यपि नैवादेशा अत एव भाष्ये ऽवधिद्योतनार्थं ग्रहणं कर्तव्यं मान्तस्येत्युच्यमाने य
त्रैव मान्ते युष्मदस्मदी तत्रैवादेशाः स्युः क्व च मान्ते युष्मपतेरस्मयतेश्चाप्रत्यये इति उक्तं तत्रैव त
स्यादिति एवं वेत्यर्थे अवधिद्योतनार्थमित्यस्याप्यन्तशब्दस्यावधिवाचितया द्योतनार्थमित्यर्थः
पर्यन्तशब्दस्य लोके तथैव प्रयोगात् अग्रे किं विस्तृते देशस्य कालयोरवधित्वव्यवहारो लोके
परिग्रहणाभावे तु यतः पूर्वो ऽस्ति परश्च नास्ति सो ऽन्त इति भाष्योक्ते मान्तपदस्य मुख्यार्थत्वलाभाय

कोऽलुप्तमित्यस्य प्रवृत्तिः स्यादिति तदाशयः अत एव भाष्ये प्रयोगप्रदर्शनं न कृतं किं च पूर्वव्याख्याने परि
ग्रहणेन मण्णिमं श्वादिन्यायेन सामानाधिकरण्यान्वयबाधः संभवान्न ह्याधस्तिन्दमेव युक्तं
अत एवांगुष्ठमारभ्य मस्तकांतं कुष्ठस्त्येव प्रयोगेन नतु मस्तकपर्यंतमिति मपर्यंतस्येति चनलुग
णसंविल्ला नो व हुव्रीहित्वाद्दो सा वित्यत्राकारोच्चारणं तु षे न वहूो वधू शासितिवत्नार्थं साथकं इ
स्याहुः इदं चात्रैव के यण्टस्य ष्टं अंगकार्ये इति अंगाधिकारस्थे कार्ये इत्यर्थः एतेनांगप्रवृत्ते पुनर्
न्नावविधिर्निष्ठितस्येति परिभाषार्थेन उपनिवद्धा अंगे गाधिकारे प्रवृत्तं वर्णनं यस्य तदंगवृत्तं
प्राक्स्थं तस्मिन्कृते सति पुनरन्यस्मिन्नंगवृत्ते प्राप्ते स विधिरिति तदर्थः अत्र चज्ञापकं ज्ञाजनोर्जे
ति दीर्घनिर्देशः अन्यथा जानाति ज्ञायते इत्यादौ ज्ञादेशे नानोदीर्घाप ज्ञीति दीर्घणसिद्धे किं तेन:
नन्वनेन दीर्घपच्चामिभोः इनिवत् अज्ञानाम् भोः इत्यादावपि अनं त्यस्यापि प्रश्नाख्यानयोरिति
प्लुतो न स्यात् अतः श्वादित्येव सिद्धे तत्र त्यदीर्घग्रहणस्य प्लुतनिवर्तकताया उक्तत्वात् न चानं
स्य त्यस्य पदे टेरिति तदर्थानर्थकं थं मैं चमीत्यादौ न स्यात्तिः किमर्थं वा दीर्घग्रहणेन नन्निराकरणमि
तिवाच्यं दीर्घग्रहणसामर्थ्यादंतविषये एव तत्संबंधात् वाक्यर्थीः ल्कृत्वसंबंधत्यागे मानाभा।
वात् तेन वाक्यस्यान्ते त्यस्य पदस्य प्लुतः स्यात् अंत्यस्य च पदस्य टेरित्यर्थः नचादितितपरकरणे
नैव प्लुतव्यावृत्तिः शाकपाकर्त्तुमिति दीर्घग्रहणं व्यर्थमेवेति वाच्यं प्लुतस्यासिद्धतया तद्भाव
त्वेस्त्तपरकरणेन कर्तुमशक्यत्वात् अत एव गीपूरित्यादौ दीर्घः अन्यथा तस्यापि इदुदितितपर

प्रा॰शे॰ 238

तत्सामर्थ्यादप्यवन्त्यापत्तिः दीर्घग्रहणे तु तत्सामर्थ्यादिसिद्धत्वस्यापि बाधः आकारान्तरप्रश्लेषेणवार
णं तु क्लिष्टं तत्र तात्पर्यग्राहकाभावाच्च अस्तु वा तदुपायान्तरं तथापि यथान्यासेन कश्चिद्दोषः ध्वनि
तं चेदं स्याध्वोरिति सूत्रे भाष्ये इति चेन्न उक्तज्ञापकपरभाष्यप्रामाण्यानुकूलतस्यैवैकल्पित्वाच्च दृष्टावि
षयेऽप्लुताप्रवृत्तेः कल्पनात् एतन्नज्ञापकपरभाष्यप्रामाण्यान्न त्वदीर्घग्रहणे हलि लोप इति सू
त्रे हल्ग्रहणमिति वक्तव्ये लोपग्रहणवत्त्वेन नार्थसाधकमित्यन्येन च ज्ञो होत्यादिकज्ञनू धातोः
प्रान्तरिदीर्घनिर्देशाश्रुरितार्थः यदि तु दीर्घादेशो श्नाभ्यस्तयोरिति लोपशास्त्राद्धस्वादेशोऽतो गु
णत्वस्य च शास्त्राच्च ज्ञेजदिति रूपेण विशेषस्तर्हि अनिघज्ञादौ न सार्वधातुके परेऽभ्यस्तानामा
दिः द्वाज्ञ इत्यर्थकाभ्यस्तानामादिरित्यस्य दीर्घपदे शास्त्राद्धस्वादेशोऽतो गुणे चेऽभयत्वाश्रयणे
नादिवद्भावविरहेणाशास्त्राच्च विशेषादिति वाच्यं तस्य ज्ञनेकांदसत्वात् ज्ञासाहचर्येण श्रूयमाण
विकरस्यैव ग्रहणात् पूर्वोत्तरसाहचर्येणलादेशाश्रितोऽग्रहणाच्च एतेन ज्ञनोर्थ ऽलुगंतयोः शत्
प्रत्ययेंतरंगत्वाद्धित्वे पश्चात्साभ्यासस्य ज्ञादेशोऽभ ग्रहणेन महासंज्ञया वैत्सेनित्यादाविवाभ्यस्तसं
ज्ञाभावेऽभ्यस्तयोरित्यस्याप्रवृत्तौ रूपविविधस्यसत्वेन दोष इत्यपास्तं ज्ञापकपरभाष्यप्रामाण्यात्
तत्र शत्प्रत्यय एव नेति कश्चित् इयं च परिभाषाऽनित्या द्वयोरेकस्यात्यादिनिर्देशात् अन्यथात्यदा
द्यत्वे एत्वं न स्यात् एतन्मूलकमेव क्वाचित्रिषिद्धिनस्यैति यत्नते तेन न त्वं गसंबंधिन्येव कार्ये सा परिभाषा +
न प्रत्ययसंबंधिनि अत एव ससजुष्टनिर्देश श्रुरितार्थो न स्यात् मकारान्तरमिति शासानेत्येन न संहि

तथा पाठे इति भावः । न त्वह्विज्ञातिपत्त्या प्रयत्नेन द्वयोरपि मयोरेक एवानुस्वारः अत एव टिलोपान्त्यलो
पपक्षयोः फलैक्यं हृदमुपपल्लक्षणं नसः शीत्यत्र नसः इति सकारान्तरप्रश्लिष्य सान्तस्य नस इति व्या
ख्यानादनो मिति सकारादकम् ग्रहणमनुवत्यामुस्यामेवेति व्याख्यानाद्वेत्यपि बोध्यं तथा अत्रापि विभक्ताविति
संबध्यते अन्यथा प्रत्ययोत्तरपदयोश्चेति त्वमौ स्यात् तत्फलं तु त्वत्सुंदरः पुत्रीयस्य युष्मत्सुंदरः अत्र इति
त्रिपदबहुव्रीहौ नादेश इति एवं चैकत्वे इत्येव सिद्धे युवावौ द्विवचने इति सूत्रोक्त रीत्या वचनग्रहणसामर्थ्या
अत्राप्येकशब्दोदाह एकस्येति अविभक्तिकमिति तथा च ङे प्रथमयोरिति प्राप्तस्यामः पुनर्विधेयमिति भाष्यं कित्वं
योगको व्याख्यानं च तथैवास्तु स्त्रीनपुंसकयोने त्वा प्राप्तेः अलिंगत्वे सर्वत्रैवा प्राप्तेश्च युष्मानित्याद्यसिध्यापत्तेः यो वि
दत्याह पाठं अनादेश इति किं त्वत् मत् पंचम्याश्चेत्यदादेशः आत्वविधायके च भ्यम् व्यावर्त्यः वस्तुतस्तु त्वार्थमे
व तदिति भाष्ये स्पष्टं हलादाविति परिशिष्टोपलक्षणं यदि तत्र हलीत्यनुवर्त्तते तदा वाची त्यज्ञग्रहणं
मास्तु इत्याहुः तुभ्यमिति अंत्यलोपपक्षे ङे स्मेन अंगत्वान्मकारप्रश्लेषाद्वा अत एव गौणयादेशो
न भ्यमम्यम्वेति भाष्यादिप्रामाण्यादादेशद्वयस्य त्रयस्तस्यात्पर्यमिति भावः अंत्यलोपत्य एवेति
भ्यसोभ्यमिति सत्रभाष्ये ऽभ्यम्पक्षएवोदात्तनिवृत्तिस्वरः शंकायाः कृतत्वादिति भावः एत्वेनेति दी
र्घत्वं तु एत्वेनैव बाधितमिति भावः तथा तस्यापि निवृत्तेश्च पक्षद्वयेपीति वस्तुतो ऽभ्यमित्यत्र के
दरन्तु अंत्यलोपत्वे पि न सवर्णदीर्घः पररूपेणवाधात् अकारोच्चारणं तु गवन्त्वपरिभाषा ऽनित्य
त्वबोधनद्वारा एत्वनिरत्यर्थमिति बोध्यं युष्मदस्मद्भ्यां ङसः शित्वं सर्वादेशार्थं अन्यथा द्यादेः

प्रा॰ प्रो॰ परस्य स्यात् स्यादेनतु श्रादेरकारविधाने वैयर्थ्यापत्तेरंत्यस्यैवाकारे इतोगुणे च सिद्धं तवेत्यादीति व्यर्थमे

239 वशिष्टं तग्रहणं नन्वदेर्विधाने ष्यादेशात्वसंपादनद्वारा यत्वनिवृत्त्यर्थं शेषे लिंगार्थं च तत्करितार्थः नच यो

च्वङःसीत्युक्तेर्यत्वनिरासः सिद्धः पर्युदासे एकवचनत्वादिना साहचर्यग्रहणापत्तेः किं चैवं सति ङःसो

पिश्रावत्वेन तत्र परे त्यलोपेन वेत्यादौ स्यादेशापत्तिरिति चेन्न नच यो च्वङःसीत्युक्तेर्वस्तासिद्धेति वा

च्यं यादेशाकारणे विश्रं त्यलोपपक्षे स्यादेशस्य दुर्वारत्वात् तद्वारणाय अकारादेशाश्रावश्यकः न

त्वचाकारांतरत्वप्रश्लेषेणाकाररूपपक्षयोरेनविकिंयेने इत्यर्थात्र स्यादेशा इति स्पष्टमाकरे किंच।

पर्युदासे एकवचनत्वादिना साहचर्यग्रहणेनिष्टं स्पष्टमेवेति चेन्न त्वमहमित्यादौ संपूर्णविभक्त्या

देशेयत्वाभावसंपादनेनानादेश इत्यस्य चरितार्थत्वयाप्रकृते पत्वाप्रवृत्तौ मानाभावात् अनादे

श इति तु तत्सूरूपोलाघवात् नसत्रविभक्तिरादेशरूपा किं तर्हि तदवयवः नसर्वे सर्वपदादेशा इतिन्या

येन समुदायस्याप्यादेशत्वं तत्र मानाभावात् नचैवमपि पररूपबाधनार्थमेवादेरत्वविधानम

स्तु यत्वस्य दुर्वारत्वेन पररूपस्याप्राप्तेः नचतद्वैत्यस्याकारादेशेपि यत्वप्राप्तिर्दुर्वारा अतोगु

णे इति पररूपे श्रादेशानुपविभक्तित्वसत्वेन तदप्राप्तेः नचवा एर्णादागमिति परिभाषया पररू।

पात्सर्वे यत्वप्राप्तिर्दुर्वारा वा एर्णागयोरेकस्यानिकत्व एव तत्र त्वप्रवृत्तेर्धर्मिग्राहमानेनोपपादितत्वा

८ दिति चैत्राहुः श्रित्वमेव तर्हि सर्वे सर्वपदादेशा इति न्यायं ज्ञापयति एवं चादेरपि श्रत्वविधाने य

त्वव्यावृत्यान्तस्य चारितार्थ्यानादेः परस्येत्यत्र बाधे मानाभावेन सर्वादेशार्थं श्रित्वे सार्थकं प

दादेशात्तत्रपदशब्देनार्थवत् अर्थवत्त्वंच कल्पितमपि गृह्यते एतेनकृत्वाऽस्मस्थानेरूपद्धत्वादे
शात्प्रकृतिप्रत्ययसंमोहाद्भवस्यैति तत्कस्यादित्यपास्तमित्यलं नन्वाकमः पूर्वेलोपाभावेनादं
तत्वाभावात्सुडागमाप्रसक्तेः ससुद्धनिर्देशोऽव्यर्थः सत्रासंगतिश्चात्यत आह भाविन इति आ
कमिशब्देलोपेकृतेशाप्तस्येत्यर्थः अयंभावः सामइतिसमाहारद्वंद्वः सप्ताद्दूनचयोग्यत्वाव
त्वात् सकारविशिष्टस्यामेवगृह्यते आम्सहचर्याद्व साहित्यंत्वेकत्रान्वयितमात्रेण अतो।
तानागतयोरयंद्वन्द्वइतिवत् मातापित्रोर्भ ते नीहे त्यादिवद्व एतेनसामोर्युगपत्तत्स्थित्यभा।
वात्सहविवक्षाभावेनद्वंद्वोनस्यात् इत्यपास्तं उत्पन्नौसुइ्याम पेक्षायामपिज्ञाने तदभा
वेनवक्तनिष्ठसहविवक्षायावक्तुंशक्यत्वात् तस्मात्सामइतिद्वंद्वो निर्बाध एवनन्वत्रद्वंद्वो।
दीधीवेवीटामित्यादाविवसुडागमपरनिपातानापत्तिरितिचेन्न लक्षणयातस्यापिप्रयुक्तयप
रत्वात् केचित्तु सकारोच्चारणसामर्थ्यात्सामइत्यत्र केवलोऽप्यम्त्रेण निर्दिश्यते आम् सा।
सहितः सामितिसपुत्रइतिवद्बहुव्रीहिः तेत्रेणचद्वपेनिर्देशो नेनकेवलस्यामोव्यपदेशाव
द्भावेनामसहितत्वादाकमितस्यस्थानिवद्भावेनाम्प्राप्त्याऽटिपुनरनेनाकमिति अगवन्निपरि
भाषात्तुअंगसंबंधिन्येवकार्येइति प्रागेवोक्तं नचलक्ष्यलक्षणस्यैतिन्यायः भिन्नलक्षणत्वात्
ससुद्धनिर्देशासमर्थ्यात्व तस्यचायमेव ससुद्धनिर्देशोज्ञापकइतिवाच्यमित्याहुः नन्वा
कमित्याकारप्रश्लेषेणैव सामर्थ्यादाकारादेरेवाकमित्यर्थे दोषाभावेनसकारनिर्देशोव्यर्थ

240

प्रा· प्र·

इति चेन्न लक्षणैकचक्षुष्कैर्ज्ञेयत्वात् अस्मद्युष्मत्कारप्रश्लेषेणाम्नः शाकारप्रत्याख्यानवदित्याप्नेश्च
एतेनामि सर्वनाम्नः सुडित्यत्रामिपदेनैवाश्रयणादाम् नूपस्यैवापः सुडित्यर्थाद्वाकमि सुटोऽप्राप्तेः
ससक्तनिर्देशो व्यर्थ इत्यास्तां पाठांतरं तत्र शेष इत्यत्र विषयसप्तम्यां पूर्वमेवांत्यलोपे ततः सुटि।
नुटि वा प्राप्ते तदपवादत्वयाकमि कृते इष्टसिद्धिः वक्ष्यमाणयुष्मच्छब्दे उभयोरप्यप्राप्त्या चारिता
र्थ्ये परत्वान्नुट् सुस्टेर्थेदागमा इति न्यायेन विशिष्टस्याकम् सिद्धेर्लक्ष्ये लक्षणस्येति न्यायेन
पुनः सुडाद्यभावे सिद्धे सकारनिर्देशो व्यर्थ इति वाच्यं तस्मिन्निति शास्त्रबाधेन विषयसप्तमीक
ल्पनापेक्षया सकारनिर्देशस्य लघुत्वात् कृत्स्वादिरकत्वं न कृतः इत्यंतं गौरवाच्च न चाकमादी
र्थोच्चारसामर्थ्यादंत्यलोपस्याप्रवृत्तेः ससक्तनिर्देशो व्यर्थः टिलोपपक्षे चरितार्थ्यान्तु सं
त्यलोपेप्यकारस्यैव निरस्या चारितार्थ्ये न पररूपापत्तौ युष्मकमित्यसिध्यापत्तिश्चेति दिक् द्विव
चनैकवचनशब्दयोरर्थपरतया व्याख्याने फलं दर्शयति श्चैकत्ववाचिनीति द्वित्वैकत्वविशिष्ट
वाचिनीत्यर्थः समासार्थोमुख्यविशेष्यमन्यसंख्यायुष्मदाद्यर्थगतसंख्येन रसंख्यायुक्तश्चेदि
त्यर्थः स्त्र इति द्विवचनैकवचनशब्दयोरर्थपरत्वाश्रयणादिति भावः एतेष्विति कृत्स्नं पदम्
युवावाविति कर्मपदम् एवं त्वमावित्यपि पूर्वविप्रतिषेधेनेति विप्रतिषेधे पूर्वः पूर्वविप्रतिषे।
धस्तत्पेति समासः एवं परविप्रतिषेधशब्दोपि व्याख्येयः अत एव प्रत्ययोत्तरपदयोश्चेति सू
त्रभाष्ये त्वमावितिसूत्रे शेष इत्यनुवर्त्य सुजस्ङेङस्व्यतिरिक्तविभक्तावेतावितिव्याख्यानं त्व

सभ्यं भ्यसस्त्वे युष्मभ्यं अस्मभ्यं तत्रादिभ्यः अमोमशिन्त्यादिसूत्रभाष्यप्रामाण्येन यत्र लनिरिक्ताद्धलोपः लोपः।
गीकारात् शेषेलोपेप्येवं अस्मदस्तु शेषेलोपे ओभ्यं सुयोगादिलोपे तु अभ्यं पत्वे सभ्यमिति तत्र
मोनोधातोरिति नत्वापत्तेः औपदेशिकधातोरेव तत्र ग्रहणमित्यत्र तु नमानं वस्तुतस्तु भ्यसि अन्नमि।
धानमेव भ्यमभ्यमोः फलं चेदस्यानिष्टेः हावाभ्यमेव नतु भ्यमूलत्वापानुरोधात् नच विपरीतमेवास्तु
युष्मदस्मदोरनादेशाद्रतिसूत्रस्थेन नच हलादिरादेशोस्तीति भाष्ये एभ्यम एव सर्वत्राङ्गीकारद्यो-
तनादित्याहुः ङसेभ्यसोः युष्मत् अस्मत् युष्मत् अस्मत् ङसिप्रगवत् युष्मयोः अस्मयोः युष्माकं अस्माकं
युष्माकं अस्माकं युष्मिन् अस्मिन् युष्मासु अस्मासु अत्र सर्वत्र णिलोपोनस्थानिवत् कोलुप्तमि-
तिनिषेधात् नचेदमसार्वत्रिकं सपर्यन्तस्येति सूत्रस्थ परिग्रहणेन भाष्यप्रामाण्येन चात्र प्रवृ-
त्तेर्ज्ञापनात् एतेन युष्मदस्मदस्मभ्यां णिचि टिलोपोङ्लेभ्यः इष्टनिदृष्टस्यैवातिदेशात् नचा-
स्मादिष्टनुटष्टः अजादीगुणवचनादेवेत्युक्तेरिति परास्तं युष्मयतेः अस्मयतेः आप्रत्यये इति भा-
ष्यप्रामाण्येन यत्र क्वापीष्ठनिदृष्टस्यान्यत्राप्यतिदेशस्वीकारात् अत एवात्परराजदिति भाष्य-
प्रयोगः संगच्छते सन्निपातलक्षणेति परिभाषया टाप् नयासयोरिति ज्ञापकं तु विशेषविषयं
अत एव वृद्धाविन्यत्रोक्तपरिभाषया टाप् नेति भाष्यं संगच्छते अनित्यत्वाश्रयणेनाप्यरन्नोरष्टतरप्रा-
माणाभावाच्च संवृद्धौ देत्वद्देमः अत एवत्वाहादावकारोविवक्षितः सति प्रयोजने उच्चारण-
र्थतायाअयुक्तत्वात् एतत्तु सर्वं कैयटानुसारेण प्रागुपपादितं कैयटोक्तमतान्तरे तु युष्मयुष्मो

१३४२

शा॰ शे॰ 242

इत्याद्येव तत्पाणिनेरिदमेव भाष्यसंमतमित्युक्तं पाठांतरं सर्वे अत एव त्यदादीनामः इति सूत्रस्थभाष्य
कैयटयोर्नो संगतिरन्यथा तत्र भाष्यसंमते कैयटोक्ते हलंतादादेशात् न तिपदलेयुष्मेत्यादीनामसंग
तिः स्पष्टैवेति दिक् इत्यंतं पदस्य अपदांतस्य मूर्धन्य इत्यतः प्रागयमधिकारः तत्फलं तु राज्ञाना
वित्यादौ नलोपाद्यभावः इयं चोत्तरत्रानुवर्तमानांगस्येति वत् क्वचित् स्थानषष्ठी क्वचिदव
यवषष्ठीत्यस्यानुरोधाद्व्याख्यानाच्च तेन माडुपधायाश्चेत्यादावपि वषष्ठी स्थानषष्ठीत्वे हि
मवर्णाभ्यां पर उपधाभूताभ्यां च परो यो मतुप् तदंतस्य पदस्य उच्यमाने वत्वं वलवानित्यत्रैव स्यात्
इत्वं वत्वं नाविन्यादौ न स्यात् मत्वंतस्य पदस्यैव लाभावात् अत एव नलोपः प्रातिपदिकांतस्येति सूत्रे
नग्रहणं चरितार्थं स्पष्टं चेदं भाष्ये एतेनांगग्रहणसामर्थ्यान्मुख्योत एव नलोपप्रवृत्तिः अत
एव नः संख्यायाः इति निर्देशः संगच्छत इत्यपास्तं भाष्यविरोधात् तत्र इत्यत्र नलोपाभावस्तु ग
तौ न सकृत्प्रीतिवत् समाधेयः यदि तु अंगस्येत्यस्य वा स्थापित्या व्याख्यानात् क्वचिदवयवषष्ठीत्वं त
र्हि अंगग्रहणं शाकमकत्वमिति मनोरमा कृतः होढ इत्यत्र स्थानषष्ठीत्याहुः पदात् कुत्सने
च सुप्यगोत्रादाविमतः प्रागयमधिकारः इदं च ङमुट् सूत्रे भाष्ये स्पष्टं अनुदात्तमित्यादि पदद्व
यमापादसमाप्तेः पाठांतरं तत्र पादग्रहणेन ऋक्पादः श्लोकपादश्चाविशेषात् गृह्यते अपादा
दिग्रहणेन पदांत पादमध्यस्यैव छंदो हीनवाक्यस्यापि ग्रहणं ग्रामे केवलो यस्त्वमित्यभि
व्योदाहरणात् इत्यंतं षष्ठ्यादीनि ननु पदस्येत्यधिकारेपि विशिष्टयोरित्यर्थालाभः युष्मद

विभक्ति

स्वरूपस्य वा पदस्य षष्ठ्याद्यविशिष्टस्यापि भ्यामादौ संभवात् षष्ठीद्वितीययोरसंभवेन पदावयव
योरित्यर्थलाभेऽपि त्वदुक्तार्थस्य मानाभावाच्च नच पदावयवत्वस्याव्यभिचरितत्वेन तदनुवृत्तिसाम-
र्थ्यादुक्तार्थलाभः तदनुवृत्तेरुत्तरत्रावश्यकत्वेन सामर्थ्यायोगादिति चेन्न सर्वस्य द्वे इत्यतः सर्व-
स्येत्यस्याप्यनुवृत्त्या तत्सामर्थ्याद्युष्मदस्मदवयवकपदलक्षणोऽत्र दोषः यद्यपि भ्यामादौ सर्व-
मित्यस्यैव प्रयोजनमुक्तं तथापि विभक्तिविपरिणामाकरणलाघवेनेदमेवानुवर्तितं नच युवा-
भ्यामित्यादौ प्रकृतिभागस्याप्यादेशापत्तिः व्यपदेशिवद्भावेन तस्यापि तदवयवकत्वादिति वा-
च्यं पाठान्तरं व्यपदेशिवदेकस्मिन्निमुक्ताऽसहाय एव तत्प्रवृत्तेः एकाच्द्विर्वचनन्यायेन समुदा-
य एव तत्प्रवृत्तेश्च इत्यंतं षष्ठीद्वितीयासाहचर्येण सुबंतमिति पदसंज्ञावत एवादेशप्रवृत्त्यंगी-
कारात् नन्वेवमपि तवेत्यादीनां तेइत्याद्यादेशापत्तिरिति वाच्यं षष्ठ्यादेः प्रकृत्याकांक्षितया
द श्रूयमाणयुष्मदादिप्रकृतिकस्यैव ग्रहणेनादोषात् नौ चानुदात्ताविति नन्वेकस्मिन्वाक्ये वां-
नावादीनामुद्देश्यत्वविधेयत्वयोर्मानाभावः वाक्यभेदे विशिष्टविधौ वा गौरवात् न चानुदा-
त्तमित्यधिकारसामर्थ्यात्तथेति वाच्यं आमंत्रितस्येत्यादौ विधेयांतरानुपादने तस्य चारिता-
अत्रानुदात्तमिति र्थ्यादिति चेन्नैवं भाष्यप्रामाण्येन च गौरवांगीकारात् नन्वनुदात्तं सर्वमित्यत्र सर्वग्रहणं
पदोपस्थितिसा व्यर्थं न च तिङ्ङतिङः इत्यादौ सर्वानुदात्तार्थं तदिति वाच्यं विनिगमकाभावेन तत्सिद्धेः अनु-
मर्थ्येन दात्तं पदमेकवर्जमिति तु उदात्तस्वरितविधिविषयमेवेति स्पष्टमाकरे न चातिङ्ङतात्परं तिङ्

तं निहन्यते इत्याद्यर्थकं तिङ्‌। तिङः इत्याद्यावादेः परस्येत्यनुभावार्थं सर्वग्रहणं नन्वयं त्वो ह्निदेवः
करोतीत्यादौ मध्योदात्ते आदेरनुदात्तत्वेपि सार्वानुदात्तत्वं न स्यादिति वाच्यं स्थानषष्ठ्यभावात्
न च पदस्येत्यस्यैवेति वाच्यं अनुदात्तं तिङ्‌ इत्यादि श्रुतप्रमाणानुरोधेन तस्यापि प्रथमया विपरि
णामात् नलुडिति प्रतिषेधाच्च नहि लुङतमाद्युदात्तमस्ति यस्यानुदात्तत्वापेदं सार्थकं स्यात् अ
तोत्यस्य स्थापि स्थानषष्ठ्यभावादेवाप्राप्तिः स्पष्टं चेदं भाष्यादाविति चेन्न स्पष्टार्थत्वात् भाष्ये त्विद
मेव सर्वग्रहणं विभक्त्यन्तस्यादेशार्थमित्युक्तं उक्तार्थयोरिति पदात्परयोरपादादौ स्थितयोरि
त्यर्थः द्वितीयायां त्वामणोरप्युदात्तत्वादाह षष्ठीचतुर्थ्येति सूत्रे द्वंद्वे पूर्वनिपातशास्त्रबलात् षष्ठ्याः
पूर्वपाठेपि विभक्तिक्रमरक्षार्थं द्वितीयादिक्रमेणोदाहरणम्‌ आदौ श्रीशस्त्वा इति दत्तादिति अनेन चतुर्थी
त्वं स्फुटीकृतम्‌ संवेद्योस्मानिति नन्वत्र संबोध्यभावेन वाहरत्वेनानुष्ठ्यादत्वानापत्तिः संधेनु उभय
त्राश्रयणेन वज्ञावाभावेन कथमादेशप्राप्तिः। पादांतरं इति चेन्न संवेद्यो इत्येकादेशविशिष्टस्य पूर्वां
तत्वेन पदत्वात्स्मानित्यस्य चैकदेशविकृतन्यायेन द्वितीयांतस्य छंदत्वेन संयोक्तृत्वेन तत्प्राप्तिरित्याशया
त् संधिश्चांतरंगत्वादादेशात्पूर्वमेव इष्यते आदेशानां परत्वेन साधेर्दुर्लभत्वाच्चेति चेन्न आदेशसति
नकारान्तः सर्वदा वत्विति एवं चास्मानित्यस्य पादादित्वापत्त्यापत्तीव्यविरोधात्तत्रादेश इति भावात् यत्तु अपा
दादाविति पर्युदासात्पदांते पादमध्ये चादेशः एवं चास्मानित्यस्य पादादित्वाभाव इति पादांतत्वपादमध्यं
त्वयोरप्यभावेन नादेश इति तन्न ग्रामे कंबलो मे स्वामि इत्यादौ छंदोरहितवाक्ये आदेशानापत्त्या भाष्यादि
विरोधापत्तेः यत्तु वाक्यादेव पादशब्देन गृह्यत इति तन्न संकोचे मानाभावात् एतेन श्लोकपाद एव गृह्यत

त्य

इत्यपास्तं ननु सर्वस्य धात्वधिकारात्तव्याद्यन्तानामेवादेशा भविष्यन्तीति किं स्थग्रहणेनेत्यत आह

स्थेति समर्थयति घ्नतस्तु धीवनिवत्तृ ति घृतिरहानो वर्त्तते समर्थमाहासीदिति तत्रावगमात् तेन ष

ष्ठादीनविज्ञहतोरेवादेश इत्यर्थः युष्मत्तु इति युवयोर्युष्माकं वेति विग्रहः अत एव तत्र मौन य

द्यपि वृत्तावभेदैकत्वसंख्यौत्सर्गिकीति वृत्तपते तथापि आदेशाभावरूपतात्पर्यग्राहकसत्वान्नत्व

ति: सत्त्वद्ध्यप्रत्युदाहरणलाभायोद्यारितेनत्यदवक्त्रीयप्रत्युदाहरणलाभाय च इति तत्तु तन्न ।

तिनोदाहृतं पदात्पदत्वसंपादनायेति भावः समानवाक्ये इति निमित्तनिमित्तिनोरेकवाक्यस्थित्वे

इत्यर्थक समानवाक्ये इति प्रकृत्यविधेयात् इत्यर्थः देवदत्तो मत्तुप्रदत्तं हरेति निघातोदाहरणं नि।

घातेनानामानुदात्त: एकतिङिति इति च सूत्रशास्त्रकार्योपयोग्येकवाक्यत्वलक्षणम् तेन पश्यमृ

क गो धावतीत्यादौ लौकिकैकवाक्यत्वेऽपि नाप्राप्तिः स्पष्टं चेदं तिङ् तिङ् सूत्रे भाष्ये तत्र ह्येकतिङ् वा

क्यात्रित्याति ङ्- ग्रहणं प्रत्याख्यातं लौकिकैकवाक्यत्वलक्षणं च सप्तति ङ्- तच्च योवाक्यं क्रियावाका

रकान्वितत्व परेणोक्तं अत्र वा शब्दश्चेदर्थे कारकान्वितक्रियाचेद्बोध्येति शेषः तेन सुवंतचयतिङ्-

तचयसुतिङ्- तचयानां त्रयाणामपि वाक्यत्वलाभः क्रियावेत्यनेन निरर्थकपदसमुदायाव्यावृत्तिः

पत्तु वा शब्दस्यारस्याद र्थस्यापि वाक्यत्वमिति तत्र अर्थवाक्यशब्दाप्रयोगात वचोशब्द संज्ञायामि

तिनिषेधेनकृत्वानापत्तेः श्रुतिदिक अन्ये तु आद्य लक्षणस्य निरर्थकेतिव्याप्तेरननुगतत्वाच्च लक्ष ॰

णांतरमाह क्रियावेति कारकान्वितक्रियावाचक: शब्दसमुदाय इत्यमरार्थमाह ओदनं पचेत्या

एवं च कारकान्वितक्रियास्त्वपूतिङ्-न्तच पदत्यर्थः
सुचतिङ्-न्तच सुप्तिङ्-न्तेषु स्वपूर्वविशिष्टं तिङ्-
न्तपामेक शेषः ॥

१४५

पचेत्यादिः नचात्रसामर्थ्याभावान्नप्राप्तिः एकार्थीभावसामर्थ्यएवपरिभाषाप्रवृत्तेरितिभाष्यादि+
सिद्धांतात् नस्यचात्रासंभवः साक्षात्त्विङ्युष्मदस्मदोस्तिङ्युष्मदस्मदोर्विधेययोरेवचैकार्थीभावकल्प
नेनशक्यत्वेनतत्कल्पनेमानाभावात् इतिसमर्थेनिरूपयिष्यामः नन्वेवमप्ययंमेदण्डइत्यादावन्य
निरूपिततात्पर्यकेऽस्तिक्रियायाः प्रयोजनाभावेनानध्याहारादेकवाक्यत्वाभावेऽप्यादेशप्राप्तयोनस्यु
रितिचेन्न अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीत्यादिभाष्यप्रामाण्येनतत्रापितत्सत्वात् अस्यनि
यमार्थत्वेनानेकतिङ्घटितस्यवाक्यत्वंनेत्यर्थात् अतएवमृगोममधावतिपश्येत्यादौनादेशाः
आष्टमिकद्वित्वस्यस्थानेद्विर्वचनत्वादेवदत्तोमेपचतिपचतीत्यादावादेशाभवंत्येव एकश्रा+
त्रूः समानपर्यायइत्यत्रनतन्त्रितिरितिसमर्थसूत्रेकैयटः एतेवादयइति तथाचसपूर्वायाइति
सूत्रेभाष्यं युष्मदस्मदोर्विभाषाऽनन्वादेशे अपरआह सर्वएतेवांनावादयोऽनन्वादेशेविभाष
तिनतर्हीदानीमिदंवक्तव्यंसपूर्वायाइतिवक्तव्यंअन्वादेशार्थइति परिशेषसिद्धार्थमाह अन्वा
देशेत्विति नडुदाहरन्ति तस्मैतेइति नचवापंचकेति समुच्चयविकल्पाद्युक्तत्वेदावधारणार्थका
नांचवाह अह एवानांपचानांमध्येअन्यतमेनयोगेइत्यर्थः युक्तेइतिभावेक्तः एतेनयुष्मदस्म
दोरितिद्विवचनस्यसत्वेनयुक्तेइत्येकइत्येकवचनमयुक्तमित्यपास्तं ननुतुल्यार्थैरितिवन्नती
यानिर्देशेनैवसिद्धेप्रयुक्तग्रहणंव्यर्थमतआह युक्तग्रहणादिति साक्षादिति युष्मदस्मदर्थग
तसमुच्चयादिद्योतकत्वेइत्यर्थः पंपरेतिस्याअयान्तियितव्यादिः पष्यार्थेः अतएवनिपाना+
त

भावेशः दर्शनं पश्यः तस्यानालोचनं इति निषेधात् अदर्शनमित्यादौ हि शेषस्यात्यन्तव्यतिरिक्तज्ञानार्थकत
स्य इष्टत्वाच्च ज्ञानमात्रे तदाह अचाक्षुषेत्यादि चेतसाक्षत्वाभिति नन्वचाक्षुषेति पर्युदासेन बहिरिं
द्रियजन्यज्ञानार्थयोग एव स्यादिति चेत् सत्यं युक्तमिति चेन्न अनालोचनार्थैरित्येव सिद्धे पश्यार्थैरि
त्यस्यैव पर्यापत्तेः परं परेति स्यान्विताम्बयित्वादि अत एव पूर्वसूत्रे युक्तग्रहणं चरितार्थं भक्तस्त्वेति
इहत्वेत्यस्य प्रपुणसंबंधोन तु साक्षात् न ध्यायतीनेति भावः सपूर्वायाः सह शाब्दो विद्यमानवचनो अ
पंचम्यर्थे नेकमन्यपदार्थे इति समासः वोपसर्जनस्येति सभावः तदाह विद्यमानपूर्वादिति इदं श्रावयवधि
मतोः सञ्जात्यान्यदन्नू एव प्रत्ययग्रहणे तदन्तग्रहणमित्याह पच्यमानादिति नन्वेतेवान्ताववादय
आदेशा इत्यनेनैव विकल्पसिद्धेः किमनेनेत्य तस्य अन्यादेशोपीति अप्राप्ते निषेधो न विकल्पते निषे
धविकल्पविकल्पे विधिविकल्पस्य फलितत्वादाह आदेशा वेति यो हरिस्त्वां त्रायते समां चेत्यादौ
चादियोगे सपूर्वाया इति बाधित्वा पूर्वविप्रतिषेधेन नित्यनिषेध एवेति नवेति विभाषेति सूत्रस्य
विभाषास्वरसः नेनेति भक्तत्वेनेत्यर्थः अतः प्रक्रान्तार्थत्वान्न पक्षे द्वोपादापेक्षा अत एव सम
मेकाव्ययकाशे प्रक्रान्तप्रसिद्धानुभूतार्थकत्वके द्वोयपक्षे द्वोपादाने नापेक्षेत्तत्र इत्युक्तं अएपादाने
पि यत्प्रक्रान्तं यत्प्रसिद्धं यदनुभूतमित्येतदर्थस्य सामर्थ्यादेवाक्षेपसंभवादिति तद्व्याख्यातारः
इदमेवाभिप्रेत्याह हरेस्त्वं भक्त इति येन कारणेन हरेस्त्वं भक्तस्तेनैव कारणेन भक्तत्वेन त्वां त्रायते तेनैव
कारणेन भक्तत्वेनाहमपि भक्त इति मां त्रायते इत्यर्थके येन कारणेन हरेस्त्वं भक्तस्तेनैव कारणेनाह

245

एव

ग्रास्तो मपि भक्त इति प्राचां विवरणे येन त्वं भक्त इति पक्षद्वयेप्यध्याहारस्तेषामप्ययमर्थः किं तु तेन त्रायत इति संबंध इ
त्यनार्थ्यत्वाच्च न पक्षद्वयेपि तन्मनोरमायामुक्तम् यत्तु येन कारणेनेत्यस्य भक्तत्वेनान्वयः अतो भक्त
त्वात्त्वां त्रायत इति संबंध इति तत्तु भक्तत्वे हेत्वाकांक्षाया अभावात् त्राणे आकांक्षितहेत्वर्पकस्याध्य
ध्याहाराच्चायुक्तं तेनेत्यस्य प्राक्तनमर्यादया त्राणे एवान्वयप्रतीतेश्च अत एवैतद्दोषविषये यत्तदोरर्थः
संबंध इत्यालंकारिकाः न च नव त्यत्तेपि सापेक्षविधानादन्वादेशो न स्यादिति वाच्यं किंचिद्विधा
यपश्चादितरविधिरन्वादेशो न तु निरपेक्षत्वगर्भशब्दार्थत्वात् शास्त्रे तथा परिभाषितत्वाच्च अ
त्र तेन हरिस्त्वामित्येकमुदाहरणं त्रायते समाभिव्याहारं पाठांतरं त्रायत इत्यस्य चमध्यमणि
न्यायेन त्रायते चेत्युभयत्रान्वयः एतेन इत्यंते नतु त्रायत इत्यनेन हरिस्त्वामित्यनेनैव ग्राह्योन्वयः
समाभिव्याहृत्वध्याहारः न च वैपरीत्यमस्तु अध्याहारस्यानुपपत्तिमूलकत्वेनोत्तरत्रैव युक्तत्वात्
अध्याहृतस्यागत्या नामंतेनिवेशादिति न्यायेनांते एव निवेशेन श्रूयमाणस्य समानवाक्यस्थत्वा
भावेन वस इति प्रथमांतस्य विद्यमानपूर्वत्वाभावात्कथं द्वितीयमुदाहरणमिति चेन्न परास्तेए
तेन पाठे वाध्यं त्रायत इत्यस्यैव तंत्रेणोभयत्रान्वयांगीकारेण परिभाषितैकवाक्यत्वात्तेनेः संबो
धेने चेत्यतः संबोधन इति वक्तितेसन्यनेनैव त्रिविभक्तं तेन चामंत्र्यतेन न तु केवलया विभक्त्या तादृ
संबोधनस्यादृष्टिः ननु लोके संबोधनविभक्तं तेनैवामंत्रणदर्शनान्महासंज्ञैवनादृशस्यापादेयसति
वार्थ्ये २ विभक्तिमात्रस्य संज्ञित्वे आमंत्रितस्य चेति पाठे आद्युदात्तविधायकेनदंतानाभर्त्समि

पाठांतरं

मानः प्रत्ययग्रहणे तदंतग्रहणमित्यनेन न सिद्धं तदंतसंज्ञायां फलं चिंत्यमित्यन्ये ननु संबोधने प्रथमे
त्यनयोरनुवृत्त्यैव सिद्धे तल्लाभे सेति व्यर्थं। न च हे पचमान इत्यादौ संबोधनस्यानभिधानेन संबोधन
स्य प्रातिपदिकार्थत्वात्प्रातिपदिकार्थसूत्रेण प्रथमायामपि संज्ञार्थं सेति पदं अन्यथानंतरस्येति न्या
यात्संबोधने चेति निहतप्रथमांतस्यैव स्यादिति वाच्यं विभक्तिरहितानां श्वानन्नादीनां द्विर्वचनरहित
लोटर्थकत्रीद्यभिधानमात्रे सामर्थ्येन तत्रापि संबोधने चेत्येव प्रथमास्त्वात् संबोधने चेति शातवि
धायकं तत्र प्रथमासामानाधिकरण्यार्थं लक्षणहेत्वोरितिवत् अत एव तद्धितहितप्रात्रेते संबोधन
विभक्तिरेवेति चेन्न हेहे भो इत्यादीनां कोशे विशिष्य संबोधने प्रोक्तेरुक्तत्वेन तत्र प्रातिपदिकार्थसूत्रे
णैव प्रथमा नान्यत्र तेषां संज्ञार्थं तदावश्यकत्वात् इत्याहुः वैदिककोशे नु यथा एतत्सूत्रव्याख्यानद
र्शनं तु लक्षणप्रमादात् संबोधने या प्रथमेत्यस्य संबोधनविषयेत्यर्थः अविद्यमानवदिति ननु गो
त्रादिष्वित्यत्रैवं वर्तितं विनापि तदर्थलाभे वत्करणं व्यर्थं न च तदभावे निवृत्तिः परश्ययोगो व्यर्थः स्या
दिति वाच्यं लोपः परत्वेऽपरत्वे वा सिद्धे ऽविद्यमानपदत्वे यष्ट्यां पत्तेरिति चेन्न वत्करणसामर्थ्या
न कश्चिदतिदिश्यमानविरुद्धस्याश्रयस्यापि कल्पनात् तेनाम्भो देवदत्तेत्यादावाम एकांतरमामं
त्रितमनंतिके इत्येकांतरत्वप्रयुक्तामंत्रितनिघातनिषेधसिद्धिरिति स्पष्टं भाष्ये इहेति अग्ने नव देवा
स्मान् इत्यत्रादेशाः अग्ने नयेत्यत्र तिङ्ङतिङ इति निघातः अग्न इंद्रेत्यादावामंत्रितस्य चेति निघात इति
विवेकः प्राचीनमिति ननु परं प्रत्यविद्यमानवद्भावेऽपि पूर्वं प्रति तदभावात्कथं रत्तेत्यादितः परत्व

स्या

प्रा शे 246

मस्मकृत्वादीनामिति चेन्न पूर्वशब्देन परस्याक्षेपात् परस्य कार्ये स्वनिमित्तेन्यनिमित्ते वा पूर्वं परं प्रति वावि
द्यमानत्वातिदेशांगीकारात् स्पष्टं चेदं कैयटे परस्य कार्ये इति किम् देवकरोषि आमंत्रिताद्युदात्तत्वे कार्ये
तस्याविद्यमानता माभूत् न चाद्युदात्तत्वविधानं व्यर्थम् अपूर्वत्वे अग्ने तेजस्विन्नित्यादौ निषेधविषयत्व
स्य चारितार्थ्यात् पूर्वं किं पादादिदं च आमंत्रितनिघातो भवत्येव अख्यातिरन्यथाख्यातिरसतिख्याति+
त्वेद्विषाम् नृसिंघाश्रमे ख्यातिर्यात्यनिर्वचनीयमामित्यादौ। नृसिंहाश्रमेत्यस्यामंत्रितत्वेनाविद्यमान त
वत्त्वेपि पूर्वार्धस्थपदात्परत्वेनादेशो भवत्येव वाक्यैकवाक्यतयान्वयेन समानवाक्यस्थत्वानपायात् अत ए
व लक्ष्मीपते ते [illegible] युगं दयितेनेकरिशावकुंभलत्म्यादुत्यादिसिद्धिः यदि तु तत्र पूर्वार्धे अख्यातिरन्यथा
ख्यातिरसतख्यातिस्ते द्विषामित्यत्रास्तीत्यध्याहारात्त्र परिभाषिकैकवाक्यत्वं तदा नृसिंहाश्रमेति पद
द्वयं आश्रमेति विशेषणं एवं च पूर्वस्यनामंत्रित इति अविद्यमानवत्वप्रतिषेधान्नेदोषः स्यात् सर्वेषां।
निघात इति अस्य प्राप्तिरिति शेषः तत्र यमुने सरस्वतीत्यनयोर्बाधकाभावाद्भवत्येव शतद्रीत्यस्य तु नपदा
दिस्थत्वात् तु निभावः एतेनादिम्यः सर्वेषामिति [illegible] बहुवचनेनमसंगतमित्यपास्तम् इत्येते इत्यादि
भ्य इति इत्यादिवर्णेभ्य इत्यर्थः सर्वेषामिति सरस्वतीत्येतानामित्यर्थः शतुद्री शब्दस्य तु न पादा+
दिस्थत्वात् नामंत्रिते ननु सामान्यवचनं विभाषितं विशेषवचने इत्युत्तरसूत्राद्यवत्कृत्स्नेन सामा
न्यवचनमित्यनेन विशेषवचनमित्यर्थकेन संबंधि शब्दत्वादामंत्रित इति सप्तम्यन्तार्थो विशेषवच
नेनैत्याक्षेपे सामानाधिकरण्यस्यार्थलब्धत्वेन समानाधिकरण इति व्यर्थमिति चेत् न अत्येत

समानाधिकरणग्रहणार्थत्वात् । तेन भो देवदत्तेत्यादौ भोशब्दस्याविद्यमानवत्त्वमेव न निषेधः । अत
त्वे एव सामान्यवचनेऽपि निपातत्वाल्लिङ्गादिवाचित्वाभावेन सत्त्वार्थकदेवदत्तपदेनास्य न सामानाधि
करण्याभावात् । अत एवाम्भो देवदत्तेत्यत्रैकान्तरत्वार्थवत्करणमित्यविद्यमानवत्सूत्रस्थभा-
भाष्यं संगच्छते इत्याहुः । अग्नेतेजस्विन्निति । न चानुदात्तं सर्वमपादादावित्यस्यापादपरिसमाप्तेः ।
रधिकारेणाग्नेइत्यस्य च पादादिस्थत्वात्कथमविद्यमानवद्भाव इति वाच्यं अनुदात्तं सर्वमित्यनयोः संबं
धानर्हत्वेन निवृत्तावावश्यकायां तत्साहचर्यादपादादावित्यस्यापि निवृत्तेः । न चैवमपि हरे दया
लो नर इत्यत्र विभाषितं विशेषवचने इत्युत्तरसूत्रेण विकल्पः किन्न स्यादिति वाच्यं भाष्यकृता बहु
वचनमित्यस्यानत्रपूरितत्वात् । आमंत्रिते किमुदेवक रोषि सामान्यवचनं किम् । अग्ने देवि सर
स्वतीरिडे काव्ये इत्यत्राघ्न्यापर्यायेऽपि परेषु निषेधो माभूदिति दिक् । अघ्न्यागोः सुपादिति शोभनौ
पादावस्येति बहुव्रीहिः संख्यासुपूर्वस्येत्यकारलोपः समासान्तः । सुपदेर्ण्यन्तात् क्विब्वा न च द्वि
तीयपक्षे पदादेशो कार्ये णिलोपस्य स्थानिवत्त्वेन स दुर्लभः कौ लुप्तमिति निषेधात् । अत्र च येन
विधिरिति सूत्रस्थभाष्यं मानं निर्दिश्यमानस्येति परिभाषालभ्यार्थमाह तदवयवस्येति अवेः
सुपीति न च सकर्मकत्वात्कर्मणीत्यधिकारबाधे मानाभावात् । निपातनसामर्थ्येन तद्बा-
धात् न च तत्सामर्थ्यात् केवलादेवास्तु भाष्यविरोधात् सुपीति प्रकरणबाधे मानाभावात्
अनिदितां इत् इकार इत्संज्ञकः येषां तद्भिन्नानामित्यर्थः इदमङ्गस्येत्यनुवृत्तस्य विशेषणम्

प्रा॰ प्रौ॰ 247

हल किम् नीयते उपधायां किम् हन्यते ङकार इति अंतरतम्यादिति भावः अंचतेर्भस्येति अंगा
वयवस्य यञादि स्वादि परस्यां च तेरकारस्येत्यर्थः तेन प्रत्यंच मचूतीति प्रत्यगङ् तेन प्रत्यङ्क्त्यादौ ह
वाकारस्य न लोपः अत्राच इति न प्रत्याहारग्रहणम् आतो धातोरित्यारंभात् प्रतीचा पदित्यादि
निर्देशाच्च अत एव पचाद्यचां न ग्रहणम् भस्येति किं प्रत्यंचौ नुमि जातेपि प्रथमनस्य लोपाल्लुप्तन
कारत्वं लुप्तनस्येति किम् ऊर्जायां प्रत्यंचति चौ नेदं वर्गग्रहणम् व्याख्यानात् तदा हल्ङ्यादित्यादि अ
ण इति नन्वेवं कर्तृचो हर्तृच इत्यादौ दीर्घानापत्तिरिति चेन्न अत्राहुः हल इति सूत्रे भाष्यकाराः
यथालक्षणमप्रयुक्ते इति मा भूदत्र दीर्घत्वमिति कैय्यटः नास्त्येवेदृशः प्रयोग इति वार्थः प्रयोग
संभाव्य नत्वेव भाष्ये पदान्तरमप्युक्तं अथवा णग्रहणं निर्वर्त्तमिति अत्र पक्षे भवत्येव दीर्घ इति।
कैय्यटः प्राच इति नन्वं तरंगत्वात्सवर्णदीर्घे प्रागादिवद्भावो नां च तेः सत्यपि कथमत्र लोपः अतो भा
वात् अल्लोपोन इत्यतो यदिति स्य च इत्यत्रानुवर्त्तनेन ज्ञापनान्न दोषः संभावनामात्रेण इति चेन्न पूर्वोत्त
र पदनिमित्तकार्यात्प्राप्तियोग्यविषये नेंद्रस्य परस्येति निषेधेनैकादेशात्प्रवृत्तेर्ज्ञापनान्न दोषः संभावना ना
मात्रेणाकृतव्यूहपरिभाषाप्रवृत्तेश्च ध्वनितेचेदं हल इति सूत्रे भाष्ये इत्याहुः अचतेति न च स्था
निवद्भावेन निमित्तापि विघातः पदचर्मावयवैकत्वेन त्रिवाधात् नयणात्सुपलक्षणं प्राकृ शब्दादौ
सर्वेणां दीर्घस्यापि विधेः चाद्दासवेनान्तरत्वात् कल्प्यते अत एवादसोद्रेः पृथङ्मुत्वमिति वार्त्तिकं सं
गच्छते सामर्थ्यादेव चोपसर्ज्जनेपि प्रवृत्तिः अप्रत्यय इति पाठे अविद्यमानः प्रत्ययः क्विबादिरित्यर्थः

वश्चन्यये इति पाठेऽप्यकारस्याविवक्षितत्वात् सवर्णार्थः ऽश्यादेशा सहस्य सश्यादेशाश्चान्तोदात्तो निपा
त्यत इति सप्तमाकारे अदसः असेरितीकार उच्चारणार्थः असान्तस्येति सान्तभिन्नस्येत्यर्थः असेः कि
म् अदस्येति सान्तग्रहणं चादोऽनुपदेशः इति सूत्रे णकाररेफयोरपि निर्देशो नानेकादेशाभूत सकार।
निवर्त्तकान्तादेशारहितस्योपलक्षणं तेनादः अदो इत्यादौ न दोषः दादिति किम् अमुयोरित्यत्रान्त्यस्य
माभूदिति अत्र उ इति समाहारद्वन्द्वे ऊ इति चिन्त्यं उ ऊ ऊ स इति द्वंद्वे सुलोपे घ्यान्तत्वाद्ध्रस्वस्य पूर्वनिपातेन
पुंसकह्रस्वत्वसवर्णदीर्घत्वयोः प्राप्तयोरन्तरंगत्वाद्ध्रस्वत्वे ततः सवर्णदीर्घे ऊ इति रूपसिद्धेः अत ए
व ऊकाल इत्यत्र उकालू इति निर्दिष्टं तस्माद्दिव उदिति परत्वेन भाव्यमानोकारस्यासवर्णग्राहकत्वात् सि
द्धमिति बोध्यं व्यंजनयोरिति व्यंजनस्य हि ह्रस्वदीर्घप्लुतादेशो दीर्घस्तु विसर्गं शार इति भावः नन्वस्थाना
प्रयत्नाभ्यां तरतमे स्पर्शे इत्याद्युक्तरीत्या व्यंजनेकथमुत्वमिति चेन्न लक्ष्यानुरोधेनात्र स्थानेप
त्वांर्गाकाराग्रत्र चव्रतिलक्ष्यं लक्षणभेदाद्धान्यरेफादिविषयकलक्षणस्याचरितार्थत्वादुत्वं
भवत्येव स्थानेन्तरतम इति सन्निम्पतः के दत्स्वसंगतमेव अतएव नमू सुधियोरिति सूत्रे चरिता
र्थे अन्यथान्तरमे स्थानिनिश्चादेशा इत्यर्थकेन दीर्घाणां यणश्चाप्तेः स्तत्त्वेयर्थ्यस्यष्टमेव अप
रे तु ह्रस्वद्वयपक्षेपमाहुः तत्र पक्षेपान्तरसामर्थ्याद्भवति मूले ह्रस्वपदं च तन्नाति परं ष्यङः सं
प्रसारणमिति सूत्रे भाष्येऽनन्तविकारेन्तसदेशस्येति परिभाषा पठिता अन्तसदेशानंन्यदेशा।
योरेकप्रयोगे युगपत्प्राप्तावन्त्यसदेशस्यैवेति तदर्थः अनन्त्यविकार इति लिंगं लिंगवतीपरि

248

शा॰ शे॰ भाष्ये निःसिद्धान्तात् सामर्थ्येनतत्पनिवृत्त्यातिश्लेनवाधइति अन्यस्य बाधे कार्यो प्राप्ताववर्थे ऽनेकान्तत्व
स्य प्राप्ताविव्यर्थः यत्वत्वलोन्त्यपरिभाषोपनिष्ठेतेन त्रयोन्त्यः सदाल्पवरोनःयोदाल्पवःसोन्त्योनेत्येवा
मंत्यबाधेनतत्समीपस्य भवतीत्यर्थमाहुः तत्रश्लदसन्द्रत्यस्यदकारापेक्षयाऽवयवषष्ठीत्वेनालोन्त्य
परिभाषायास्त्वनुपस्थितेः स्थानषष्ठीहितदुपस्थितौ लिंगं दात्परस्येत्यस्य स्थानषष्ठीत्वेपाल्समु
दायोन्तरत्वाभावः अल्समुदायोन्तरस्थानषष्ठ्याएव तल्लिंगत्वात् ध्वनितं चेदं मिकोगुणवृद्धीमा
दिभाष्येवुमिमाल्लिबतीतिचप्रयोजनं तत्रहिवृद्धेः पूर्वमंतरंगत्वाद्वित्वेपरत्वादभ्यासकार्येऽभ्यासे
कारस्यवृद्धिवारणार्थत्वात् नचवृद्धावभ्यासंहस्वेनसिद्धिः परत्वेनपर्जन्यवल्लक्षणप्रवृत्त्यालक्ष्यल
य क्षणस्येतिन्यायेनपुनरप्रवृत्तेः अंत्यसदेशस्येति अंत्येनसमानोदेशोयस्येतिअर्थः तत्वंचात्या
वर्णतदुच्चारणयोरितराव्यवधानेभवतीतिवोध्यं परस्येवेति इष्टावृत्स्येवेत्यर्थः यत्रतुनप्रसारणर
तिसूत्रेनेतस्याःपरिभाषायाःसंतिप्रयोजनानीतिभाष्येउक्तं तत्तुपकृतसूत्रस्थवार्तिकप्रामाण्या
देतदुभयातिरिक्तप्रयोजनाभावपरमित्याहुः अःसेविति अत्राकारेणाकारस्यापिग्रहणम् तेना
मृद्गित्यादिसिद्धिः तत्रस्यासर्वनाम्नइति पूर्वपदात्तस्याल्वं त्यदाद्युत्वेति त्यदादीनामत्वविधिपरः
त्यर्थः पदेरिति अत्रतत्रेणार्थद्वयपिसूत्रनाम्यर्थे अत्वलस्यानुरोधात्क्वचित् लस्येत्राद्यएववो
स चिदंतस्यैवक्वचिदुभयमितिवोध्यं अत्रचप्रमाणं वार्तिकमिति तदुपन्यस्यति उक्तंचेति अदसो
द्रेरिति अत्रकेचित् अदसोऽद्रेःपृथग्मुत्वमितिपृथग्वाक्यं तेनकदाचित्परस्यैतेनामुद्र्युङित्य
त्यपीत्याहुः तत्रभाष्याद्यननुक्तत्वात् केचिदंत्यसदेशस्येत्यस्यवैयर्थ्यापत्तेश्च तत्त्ववादिति च

वलीकल्प्यते इत्यत्र यथा लत्वं रीङ्कारयोर्भवति तथेत्यर्थः पाठेतरं अनेन त्वविकारद्वयस्य प्रयोजनना।
भावेन भाष्ये प्रत्याख्यानात् मिमार्जिषतीत्यादौ वृद्धेः पूर्वमन्तरंगत्वाद्धित्वे परत्वादभ्यासकार्ये न तोऽभ्यासे
कारस्यापि चङ्गोलत्वे लत्वं लक्षणस्येति न्यायानित्यत्वेन तु न रभ्यासम्भवप्रवृत्त्यानदोष इति भावः एकप्रयो
जनार्थमेव परिभाषास्वीकारस्तेषामिति भावः नेतस्याः सातिप्रयोजनानानीति न संप्रसारणइति।
सूत्रस्य भाष्ये त्वनेकप्रयोजनाभावपरं सर्वे समेन प्रयोजनाभावपरं वाध्यं इत्येतं विष्णुदेवयोः किमि
ति चस्याप्युपलक्षणमिदं तच्च नयन्नाह अचाचीति ननूत्तरपदाधिकारात् संचूर्णे उत्तरपदे इत्य
र्थात् छिष्ठगं वचनमित्यादेर्व्याख्यातो ऽर्थे न प्रत्ययग्रहणमत आह प्रत्ययेति तेनेति अन्यथा तः करु
त्यत्र निंत्ये समासे इत्यतो नुवृत्त समासग्रहणेनोत्तरपदाक्षेपे पि कृधातुरूपे उत्तरपदे इत्यर्थापत्त्याव
यस्क तदित्यादावेव स्यादिति भावः न च कावित्यत्र वत्कृत्ये प्रत्ययग्रहणं व्यर्थम् न च विचूसंग्रहार्थं
अचूः क्विनावाधे पि चोनुत्पन्नेरिति चेन्न सुप्युपपदे क्विनावाधे पि केवलादि विचिविघगादिभिः षष्ठीस
मासे प्रादेशार्थे तत्सत्वात् इदमेवाप्रत्ययग्रहणं ज्ञापयति अस्मन्येभ्योपि दृश्यन्त इत्यत्र विचोपि संबंध
ती इत्याहुः तन्न समः समीति सूत्रे किमर्थमंचति न स्यादि युक्तिग्रहणं क्रियत इति भाष्यदर्शनेन विच
स्या प्रवृत्तेरित्याहुः तत्रैव शकरणं तरेणापि क्विप्ग्रहणं किं वत एव भविष्यतीति भाष्ये क्विपग्रह।
णस्य क्विनुपलक्षणतायाश्चावश्यकत्वेन विजुपलक्षणत्वे पि वाधकाभाव इति पदे उदर्ईत्तस्य च
इत्यस्यापवादः तस्यात्रानुवृत्तेः समः सिमि न तु समो भिडिन्येव सूत्र्यतां समइगितिचेतिचे

प्रा० शे०

249

न्वचिंत्यमेवैतत् परिभाषाज्ञानगौरवपरिहारायेतत्थोक्तमित्यन्ये निरस्तः अलोपस्तत्र सर्वधादिप
रस्वेणाकारः प्रश्लिष्यते अस्य अलोपो लोपाभावो व्यक्तिं न चताविति बहुव्रीहिस्तदाह अलुप्ताकारे
ति निरस्तः अलोप इति बहुव्रीहिः अनुवर्तमानमंचतावित्यस्य पदार्थबोधकम् संपूर्णांचतिलो
पस्याप्रसिद्धत्वादव्यवहारको लोपः समुदायउपचर्यते तदाह अलुप्ताकारे इति ननु यत्र पूजा
र्थेन स्यापि लोपाभावस्तत्रैवेदं स्यात् नह्यत्र लोपप्राप्ते नालोप एव ग्राह्योनन लोप इत्यत्र अमाण
मस्ति किं चानंतरत्वाद्निर्दिष्टमित्यस्यैव लोपप्राप्तेस्तद्ग्रहणमुचितं अपि चांचताणोलोसंपूर्णांचतेर्लो
पस्याप्रसिद्धत्वादुपचारे प्रमाणाभाव इति चेन्न निरस्तश्चायं चताविति अचितावित्यनुवर्तमाने
पुनस्तत्सामर्थ्यादूपविवक्षायोपपत्तौ तत्सामर्थ्यान्नलोपस्यात्राग्रहणात् एवं चानंतरस्येति
न्यायादंचत्यन्नलोपस्यैव लोपग्रहणे न ग्रहणमिति अप्राख्यानमिति चितियोद्धोभवत्येवेत्याहुः
अकारलोपसत्तीति तन्न व्याख्यानं चाविति अवसिद्धे लोप इत्यस्यैवयथार्थापत्तेरित्यलम् निरस्त+
ति अनुवर्तलोपस्यस्थानिवत्त्वं तु न पूर्वत्रासिद्धीये इति निषेधात्पदांतविधित्वाच्च पूजार्थस्येति
पूजारूपार्थस्यगम्यत्वे इति शेषः अतएवांचोन पदान इति सूत्रे अव्याकुलं गच्छतीत्यर्थेऽर्चितं
गच्छतीति प्रयोगे नलोपाकरणं संगच्छते अव्याकुलत्वेन च पूजा गम्यते न त्वंचतेरेवसोर्थः+
इति कैयटः एवं चांचतेः पूजार्थत्वे पूजाप्रयोजकार्थकत्वे च न लोपो न एवं प्रकृष्टं गच्छतीत्य
र्थक प्रांच प्राप्ते उपसर्गाणां द्योतकत्वेनांचतेः पूजाप्रयोजकप्रकर्षार्थत्वान्न भवत्येव नलोपः

यस्तु चिरंतनैः पुरुष्टः प्रांच भाष्यकारस्य भवन्त्येव अतएवांचेर्गतावित्ति नियामकसूत्रे नैवेष्टसिद्धौ नां
चेः पूजायामिति वार्तिकमिति परास्तं निषेधफलमाह नलोपेनेति प्रांच इति प्रासादे नकारस्य व
र्णमपि फलं बोध्यं नलोपाभाव इति कुंच धातुविषयेऽनिदितामिति सूत्राप्रवृत्तिर्ज्ञाप्यत इति
भावः अतएव कुंच्यादित्यादावाशीर्लिङ्यपि नलोपो न अतएव परेऽप्यां + रिति सूत्रे भाष्ये कुं
चेन्यचोः कुंर्मलीतिकुले प्राञ्जोतिस उ ईति वचनान्न भवति सनः सकारमारभ्य महिङ्यङोऽ ङकारेण
ण + मङिति प्रत्याहारः एतदपि नास्ति प्रयोजनं कृत्विगादि सूत्रे कुंचामिति निपातनात्सिद्धि
मित्युक्तं संगच्छते तेन ह्योपदेशिकोऽत्र नकार इति लभ्यते अन्यथा नकारस्यानुस्वारे परसवर्णे ञा
ते नयोरसिद्धत्वाच्चोः कुरित्यस्य प्राप्तेरभावेन भाष्यासंगतिः स्पष्टैव एवं च नलोपाभावः
स्पष्ट एव लभ्यते नचात्र नकारस्यौपदेशिकत्वे ङकारोच्चारणसामर्थ्यादेव कुत्वस्य वारयितुं। एवकत्वे
प्राकृत्वेन न तथापि भाष्यासंगतिरिति वाच्यं उपायस्योपायांतरादूषकत्वात् कुङित्यादावपि
कुत्वापत्तेश्च मममन्तु निर्देशेन च योगे कुत्वाभावनिपातनान्न दोषः नच मूलकृतापि तथैव कुतो नोक्त
मिति वाच्यं कुत्वनिवृत्त्यर्थेन निपातनस्यावश्यापश्रयणीयत्वेन नांचेः पूजायामित्यादि मूलकनकारस्या
वश्यानुस्वारपंचमौ हलधातुष्विति वक्ष्योक्तत्यागे मानाभावेन चेयमेव सरणिरादर्तेति दिक्। क्रुं
चेर्निरुपपदाद्देवान्चिकिन्नित्यपि निपातनबलल्लभ्यं प्रत्निसाहचर्यान्तरस्माद्ः षत्वं स्कोरिति नीति पा
ठक्रमादार्थक्रमस्य बलवत्त्वात्सलोपे कृते षत्वमिति बोध्यं सलोपं प्रति षत्वस्यासिद्धत्वात्

शा॰ शे॰

अत एव षत्वे इति सत्रसंतं नकारांतं स्वरूपं स्त्वितिबोध्यः क्विपि ग्रहिज्येति संप्रसारणे पूर्वत्वे श्चुत्वस्यासिद्ध
त्वाल्लोपः चर्त्वस्यासिद्धत्वाद्दुः सीतिवाध्रुः नि पात्यंत इति अनिशब्दयेनुवर्त्तमान इति शेषः तत्र पूर्वसू
त्रेणैव गुणाभावः गमेर्ड्जिगादेशः महेः कर्मणि शब्दत्ययो निपातनात् शान्तवर्ज्जं दीर्घामिति शान्तपदेन शा
न्तशब्दयोतं गृहीत्वा तेन प्रत्ययग्रहणपरिभाषयेतिभावः तेन शान्तप्रत्ययान्तप्रयुक्तकार्यमिति दिश्यते अ
त्रत्तीयोनाद्युतिः एषामिति संबंधसामान्ये षष्ठी अत एव महतीन रेफादौ उगि न श्वेति द्रू सुविक।
ल्पः नचैवं शान्तस्य नुम इति सूत्रे वृहन्महतोरुपसंख्यानमिति वार्त्तिकवैयर्थ्यापत्तिः पूर्वदाद्विव्या
श्रात्यर्थं नियमार्थत्वेन चारितार्थ्यात् पञ्चषश्यामाद्युतिः तेन शान्तप्रत्ययान्तस्य यत्कार्यं तदुक्तं द्विप
त्तन ततः परस्य + तेन महतीन रेफादौ उगि न श्वेति द्रू सुविकल्पो नेति तत्रैवेति + तित्र वचनेऽप
मेये षष्ठ्यदर्शनात् इत्याहुः अन्यसे नच स्वत्वर्थेऽस्त्वनुः इति लुप्त षष्ठीकं पृथक्कार्यं एवं चाधातोरित्य
संतस्येव विशेषणं व्याख्यानाद्यदाह धातुभिन्नेति तदर्थे तान्यर्थग्राहकं नुडगिदचामिति सूत्रस्य
गोमन्यतेर प्रत्ययः गोमानितिभाष्ये अंगविशेषणतयाऽर्थसिद्ध तदं तविधेरेवानुवादकमतत्ग्रहणं
परमिति नचनिरवकाशत्वेन कथं परत्वोक्तिरिति वाच्यं पाठांतरं वचनसामर्थ्याद्धुपधापदासं
बंधेन चारितार्थ्यादितिभावः इत्यंतं वचनसामर्थ्येननुमुणाम्य वाधापेक्षया गुणभूता अच्परिभा
षावाधनेन व्यंजनेन चारितार्थ्यादितिभावः स्पष्टाचेयं रीतिः पादः पदिति सूत्रे भाष्ये केवटयोः
नित्यमिति सूत्रतादृशप्रसंगित मात्रेणोत्तरार्थः सामर्थ्यादिति नुमिहिग्रस्य रूपान्वेतोपधायाश्च +
सिद्धेरितिभावः + संज्ञान विरोधन्यायेन नुमः पूर्वं प्रवान्तरेव कल्पनादि नच सामर्थ्यं तञ्जन स्ये

वदीर्घोस्त्विति वाच्यं अचश्च स्थानेन्तरतमपरिभाषयोर्द्वयोर्बाधापत्तेः दीर्घोन्तरं प्रवृत्त्यानुमृ शास्त्रस्य
सर्वथाबाधाभावाच्च गोमानित्यादिभाष्यविरोधाच्च धीमानिति नचैकानुबंधकपरिभाषया मन्नुपो+
त्राग्रहणम् नचासंभवः अव्युत्पत्तिपक्षेभवन्नु शब्दस्य संभवात् सर्वादिगणे ह्यनुनासिकोका
रोविशिष्टमेव पठ्यतेऽतिवाच्यं यकारादेः समुदायानुबंधत्वेप्यनोर्धानुबंधत्वाभावात् +अवय
वानांतांनरीयकतया समुदायोपदेश एव ज्ञापितात्पर्यमित्यर्थे स्यादेव उपदेश इति सूत्रस्य भाष्य
संमतत्वेन यदुपदेशः प्रयुक्तायस्येति संज्ञा तस्य तदनुबंधतायाएव स्वीकारात् +पाठांतरे+ अनुना
सिकोकारसमभिव्याहृताकच्छ्रांतस्य दीर्घ इति सूत्रार्थः नन्वत्र धातुत्वात्कथं न्नुमत आह अथानो+
रितित्विति अत्र पठ्ठतां वांतदुगिदचामिति सूत्र एवोक्तम् काचात्लेऽज्ञोपानस्यानिवन्तचौलुप्तत्वा
त् ननु हे इत्यनुवृत्त्यैव सिद्धे उभेग्रहणं व्यर्थम् नचहे इत्यस्य विधेयसमर्पकस्य कथमनुवाद्यलं
पूर्वोभ्यास इत्यत्र पूर्वशब्दस्य साकांक्षितत्वेन हे इत्यस्य तत्रानुवाद्यतायाः स्पष्टत्वात् पूर्वइतिन
नावर्त्तते योगविभागस्य संज्ञांतरकरणस्य च वैयर्थ्यापत्तेरितिचेन्न संहितयोः संज्ञेत्यर्थेलाभा
र्थंतत्सत्वात् अन्यथा व्यासङ्गः शानेभोन्यं नामितिवत्प्रत्येकं वा समपरिसमाप्त्या प्रत्येकं संज्ञापत्तेः
तथाहि सति नेनिज्ञतां त्यत्राभ्यस्तानामनिति श्नाद्योलसार्वधातुके परे आदिरुदात्त इत्यर्थकाभ्य
स्तानामाद्युदात्त इत्यस्य प्रत्येकं पर्यायेणवा प्रवृत्तिः स्यात् उभेग्रहणात्वत्र समुदाये वाक्यपरिसमा
प्तिस्तदाह उभे समुदिते इति समुदायश्च द्वयोः श्रूयमाणत्वएवभवतीत्यतो ह्यादिषाद्दानामकाप

इत्यंत

251

धा० पो० येऽप्यवर्त्तेष्व समाधानांतरमौनं कर्त्तव्यमिति ग्रंथेन तदाह उभे समुदिते इति पैत्सेनित्यादौ रेत्सेऽस्मि
इति स्थिते एकादेशोऽनुसोपवादस्य संभावनया पूर्वमति भावाप वृत्तेऽप्येकादेशकृते पाठांतरं तन्न
सनचयत्वादेशोप हले पूर्वे समुदाये प्रवृत्त संज्ञायाः स्थानिवद्भावेनभ्यासलोपेपि सलभेत्तिवाच्यंल
त्वानुसारेणात्र कार्यकालपक्षस्यैवांगीकारात् तूयत्वभ्यस्तमिति महासंज्ञाबलात्समुदायेवाक्यप
रिसमाप्ति श्वाश्रूयमाणयोः साहित्ययोरेव संज्ञान्यर्थसिद्धावुभेग्रहणं व्यर्थमिति तन्न अन्तरमर्थदया।
तदर्थालाभात् अनेकोच्चारणेनाप्रोपित हि षष्ठ्यभ्यस्तोऽनु वाक इत्यादि प्रयोगदर्शनात् नच पंचमी
समासाश्रयणादेकादेशस्य स्थानिवद्भावेन व्यवधानात्रज्ञसिति वाच्यं पंचसमासस्याचः परस्मि
न्निति सूत्रे भाष्ये प्रत्याख्यानात् किंच तदंगीकारे प्रत्यैषि विष्णुरित्यादौ नुसोऽप्रसंगः अत्र त्वं भाष्ये प्रौ
ढोक्तिरिति दिक् पाठां।। अग्रिम पाठस्तु नास्ति सत्वेयथा कथंचिद्योजनीयं इत्यंत नुसोवारणाय पञ्चभेश्च
पेक्ष्यूये तेत्र सज्ञार्थेन सत्वात् पंचमीसमासस्तु प्रत्याख्यातएवेति स्थानिवद्भावेन व्यवधानान्नु
सोऽप्रवृत्तिरिति वाच्यं ररिसमाप्तिन्यायस्यैवाश्रयणेन मिलितयोरेवैषा संज्ञा ध्वनितं चेदं भाष्ये पंच
मी समासेन वेत्सेति साधमित्युभेग्रहणस्यैव सहार्थत्वमुक्त्वा पुनः समुदायेवाक्य परिस
माप्तिन्यायाश्रयेण सहग्रहणं ×अभ्यस्तमिति महासंज्ञाकरणेन समुदायेवाक्य उभेऽभ्यस्त
नवर्ज्जंवं श्रूयमाणे इति निष्कर्षः समुदिते इत्यनुक्तोऽनुं किं चैवं प्रत्यैषि विष्णुरित्यादौ नुसभावानापत्तिः × नित्वाऽनी
त्यत्राभ्यस्तानामनित्यजौ दौल सार्वधातुके परेऽग्रादिकृदात्त इत्यर्थकाभ्यस्तानामादिरुदात्त इ

त्निषत्वेकं पर्यायेणवास्यात् नाभ्यस्ता वहुयोगव्यवच्छिन्नोपिनुमिहानुवर्त्तेनेसामर्थ्यात्तदाहनुम्प्रेति
दाजः शतरि शप्यः श्लोश्लुँविति द्विर्वेऽभ्यासकृस्यत्वं स्याभ्यस्तयोरित्यालोपे ददतीति जहतीति जक्षइति
प्रथ्यकादं यूनिन्यादिये वामिन्यनञ्ञ्रुणसंविज्ञानोवहुव्रीहिः इतिनाज्ञप्तिः परस्मैपदे आदिशाः इः पू
वेदन्निवाचीतदाह एवधनवोन्येइति परस्मैपदमिति स्पष्टंचेदं धीवेवीटामितिसूत्रेभाष्ये गुपितिक्षि
पार्धधातुकेविवक्षितेनैवैकल्पिकत्वादायाभावः गोपायतीतिविग्रह त्यदादिषु आलोचनमिहज्ञा
नमात्रंतदाह अज्ञानार्थादिति कञ्जितादृशारत्यादिरामवत् आस दृग्दृशावत्तुषिति सूत्रमनुवर्त्तते
अकारादेशोसतिहिअतोगुणेस्यात् नादृशिति सदृवायं पश्यतिज्ञानविषयोभवतीत्यर्थे कर्त्रयं प्रत्य
यः फलमात्रार्थकत्वेपितदनुकूलव्यापारार्थकत्वाभावादज्ञानार्थत्वं अत्रपक्षेकर्मण्युपपदेइत्या
धिकारस्याथआपद्यते भाष्येतुतमिवात्मानंपश्यतिदर्शयतीत्यध्यारोपितप्रेषणपक्षेपिद्युत्यन्निर्देशा+
त्ततत्राधिकार्थेत्वादज्ञानार्थत्वंबोध्यम् अनालोचनेकिम् तमिवेमंपश्यतीत्यर्थेकर्मण्यण् अज्ञाना
र्थादित्यस्यचविषयीकरणानुकूलव्यापारार्थकमित्रादित्यर्थः अन्येतुतादृशादीनांरूढिशब्दत्वा
दसतापव्यवयवार्थेनव्युत्पादनमित्यज्ञानार्थादित्यस्यसंगतिमाहुः षत्वादिति षत्वंज्ञसत्वस्यापु
पलक्षणंअतएवकैयटेषत्वापवादत्वादित्युक्तं तादृशात्क्षिक्विनेनविषयंलक्षणं(मे)चावितार्थमि+
तितद्भावः एकारइति अघोषमहाप्राणेशानुत्पत्त्यादितिभावः कैयटेति किन्त्वन्त्यस्यकुरितिस
त्रेइतिशेषः अत्रारुचिवीजंतुकुत्वस्यसावकाशत्वेनापवादत्वाभावात् नचतादृशादिक्वित्वेनविष

शा॰ शे॰ यकं लक्षणमचरितार्थम् जातिपक्षेऽचरितार्थासंभवात् प्रकारांतरेणापि सिद्ध इत्यादिक् नगिनि
षड्गकाः शार्ङ्गवत् नडिति कुत्वाभावषत्वे जश्त्वे च पाक्षिकं चर्त्वम् नड्भ्यामिति मस्जिनशोरिति नुम्स्तु
नः धातुप्रत्ययेत्यद्विधानात् स्पृशोनु अनुदके किम् उदकस्पृशः निषेधसामर्थ्यादिह क्विन्विधेन बहु।
व्रीह्याश्रयणेन क्वि प्रत्ययेऽपि कुत्वस्य सत्वेनानुदकस्य स्पृशैव्यर्थापत्तेः धातोरेकाच्त्वात्स्वरेन विशेषः अं
तोदात्तत्वमिति नित्वादाद्युदात्तत्वेप्राप्ते इतिबोध्यं कुत्वात्पूर्वमिति कुत्वस्य जश्त्वं प्रत्यासिद्धत्वादिति भावः
गोणत्वेति ति यथात्र नलुकु नुडंतत्वात् प्राक् वीरुत्सिधानेरित्यतो धातोरित्यनुवर्त्तते तर्हि वर्णाभ्यंवि ल्मा
णोच्यते पिपठिषतेः क्विपि अतोलोपेन नः प्रातिपदिकत्वात्सो सोर्हल्ङ्यादिलोपे प्रत्ययलक्षणेन पदां
तत्वात् रुत्वे ऽल्लोपो नस्थानिवत् पूर्वत्रासिद्धे नत्रिषेधात् नुम्विसः इहदृश्यकोरिति वृत्ते तत्रव्यव
धानेऽप्राप्तावस्यारंभः अवायशब्दस्य प्रत्येकं संबंधात् निंसेः प्रतिषेधोवक्तव्य इति वार्त्तिकप्रत्याख्या
नपरभाष्यप्रामाण्यादाह प्रत्येकमिति अतएव प्रात्वादेव सिद्धे विसर्जनीयग्रहणं साध्येकं तर्हि
प्रत्येकं वाक्यत्रपवोधनायेत्याहुः व्यवधानेपीति अपिनाऽव्यवधान इत्यर्थः कृत्वेनेति वाशरीति
कृतस्य विसर्गस्थानिकसस्येत्यर्थः आदेशप्रत्यययोरिति तुन अपदांतस्येति निषेधात् निंस्वो।
ति धातोः सस्यत्वेनेन न षत्वम् नुम्विसर्जनीयेत्यस्य लाघवादधिकारत्वेनादेशप्रत्ययत्वाभावात्
नुम्स्थानिकेति उपलक्षणत्वेप्रमाणं च निंसेः प्रतिषेधोवक्तव्य इतिवार्त्तिकं व्यवधानाश्रयेण तस्य
त्याख्यानपरं भाष्यं च नुम्स्थानिकत्वांशे हयवरट्सूत्रस्थभाष्यमितिदिक् व्याख्यानादिति अं

संभवादिति हृदन्तोक्तिनादन्तेव्यस्तुहित्स्य त्वादौ संभवादिति भावः अत्र सग्रहणेनैव सिद्धे अरिति
प्रत्याहारग्रहणे फलं चिंत्यं संयोगान्तलोप इति वत्वस्यासिद्धत्वादिति क्वाचित्कोऽपपाठः अफलत्वा
त् न च पूर्वं पूर्वमन्तरंगमिति पत्वेऽल्लोपस्यासिद्धत्वात्कथं संयोगान्तलोपः वृद्धिर्भूतसुप्निमित्त
कपदसंज्ञापेक्षत्वेन बद्धपेक्षितत्वादस्यापि बहिरंगत्वात् पूर्वं पूर्वमन्तरंगमिति पेक्षयाऽल्लोपेक्ष न
मन्तरंगमित्यर्थस्य प्रबलतायाः पूर्वं पूर्वमन्तरंगमित्यपूर्वनिमित्तकमन्तरंगमित्यर्थस्यैव पूर्वमुक्त
त्वाच्च समानकालप्राप्तिकविषयतायाश्च पूर्वमुक्तत्वान्न दोषः संयोगादिलोपस्य तु न शसंक्तिः कत्व
स्यासिद्धत्वात्स्यल्लोपस्य स्थानिवत्वाच्च संयोगान्तलोपविषयेऽकृतव्यूहपरिभाषया पूर्वं संनिमित्त
कत्वात् अत आह अत्रेति अन्तरंगपरिभाषा तु नेन तद्विषये न दपवादत्वादकृतव्यूहत्वस्यात् इति वृ +
ध्यं कलोप इति पदान्तसंयोगादिलोपस्य संयोगान्तलोपापवादत्वादिति भावः तदिति तल्लो
तेः क्विपूर्णएतनाभ्यामिति न च परेश्च घांकयोरिति सूत्रे काष्ठशागेव नास्ति कुतः काष्ठशक्ष्यातेति
भाष्यप्रामाण्यादेतादृशोऽपि क्विवेव दुर्लभ इति वाच्यं काष्ठशक्ष्यातेत्यत्र झल्परसंयोगादित्वेन लो
पमाशंक्य तल्लोपस्य प्रवृत्तत्वेनाणिजन्तविषय एव न दंगीकारात् न हि णिजन्ते तत्प्राप्तिरस्ति
णिलोपस्य स्थानिवत्वात् तस्य दोष इति यत्तु कौलुप्तमिति स्थानिवत्वनिषेधादुर्वारः अत एव।
मधुश्चुतमाचष्टे मधुगिति रूपं नेति स्वरितो वेति सूत्रस्य कैयटः संगच्छते अन्यथा णिलोपस्य
स्थानिवत्वात्संयोगादिलोपो दुर्लभः न च सकारो पदस्य सामर्थ्यात्स इति कैयटाशयः सन्नस्ता।

धृ० शे०

ननीत्यत्र लुग्व्यावृत्त्यर्थं तस्य चारितार्थ्यात् किं च संयोगान्तलोपेपि तस्य कृत्वे र्वोरिति दीर्घमधूरिति नुप्रसि
द्ध्यर्थं न स्याद्व्यपकत्वाद्वेतिनन्त्रतस्यात्राश्रयलोपे इत्तरप्रमाणाभावेन नपदान्तस्येत्येतन्नसपतेस्त्वमिति
कैयटविरोधेन च न तस्य कैयटस्य प्रौढिवादपरत्वात् क्षीलुभमित्यत्र हस्वात्रिपादीस्थासिद्धत्वे
ननु चकृत्येस्याप्रवृत्तेश्च संयोगान्तलोपएवेति यत्तचः परस्मिन्निति सूत्रेअपरविधाविति नुवक्त
व्यस्य विधौ स्थानिवद्भावाय यास्यात् नन दध्यत्रेत्यत्र न संयोगान्तलोप इति भाष्यमुपादाय पूर्वत्रा
सिद्धे इत्येतदत्र नास्ति तस्य दोष इत्यत्र संयोगोपलक्षितलोपोपलक्षणार्थत्वात् संयोगादिग्रहणस्य
त्युक्तं कैयटेन एवं च संयोगान्तलोपोपि तुर्लभ इति तत्र पूर्वे पदस्या शायवर्णेनमात्रपरत्वेन कैयटस्य प्रौ
ढिवादपरत्वात् अतएव हलङ्याब्भ्य इति सूत्रे यास्तस्येत्यत्र तकारप्रश्लेषपक्षे कीर्त्ते इति संयो
गान्तलोपापादन परं भाष्यं संगच्छते संयोगान्तलोपः पिपठिति कृत्वस्यासिद्धत्वादिति क्वाचित्कोप
पाठः सनोत्लोपस्यस्थानिवद्भावेनापि स्कोरितिलोपवारणासंभवात् दिधमिति दादेरितिघः एकाच
इतिभष्भावः विद्वानिति विदः शतुर्वसाविदादित्वाच्च यो लुकि शतरि ङित्वाद्गुणाभावे उगित्वान्नुमि सान्त
निदीर्घे संयोगान्तलोपस्यासिद्धत्वान्न लोपो न वसोः प्रत्ययग्रहणेन तदन्तग्रहणं भस्येत्यधिकृत्य तन्न
दाह वस्वन्तस्येत्यादि वसन्तं भस्य न प्रग्रहणं प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणात् न चैकान
नुबंधकपरिभाषया विदेः शतुर्वसुरित्यस्यैव ग्रहणं स्यात् न कसोरितिनिर्वाच्यं वसोस्सकारानुबंधक
रणस्य कसामान्यग्रहणार्थत्वात् अदोषः उगित्वं स्थानिवद्भावेनापि सिद्धं ङित्ववन्निति विदः।

पाठांतरं

ज्ञफलनियोगिकैश्वर्यवाचकत्वं नदोहे तत्कर्तृकयज्ञस्येति यज्ञसंयोगइत्यस्य यज्ञफलप्रतियोगि
कमाधिपत्यं चेत्पतिशब्दो ब्रवीतीत्यर्थ इति भावः यज्ञपदेन यज्ञफलं लक्ष्यते संयोगपदं च करणव्युत्प
त्त्या तत्संबंधैश्वर्यपरम् सत्तामात्रार्थोवाचकत्वं पतिशब्देऽन्वेतीति बोध्यं उक्तरीत्या तु शब्दाधिकाराश्रय
णाभित्यपि शब्दमात्रग्रहणं यज्ञसंयोगइति च न संबध्यते अत एव ग्रहस्य पतिः गृहपत्नीत्यादिनउ
दाहरणं विभाषा सहशब्दो विद्यमानवाची पूर्वशब्दोऽवयववाची तुल्ययोगवाची सहशब्दस्तु न
पूर्वस्य नकारादेशप्रसंगात् पूर्वशब्दोऽव्यवस्थावाचीन वा कोऽपि प्रसंगात् एवं च सह विद्यमानः
पूर्वोऽवयवो यस्मिन्प्रातिपदिके तस्येति विग्रहः तत्र केवलपतिसदृशस्य विद्यमानपूर्वावयवकत्वा
भावात्पतिशब्देन तदंतं गृह्यते स्पष्टं चेदं भाष्ये यदि तु यकाररूप एवावयवः पूर्वशब्देन गृह्येत
तर्हि सपूर्वविशेषणं व्यर्थं स्यात् तदाह पतिशब्दांतस्येत्यादि नयन्तु इति सपूर्वस्येत्यस्यानेन नयत्व
तस्य गृह्यमाणत्वादिति भावः स्पष्टं चेदमत्रैव भाष्ये बहुव्रीहावपीति बहुव्रीहिपदमुपसर्जनोपल।
क्षणं तेन यतिमति क्रीताऽ इति पत्नीत्यपि सिध्यति व्यस्तेइति ननु वृषलपत्नीति षष्ठी तत्पुरुषेऽपि अ
नुपपत्तिसत्वाद्व्यस्तेइति विशिष्योपादानं व्यर्थं इति चेन्न विभाषासपूर्वस्येत्येव सिद्धेरित्याशयात्
कथमिति सपूर्वत्वाभावात् वृषलत्वेन यज्ञसंयोगाभावाच्च उपचारादिति अग्निसाक्षिकपाणिग्रह
णाश्रयादिति भावः यद्वा चारित्रवत्तादिति दिति तु चिंत्य पाठांतरं नचैवं संयोगग्रहणं व्यर्थं वृषलस्य
पतिः स्त्रीशयोगसाधनार्थं चारितार्थ्यात् स्पष्टं चेदं यत्तु नेइति तत्र भाष्ये सपूर्वस्य किमिति अव

ग्रा· श्लो·

यववाची पूर्वशब्दः किमर्थं इति प्रश्नः गवां पतिरिति गवां स्वामिनीत्यर्थः नित्यं स आरंभसामर्थ्यान्नि
त्यत्वे सिद्धे नित्यग्रहणं स्पष्टार्थं निपात्यते इति समानादिगणस्यैव पाठे पि विशिष्टोच्चारणादिति भा
वः एतेन विशिष्टपाठस्य सामर्थ्यात् सपत्नीयाचिके त्यादौ पुंवद्भावो नेति परास्तं सभावार्थं समुदायो
च्चारणस्य सार्थक्यात् समानस्वामिकत्वं पाठांतरं समानादिगणस्यैव पाठे पि विशिष्टोच्चारणस्य
सार्थक्यात् समानस्य छंदसीति समानस्येति योगविभागबोधनद्वारा बोध्यत इत्यर्थः अत एव सपत्न इ
त्यादिसिद्धिः सपत्निर्दास इत्यस्य च सिद्धिः सहस्य स इत्यत उदात्तगुणविशिष्टसादेशस्यैव तत्रानुवृत्ते
सपत्नीशब्दस्याद्युदात्तमेवं सति सिध्यति अन्यथा तदप्यत्र निपात्यं स्यादिति गौरवं समानशब्दोत्राभि
न्नवाची समानस्वामिकत्वं इत्यंते प्रवृत्तिनिमित्तीकृतस्त्रीविशेषस्वरूपबोधनार्थत्वात् अत एव।
समान स्वामिकभूम्यादौ सपत्निर्भूमिरित्येव पाठांतरं समानत्वं चैकस्य तत्तत्पत्नीसंबंधेन भेदमारोप्य
बोध्यं मुख्यसादृश्यवत्यतिकास्तु न तथा प्रयोगः इदमपि त्रुटिफलम् इत्यंते एतेन सपत्न्यादिषि
त्येव सिद्धे सूत्रे नकारङीपोरुच्चारणं व्यर्थमित्यपास्तमित्याहुः ननु समानवाचिसहशब्देनैव समा
सोस्तु तस्य सादेशो वोपसर्जनस्येत्येव सिद्धः समानशब्देनत्वर्थकथनमात्रं गणेपि सहशब्द ए
व पाठ्य इति चेत्र समानशब्देन समासे समानपत्नी समानपतिरित्यापत्तेः समानशब्दश्चायमेव पर्यो
यः कथंचित् भेदमारोप्य इत्थं पर्याय एव वा सभावः सहस्य सः संज्ञायां समानस्य छंदसीत्यादि।
भिर्विहितत्वं छंदो रूपनिमित्तत्वैकल्याद अत्रास्त्रोनि पात्यते अत एव सपत्निर्दास इत्यादावपि सभावः ध

पाठांतरं अत्रापि यत्न संयोग इत्यनुवर्त्तन इति वार्त्तिकोदासपूर्वस्य दासकं छंदसीति
गणोक्तेर्भवति अत एवेदं चरितार्थं अन्यथा विभाषेत्यनेनैव सिद्धे एतद्वैयर्थ्यं स्य
दिमेवछंदस्यापायस्तु पाभावात् अनुवृत्तिवादिनां तु नद प्रवृत्त्या चरितार्थ्यं स्यात्
मेव अतभ्रात्रादिदास्यां भ्रान्तपत्नीत्यादिर्न व्यवहार इति दिक्

शाल्वेसु इति सूत्रे अकारउच्चारणार्थ इत्यपास्तं निरनुबंधकपरिभाषया अङ्कस्तु ग्रहणात्तापत्तेः विदुषइति
नचषत्वे संप्रसारणं पूर्वत्वस्य षत्वे तत्कोरित्य असिद्धत्वात् कथं षत्वमिति वाच्यं पदांतपदाद्योरेकादेश
स्येवासिद्धत्वात् वहिर्भूतविभक्तिनिमित्तकसंप्रसारणनिमित्तकत्वयावहिरंगासिद्धत्वं तु नवाजानंतर्ये
इति निषेधात् सेदिवानिति वस्वन्त इति धातोः भाषायां सदवसश्रुवइतिलिटः क्वसोर्द्वित्वे तएकहल्मध्ये
इत्येत्वाभ्यासलोपयोर्वस्वेकाजाद्घसामितीट् प्रवर्ततेइति यत्तु ऊट् प्रवृत्तावपि नषत्वं तनिःवसोः सं
प्रसारणेनाजानंतर्य इति निषेधाद्यणो संप्रसारणसिद्धत्वाभावेन पूर्वस्य यणः संप्रसारणस्य वहि
रंगत्वादसिद्धत्वेन वलिलोपे सत्तु ऊट् त्वस्यासिद्धत्वादिति तन्न परिभाषास्वन्यार्थमावश्यकत्वे
प्रक्रियागौरवकल्पनस्यान्याय्यत्वात् ग्रहणेति लौकिकन्यायसिद्धेयं लोके हि निमित्तं हि विधौ
दृष्टम् कार्यस्य स्थितौ नियामकं तदनियामकं वस्त्राद्यं यथा न्यायनये पत्नावृद्धि तन्नाशेनहि तत्
नाशाभ्युपगमात् तथा वेदांतनये प्रारब्धस्य वित्तपरस्थिति नियामकत्वं च प्रसिद्धमेव द्वितीयं तु दंडा
दि तन्नाशेपि घटनाशादर्शनात् इह तु शास्त्रत्वस्यानुरोधेन व्यवस्थासंप्रापकमपि प्राणुक्तमेव निदि
क् स्तुहिनिति नोने निदीर्घस्तु संयोगांतलोपस्यासिद्धत्वात्त्र हिंसीत्यसोदित्वादनिदितामिति न
धृदिति स्त्रंसेस्तु ध्वंसेश्च वस्त्रंसनेक्विप् अनिदितामिति लोपः वसिवनिदत्वं विवक्षितेनइति तेनपरमधुमा
नित्यत्र परत्वादसु उसमासांतोदात्तत्वं भवदसुउ एवाकारस्य भवति परसन्नम्यानुस्वरे नरेत्गत्वा।
द्विभक्त्युत्पत्तेः पूर्वमेव पुम्मशब्दोकारस्येदात्तत्वे स्वंसनथ मेणो हलः स्थाने नद्धमोऽनुदात्तएवासुः

पा·श्वे· स्यात् नचांगसंज्ञायां विधानप्रतिबद्धतया गाधिकारे विवक्षितसप्तमीबहुमप्राक्तमिति वाच्यं अंगस्येत्या
स्यांगान्वयोग्यस्येत्यर्थे नाप्तेः अत्र चोपदेशिवद्वचनं कर्त्तव्यमिति भाष्यं मानं यदित्वग्रे ऽनडुह् उकारस्यो
त्वात्वविधानात् तत्र कृतव्यूहपरिभाषया पूर्वं स्वराप्रवृत्तिः पश्चाज्जायमानो मुमेवमभविष्यति नचवहिरं
पा गतया ऽनडुहो सिद्धत्वान्नात्वविधानात् अकृतव्यूहपरिभाषाविषये तदप्रवृत्तेः कृतत्वादित्युच्यते न
दापरसप्तमीपक्षोपि सूपपादः उपदेशिवद्वचनमिति भाष्यस्याप्यत्रैव तात्पर्यं नचैवं पुमानित्यादाव। भाष्यकृतस्य परिभाषाभावमाश्रित्य प्रवृत्तिमिति वोध्यं पाठांतर
पि पूर्वमनडुहः प्रातिपदिकस्वरेण सतिशिष्टेन प्रत्ययस्वरस्य वाधात् अनडुह उदात्तत्वं स्यात् इष्यते
तूकारस्य पुमोसंपरिपान्तिमादेतत्वादर्शनादिति वाच्यं प्रकृतिप्रत्ययविभागशून्यत्वे वतनस्वरवृत्तेः अ
त एवचते कृते नोनित्यकरणं चरितार्थं यद्यपि तु अमूस्तु नो नित्यत्वसामर्थ्येन क्वचित्सर्वेऽपि मुमभिप्रवृत्तिर्लोप्य
ते तथापि पुमानित्यादौ नित्यत्वसामर्थ्यादेवाप्रवृत्तिरित्याहुः वहुप्रेयसीति विभक्तौ लिंगविशिष्टाग्र
हणात् अनडुह ननु सर्वनामस्थाने इत्यस्य विवक्षितसप्तमीत्वेन परत्वादेततरंगत्वाच्च ङीपं वाधित्वा
अनडुह ङीपोऽप्राप्तिः उगित्वस्यानुबंधकार्यत्वेन स्थानिवत्त्वेन लाभात् ङीप्यपि वहुप्रेयसीति रूपा
पत्तिरिति चेन्न संख्याकारकप्रतिपादने च कार्ये सर्वे सर्वनामस्थानविवक्षायां साचन ङीबुत्पत्तेः
पूर्वं स्वार्थद्रव्यलिंगसंख्याकारकाणां क्रामिकवोधस्यैव भाष्यादौ प्रतिपादनात् एवंचनकश्चिद्दो
षः कृतेऽति क्वचित्तु याते ईमसुन्निति पाठः स्त्रियामिति सूत्रे भाष्यकैयटयोस्तु स्पष्टः सस्यपस्तन्य
न्ययो वा हुल्काद्स्वरश्नुत्रं पुमानिति सांतेतिदीर्घः हे पुमन्निति अत्र संबुद्धाविन्युक्तेनेदीर्घः पुंस्त्वि

ति संयोगान्तलोपेनुस्वारः उशनानिति वशेः कनसिः ग्रहिज्येति संप्रसारणं अस्य संबुद्धाविति ए
तद्वक्तव्यो वाचनिकं पठितम् अन्ये तु अनङ् सौ विभाषेत्यत्र सोर्ङ्सेत्यव सिद्धेऽनङ्विधानं कृतमिदं उ एवञ्च वर्ण
मितिज्ञापनार्थमिति नेदं सिद्धं विकल्पाभावस्तु वाचनिक एव पाठान्तरं एवं नितनत्रे लाघवाभावात् डित्वसाम
र्थ्यादिलोपकल्पने प्रक्रियागौरवाच्च अरुडुशनेत्यत्राप्यस्यैवानुवृत्त्यापत्त्या उशनेत्यत्र दीर्घापत्तेश्च अंगव
त्परिभाषया समाधानं त्वगतिकगतिः भाष्यानुक्तत्वादिदमप्रमाणं माणमेवहे उशनः इत्येकं रूपं सा
ध्विति प्रामाणिकाः इत्यन्ते नैव सोर्ङ्सेत्युक्ते अरुडुशनेत्यत्राप्यस्यैवानुवृत्तिः स्यात् ततश्चोशनेत्यत्र नां
तलस्य लोपो दीर्घः स्यादिति वाच्यं अंगवत्परिभाषया समाधानात् न च सखिशब्दादाचारक्विबन्तात्
ङ्रिति क्विपि तु किं सखिन् शब्दात् आदेशो टिलोपे सख्येतिवत् रूपं अनङ्: अंत्यादेशः सख्यतिस्यादिति वा
च्यं सख्युरसंबुद्धाविति साहचर्यादनङ् तत्राप्रवृत्तेः तस्य तु फलाभावादप्रवृत्तेरित्याहुः भाष्यानु
क्तत्वादिदमप्रमाणमेवहे उशनः इत्येव रूपं साध्विति प्रामाणिकाः + रस्यानभिव्यक्तपदार्थकत्वाद्वे
त्याहुः उशनाः पुरुदंशाः अनेहाः कालः न जिह न एहिचेत्यस्य तु नु इति हन एह तु एहत एहादेशः स्य तु नु च +
डा सुव इति ननु विशिष्टस्या संतत्वाधानुमित्रन्याच्छात्वसंतस्येति दीर्घः प्राप्नोति न च धातोर्नेनिष्प्र+
सज्यप्रनिषेधः वाक्यभेदासमर्थसमासापत्तेरिति चेन्न धातुशब्देन तदवयवलक्षणया धात्ववयव
भिन्नासंतस्येत्यर्थात् सौत्रत्वाद्धुतिः अत एव पिंडग्रह इत्यादि भाष्योदाहृतं संगच्छते अदस इति षष्ठी
सुलोपसंनियोगशिष्टत्वादयं सावेव न दोसः सावित्यनुवृत्तेश्च ननु सारेवौत्वं विधीयताम्

त्यदाद्यत्वेनासाविति रूपसिद्धेः किं सुलोपेनेति चेत् न असकौ स्त्रीत्यत्र त्यदाद्यत्वे टापि प्रत्ययस्थादितीत्वप्र
संगात् न च आ आविति आकारप्रश्लेषान्नैवं वृद्धेः पूर्वं दुर्वारत्वात् इति वाच्यं वार्णादाङ्गस्य बलीयस्त्वा
त् न च वृद्धावाकाररूपत्वस्य विनाशोन्मुखत्वाद् कृतव्यूहपरिभाषयैवं नेति वाच्यं कारिकेत्यादिके
कृत्यादौ वचनानापत्तेः एवं च तत्राकारप्रश्लेषो निष्फलो दुष्टश्चेति बोध्यं अचः परस्मिन्निति स्थानिव
द्भावेनाकाररूपत्वस्यापि सत्वाच्च एतेन त्यदादीनामदः त्यादौ विभक्ताविति विषयसप्तमीति मंदोक्त
मपास्तम् तथा हि सति विभक्त्युत्पत्तेः पूर्वं त्यदाद्यत्वे टापि साकद सद् त्यं तस्योत्वस्थानिवत्वेनाका
रत्वे दुर्वारमेव स्यात् न चेष्टापत्तिः प्रकृतसूत्रस्थभाष्यादिविरोधात् सुलोपविधानेन परमसप्त
मीत्वस्यैव ज्ञापनाच्च विना प्रमाणं निर्दिष्टपरिभाषाबाधाभावेन विषयसप्तम्या वक्तुमशक्यत्वात्
न्वय नु सुलोपाभावे सोऽस्त्रीत्यत्रौङ आप इति शी स्यादिति तन्न द्विवचने औकारयोरेवौङिति संज्ञा
याः पूर्वाचार्यैः कृतत्वात् नन्वेवमपि सौ डौः त्यव स त्र मस्त्विति चेन्न आसावित्यत्र टिलोपे कृते
सेत्वादत्वकृतव्यूहपरिभाषया सत्वानापत्तेः रिति दिक् असुक इति अमुक अमुकी अमुकग्राम इत्या
द्यसाध्येव असुकोसुका असुकः ग्रामेत्याद्येवोचितं पाठांतरं क्वचित्सातत्येन मुख्यप्राप्तेः क्वचित्
शब्देन बाधादिति प्राचः अव्युत्पन्नोदः शब्दपर्यायोमुकशब्द इत्यन्ये इत्थं तु मुत्वस्य क्वचित् सातत्ये
नाप्राप्तेः क्वचित्सातत्येन बाधादिति प्राचः तत्रामुकग्रामेत्यादावज्ञातनामधेयार्थानवगतेर्नाकचौ इदं रूपं
किं त्वव्युत्पन्नोदः शब्दपर्यायोमुकशब्दोप्यस्तीति केचित् एतदीन पारिभाषिकवद्भुवचानय

हृणोऽमीङ्इति न सिध्येत् एकारस्य बहुवचनपरत्वाभावादत आह वक्ष्यमाणेत्यादि अतिपद्यते सुत्वेति इदं च मध्यम
गिन्यायेन पूर्वपरत्वेऽपि सुत्वे कृते इति ननु सुत्वस्यासिद्धत्वात्कथं नाभावः किं चेनादेश प्राप्नुयात्परत्वादिति
तत्राह नमुने इति कर्तव्ये कृते चेति एवं च नेटः इति विषयस्य न अमीति भावः सुद्रति समाहारद्वंद्वः कृतेऽपि च तु
के सुत्वे कृते स्यादपि च ति दीर्घो नः सन्निपातपरिभाषया वा समाधेयं अथ नेतिवदमु नेति वक्तव्ये न मुन
इत्युक्तिर्नेतियोगविभागार्था तेन रामैरित्यादि सिद्धिः अन्यथा ऐस असिद्धतयोकारस्यासंभवात्तालोपो न स्यात् न
चानुनासिकनिर्देशसामर्थ्यं देवरुहीत्यादौ हृस्वविधेः स्यादिति तत्रैव तोऽरित्यत्राप्यनुनासिकस्यैव निर्देशे
न तत्र चारितार्थ्यात् सामर्थ्याद्वा तत्सर्वादेशो भविष्यति एवं च स्थानिवत्त्वात्तत्र स्यापि प्रवृत्तौ पदत्वात्तिस
ग्लोपलभ्यते स्वतएव प्रत्ययपरत्वादि निर्देशाः संगच्छन्ते अमीक्षितेति नेदमसोरिस्तेऽस्तु इहकोनाम तोऽकाः परे
श्वद्योकयोरिति सत्रस्य कार्यप्रागेवनास्तीति भाष्यलोकाः तेभ्यः क्विप्किचोरत्नुत्पत्तेः उ एवउ अविभक्त्यवमा
द्विभ्यः क्विपिखोनादियऊद्यादित्याह इति हलेतेनाः पुल्लिंगा अलोन्त्यस्य त्यनेनलब्धार्थमाह हस्ये
ति कलोकलीत्यतोसलीति पदस्येति स्फोरित्यतोनइति चानुवर्तते तदाह कलीत्यादि सलिपरे पदाने
च विद्यमानस्येत्यर्थः ननु नहोधइत्यत्र दएवकृतेन कृतः नचेदं ढादिवद्भवभावार्थं तस्य नहो विषया
भावात् इति चेन्न नहमित्यत्र रदाभ्यामिति नत्वापत्तेः मघस्तीरिति धत्वानापत्तेश्च एतेन संनिपा। यो
तपरिभाषयानत्वावारणं सुप्राकमित्यपास्तं नच मघस्तयोरिति धत्वे संनिपातपरिभाषया नत्वा
नापत्तिः तस्याअनित्यत्वात् अतएव यास्यद्धीत्यादौ नत्वं माधवादिभिरुक्तं उपपूर्वोलह वन्धन

प्रा॰ प्रो॰

इत्यस्मात्सोपपदात्क्विप्यपाङ्गावेक्किपि नहिवृतीति पूर्वपदस्य दीर्घः सोऽहलश्चादिलोपे धत्वजस्त्वचत्वानि क्लोप
पत्वे यदि पूर्वपदान्तस्य लोपः धातोः सस्य षत्वे आदेशप्रत्यययोरिति तु न सात्पदाद्योरिति निषेधात्
पदादिरिति पक्षे स्यापि भाष्योक्तस्थितत्वात् हस्य ढ इति गुदं चकै यटादिमतेनोक्तं तन्मते षत्वस्य चदस्त्व।
स्यापि कुत्वेन बाधात् स्वमते तु ढडगका इति बोध्यं ग्रोरिति दिव उदित्यौत्वम् यण् नाज्झलाविति नर्वे इति नि
षेधान्नौत्वमसिद्धं गीरित्यादि दधृष्प्राभ्यां क्विपुत्र्यत इदिति उपोधा निचेत्वोत्वे वौरुपधाया इति दीर्घः
चतस्र इति परत्वादामं बाधित्वा चतस्रादेशस्य कृते नाविति न्यायात् स्नुनरास्र पूर्वमामि चतस्रादे
प्राप्तस्तु दुर्लभः निर्दिश्यमानस्येति भाषणात् स्वपूर्वं चेदं स्थानिवत्स्त्रे भाष्ये च तस्रणामिति नतिस्त्रि
तिदीर्घनिषेधः सर्वावदिति सर्वाशब्दवदित्यर्थः यत्तु सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावो त्रापेदित
इति तन्न अस्य शब्दपरत्वेन कदापि सर्वनामत्वाभावेन पुंवद्भावाप्राप्ते मात्रग्रहणेन हि यद्वृत्तिघटक
स्य सर्वनाम्नः पुंवद्भावः तस्य वृत्तेः पूर्वे सर्वनामत्वे सति वृत्तौ तत्त्वाभावेऽपि पुंवद्भाव इत्येतावन्मात्रं बोध्य
ते अतएव सर्वनामकार्याचित्रमुत्रः सर्वापुत्रं इत्यादौ न पुंवद्भाव इति स्पष्टमाकरे यः सोऽपुंस्यायावाधा
त् क्लीबे सोर्लुका लुप्तत्वात्त्रियामिदं वागिति वचक्विपि वचीत्यादिना क्विपू दीर्घोऽसंप्रसारणं च अ
यामि क्रदोरित्या पूर्वप्रत्ययस्तु न गृह्यते श्रद्धिः संस्कृतमिति लिङ्गात् तत्र यकारस्याश्रूयमाणत्वेन सा
पूतिकसत्वे कृत पूर्वगतानाश्रयणेन तद्ग्रहणात्स्व अत्र उपसर्गान्तरं इत्यन्तस्तार इत्यनुवर्त्तते दिगिति दिशा
श्रुतिसर्जने। क्रत्विगादिना क्विपू ष ड ग काः प्राग्वत् त्विडिति त्विष दीप्तावित्यस्मात्क्विपू त्रस्त्वचर्त्वे तु

षत्वे इणन्तिज्जुषीष्टीति सेवनयोः क्विप् सहस्य सभावः सजूर्मित्रम् आशिषाविति आशासः क्वावित्युप
धायाइत्वे शास इत्वदषीति षत्वं आसावेति अदसओत्वं त्यदाद्यत्वापवादः एतेनात्रटाबादिकं वर्णो
पेतः पृथग्युक्ताः अमूभिरिति अदन्तत्वाभावादेत्वाभावेन एनर्ह्रदित्यस्यान्नावमूलमेवेत्यलं अत्रेद
मवधेयं स्वयुअनड्वाहोयस्यामिति विग्रहे स्वनड्वानित्येव गोत्रादिङीन अनुपसर्जनाधिकारादि+
तिहलंताः स्त्रीलिंगाः दत्वमिति वसुस्रंस्वित्यस्य पदाधिकारस्थत्वेन तदंतत्वे विदत्वं एवमंगाधिका
रस्थत्वादाम्सवीतिध्येयं पूर्वपदस्येवेति प्रत्ययलक्षणेनेति भाव अतएव राजपुरुषादौ नलोपादि
कं उत्तरेति तथाच विमलद्विवीत्यादावुत्वं स्यादिति भावः उत्तरपदत्वे चेति उत्तरशब्देनोत्तरपदं लक्ष्य
ते उत्तरपदशब्दश्च समासचरमावयवे रूढः तेन समासोत्तरावयवस्य पदत्वे कर्तव्ये लुमतालुप्ते प्र
त्ययलक्षणं न पदादिविधौ त्वयं निषेधो नेत्यर्थः तेन परमचेत्यादौ न कुत्वादिकं दधिसेचावित्या
दौच सात्पदाद्योरिति षत्वनिषेधः पदादिविधिश्च प्रतिपदोक्तत्वात्पदाद्योरित्येव गृह्यते तेन परम
वृधावित्यादौ भषभावो न उत्तरपदादि करणे वर्णलक्षणादित्यादौ नुनदोषः उत्तरपदशब्दस्य समा
सचरमावयवमात्रे रूढेः नचैवं बहुवाचावित्यादौ कुत्वादिकं स्यादिति वाच्यं बहुचूर्वस्य नेतिवचनां
तेरणेव समाधानात् अत्राप्यपदादिविधावित्यनुवर्तते तेन बहुसेचावित्यादौ षत्वनिषेधसिद्धिः
पाठांतरं अयं निषेधोऽपदादिविधाविति पर्युदासात्पदांतत्वनिमित्तके विधावेव तेन ङमुडादिविष
येनास्य प्रवृत्तेः पदांतत्वनिमित्तकत्वं च पदांतोद्देश्यकत्वरूपं उत्तरपदस्य कार्यित्व एवच प्रवृत्तिस्ते

नमाप्यवृत्तेभवायेनत्यादौपदत्वव्यपदेशेत्वनिषेधसिद्धिः इत्येतं अपदादिविधिश्चात्रपदान्तत्वनिमित्तविधिरेवे
तिभाष्यस्वरसः नचैवमप्यथोलुगलेटाविन्यादावाख्यातमाख्यातेनेति समासे टत्वादिकंनस्यादितिवाच्यं
तिङोलुकालुप्तत्वाभावात् लुकालुप्तएवास्यप्रवृत्तेरितिस्पष्टंभाष्ये नलुमतेतिसूत्रे नन्वेवमपिपूर्वेदं
डिप्रियइत्यादाववर्णान्तत्वेपूर्वेदंडिशब्दस्योत्तरपदत्वेनप्रत्ययलक्षणनिषेधात्पदत्वाभावेनलोपोनस्या
दितिचेन्न उत्तरपदशब्देनमध्यपदत्वानाक्रान्तोत्तरपदस्यैवग्रहणंप्रत्याख्यानभाष्यप्रामाण्यादित्याहुः
नन्वेवमपिकाश्यपेनप्रोक्तमधीतइत्यस्मिन्नर्थेकाश्यपकौशिकाभ्यामृषिभ्यांणिनिरितिप्रोक्तार्थेणिनि
तस्यवेनाडुत्पन्नस्याणोलुकिकाश्यपनाविन्त्यादौउत्तरपदत्वाभावात्पदत्वनिषेधानापत्तेर्नलोपापत्तिः नच
कग्गिनितोटिनुगित्यत्रनकारोच्चारणेनतद्धितान्तर्वर्त्तिसुप्विभक्तिमाश्रित्यपदत्वाभावबोधनान्नदोषइति
वाच्यं इनस्त्रियामित्यादीनुत्वप्रयुक्तकार्यसिद्धयेनकारोच्चारणस्यावश्यकत्वादितिचेन्न संज्ञापूर्वकवि
धेरनित्यत्वान्नदोषइतिवार्त्तिकाशयः प्रोक्तार्थकणिन्यन्तेभ्यस्तद्धितविषयतावलात्स्त्र्येवुत्पत्तेः पूर्वमेवाधी
तप्रत्ययोत्पत्तेर्नदोषात्तेनोनदोषइतितत्त्वंभाष्येत्विदंप्रत्याख्यातंतथाहि भसंज्ञासूत्रेसुप्तिङन्तमित्य
तःसुवेतमित्यनुवर्त्त्ययजादावसर्वनामस्थानेपरेयस्मात्प्रत्ययविधिः तथाभूतःपूर्वःसमुदायोभसं
ज्ञोभवति तदवयवभूतेसुवेतयजाद्यसर्वनामस्थानपरंयद्यस्तितर्हितदपिभसंज्ञंभवतीत्यर्थात्सु
वाचेत्यादौनकुत्वं अत्रसमुदायस्यसंज्ञाप्रधानशिष्टाव्यापकोद्देश्यकत्वात् अवयवस्यतुअन्वयैशि
ष्टाव्याप्योद्देश्यकत्वात् तेनराजेत्यादावव्ययवसुवेतभावेपिभवति एवंस्वादिष्वितियोगेविभज्यते

न सामान्यतेः स्वादिषु पूर्वं पदमिति पदसंज्ञां विधाय सर्वनामस्थाने इत्यत्रापि सुबन्तमित्यनुवर्त्योप
चीत्यपकृष्य सर्वनामस्थाने इति प्रसज्यप्रतिषेधमाश्रित्य यज्ञादौ सर्वनामस्थाने परतः पूर्वं पदं
न तदवयवभूतं सुबन्तं च पदं नेत्यर्थः अवयवसुबन्तं च यज्ञादिप्रत्ययाव्यवहितमेव गृह्यते तेन ए
तत्पुरुषाविव्यादौ पूर्वपदे नलोपादिसिद्धिः तत्र प्रसज्यप्रतिषेधसामर्थ्यात् नेन रस्येति न्यायेन बाधि
त्वात् पदत्वद्वयस्यापि निषेधः तत्र समुदायस्य स्वादिष्विति प्राप्ताऽवयवस्य सुबन्तमिति प्राप्तेनेन
सुवाचाविव्यादौ न कुत्वं ननु एवं श्रूयमाणे सोपूर्वस्य पदसंज्ञा स्यादिति चेद् दिष्ट्यापत्तेः दधिसेचावि
त्यादौ तु पदाद्यादेः पदादिरिति व्याख्यानात् षत्वनिषेधसिद्धिः अत एव सोपपदात् सिचू धातोर्विचि ग
तिकारकोपपदानामिति सुबुत्पत्तेः पूर्वं समासेपि दधिसेगित्यादौ षत्वनिषेधसिद्धिः पदस्यादेरिति ।
व्याख्याने तु निषेधाप्राप्तेः षत्वं दुर्वारं स्यात् कैयटस्तु सोपपदात् सिचेर्विजेव नास्त्यनभिधानात् इत्याह
अन्ये तु पक्षे तु सुबुत्पत्तेः पूर्वं समास एव न गतिकारकोपपदानामित्यस्यानित्यत्वात् अत एवांवांवेति
सूत्रे गवादिग्रहणं चरितार्थं अन्यथा गोषु इत्यादौ सुपि स्थ इति के गतिकारकोपपदानामिति सुबुत्प
त्तेः पूर्वं समासे सात्पदाद्योरिति निषेधाप्राप्तेः आदेशप्रत्यययोरित्यनेन न सिद्धोत हैयग्यां स्पष्टमेव तत्र हि
स्थ इति लक्षणप्रतिपदोक्तपरिभाषया सुपि स्थ इति विहितकप्रत्ययानानुकरणं इत्याहुः अन्ये त्विदं ।
पंचमीसमास एव ज्ञापकमाहुः वक्तुसेचावित्यादौ यथैव कुत्वं पूर्वस्य षत्वेनेति वचनमेव कर्तव्यं वार्तिकमते
पि वक्तुत्वं पूर्वस्य चापदादिविधानेन स्यावश्यकत्वादिति वस्तुतस्तु यदादादिति पंचैर्निर्देशान्नेव सिद्धेः ।

मी

प्रा॰ श॰

द्विग्रहणेन वक्ष्यमाणग्रहणं भाष्यानयेति मन्तव्यं अयमपि प्रकारो यस्य पदत्वप्रयुक्तं कार्यं प्राप्तिस्तद्विषय एवव
दान्तत्वप्रयुक्तकार्ये एवच अयमपि प्रकारः पदान्तविधावेव योगविभागस्य सिद्ध्यर्थत्वात् अत एव सुगणी+
शौ विन्यादौ समासे ऽर्द्धश्च स्य पदत्वात् दन्तादेः पदस्य विधीयमानो ऽनुङ् भवत्येव परमदंडिनेत्यादौ विभक्तेः
पदत्वाभावान्नेति वाच्यं अत एवार्थभवन्त्या व्याख्यानयोः समता न चैवं रामेष्वित्यादौ षत्वानापत्तिः स्वादि।
ष्वित्यनेन पूर्वस्य पदसंज्ञकत्वात् अर्थवत्समुदायत्वादेव निवाच्यं सातिग्रहणेन स्वादिष्विति यस्य प
दसंज्ञा तदुत्तरस्य षत्वनिषेधो नेति ज्ञापनात् अत एव राजपुरुषेष्वित्यादौ उत्तरपदमाश्रित्यापि षत्वा+
निषेधो न उक्तरीत्या तस्यापि स्वादिष्विति पदत्वाच्च स्पष्टं चेदं न लुमतांगस्येति सूत्रे भाष्ये कादेशोने
ति अत एवेदं प्रत्ययः सात्विनित वक्ष्यत इति अयं च सामर्थ्यात् लुक्कालुप्ते विभवति एवं चास्येवायम्
दोशसादिष्वेनैव सिद्धेः न च तत्रापि परत्वात् पदाद्यन्त्वेन तत एनदादेशो लहल लक्षणस्येति न्यायेन पु।
नरत्वाप्रवृत्तौ विशेषोस्त्येवेति वाच्यं अपवादत्वादेनदादेशस्यैव पूर्वं प्रवृत्तेः स्थानिवत्सूत्रेणैका+
र्यातिदेशे लक्षणभेदात् अत एव सूत्रेण नत्वं विधायत तकाराच्चारणसामर्थ्येन चलुक्प्रत्ययाप्रधानेनाति
देशवतीनिषेधस्य न लुमतेत्यस्य बाधेन नपुंसके लुक्यपि प्रवर्त्तिं स्वीकृत्य प्रवर्त्तिकमन्या व्याख्यानं भाष्या
नं सं गच्छते न च तकारोच्चारणं त्यदादीनामः इत्यनन्यार्थेनापि चरितार्थं मध्ये पदं न्यायेन न लुमताति + ते
निषेधबाधस्यैवोचित्यात् किंच विधिबाधापेक्षया लुक्प्रबाधा ऽप्रधानातिदेशनिषेधबाध एवोचितः
न चैवमेतत् छिन्नत इत्यत्रापि नदापत्तिः तादृशप्रयोगानभिधानात् अन्वादेशस्य विधानागर्भत्वेन +

कार्यान्तरविध्युद्देश्यस्य समर्पकत्वेन रूपान्तरेदमेतद्दोरित्यर्थे नात्रान्वादेशस्यैवाभावः समासेऽद्देश्यविधे
यभावेनानन्वयादित्यन्ये तन्नत्रैनादेशापादनपरिभाष्यविरोधात् किंचित्कार्यविधानमुपात्त
स्य पुनरुपादानमेवान्वादेशः नतु कार्यान्तरविधानाय पुनरुपादानपर्यन्तं अन एवानेन तत्केदोधी
तिमेनपयुपतिदेवदत्तरित्यादावप्यादेशोभवत्येव आद्यकौठो विधानमिमित्तुएनमानेदिः तं विधा
दित्तिभाष्यादिप्रयोगादवसीयते अदिक ब्रह्मणीइति नसंयोगादितिनिषेधादल्लोपोन प्राचोक्ताह
त्रिमुपन्यासस्याशुद्धत्वां ध्यानयितुमाह अहर्भातीति तस्मिन्हि अहोभातीतिस्यादितिभावः
नलोपेप्राप्तेइति नचनलोपेऽकारस्यरोरेवाविद्यमानाभावेनान्यतरेणैवोपपत्तेरुभयविधानवै
यर्थ्येनतत्सामर्थ्यादेवलोपोनेतिवाच्यं संबुद्धौनलोपनिषेधनाहर्गणेत्यादावुत्वाभावेनदीर्घा
होनिदाघइत्यादौउत्वसंपादनेनचचारितार्थ्यात् नचैवंरोसावित्यैवसिद्धे गुरुभूतन्यासोव्यर्थइ
तितत्सामर्थ्याल्लोपोनेतिवाच्यं सप्तमीबहुवचनेपरेरेफादेशापत्तौरोःसुपीतिनियमेनवि
पाठांतर
सर्गानापत्त्यादौचस्यसत्त्वात् रोसीतिन्यासेविशिष्टस्यसकारनित्वेनदोषाद्दुर्वारएवसुपि वि
शेष्यासंनिधानेनतदादिविध्यभावात् सकारेनत्वस्यैवत्विल्विधित्वेनसोलोपेरत्वापत्तिःअहःसं
गतमित्यादौरत्वानापत्तिश्च नचाहन्नित्यत्रलोपेननकारान्तरंप्रश्लिष्यतांतस्याहन्शब्दस्येतिव्या
ख्यानसामर्थ्येननलोपोनेतिवाच्यं दीर्घाहोनिदाघेत्यादौसंबुद्धौपरत्वाभ्यामादौचात्वात्त्वाचन
कारप्रश्लेषस्यचारितार्थ्येनेननलोपबाधमानाभावात्इतिभावः आवन्नीति आदन्तोमानेचाह्न

वार्त्तिकमेवमस्त्वन्यथा नलोपे रेफादेशेनैव सिद्धत्वात्तद्वैयर्थ्यं स्पष्टमेव पाठांतरं २

पा॰ शे॰ इति निर्देशान्न्यायकर्त्तृत्वेऽविभक्तिकाद्धनेत्ति निर्देश एव ज्ञापकमिति वचनकल्पनापेक्षया अत्र वृत्ते
र्लघुत्वमिति बोध्यं एतेन कृष्णव्यात्रीनिति ज्ञापकेन भाष्योक्तेन निर्वाहः भाष्यप्रामाण्याच्च तस्य संबुद्धा
२ तस्य वप्रवृत्तेरित्यपास्तं पाठांतरं तज्ज्ञापकमिति वचनात् कल्पनापेक्षया अत्र वृत्तिर्लघीयसीति भावः
अत्र तस्य पदान्ते हान्निति निपात्यते इत्यर्थः एवं च संनियोगशिष्टन्यायेन यत्रानेन नलोपश्च निवं
धस्तत्र सौ [illegible] त्वयोः प्रवृत्तिः तेन समासांतानामुत्त्वपदावयवत्वे पुण्याहाभ्यामित्यादौ न दोषः रु+
त्तिदिक् तदंतस्यापीति पदाधिकारस्थत्वात् ग्रह एव नेति निषेधस्तु प्रत्ययविधिविषयः अत
एव येन विधिरिति सूत्रे भाष्ये प्रत्ययविधिभिन्ने ऽत्र निन्यादौ गृह्यमाणप्रातिपदिकेनापि तदंतविधि।
प्रतिपादनं स्वसा परमस्वसेत्याद्युदाहरणं च संगच्छते समासप्रत्ययविधौ प्रतिषेध इति निषेधानु
वादकत्वस्य युक्तत्वाच्च यत्तु तज्ज्ञापकं सपूर्वाया इति सूत्रे अन्यथा पूर्वादिनिरित्यत्र तदंतविधिसिद्धेः
किं तेन न च व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधेन केवलपूर्वशब्दे तदंते च सिध्यर्थं सूत्रद्वय।
मावश्यकं तस्य निषेधस्य सूत्रापात्तानादिशब्दविषयकत्वात् तत् प्रत्ययविधौ प्रतिषेध इत्यस्यैव
ज्ञापकं स्तु वच्चं अत एव तदंतविधिसूत्रभाष्ये समासेत्यादिनिषेधकथनवत् अस्य न कथनं एते
न व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधात् केवलेनस्यादिति परास्तम् तस्यापि प्रत्ययविधि
विषयत्वात् तेन सर्वादेश्यादेश्च लुगवतनाव्यवहति केवलसर्वशब्देन स्यादित्यपास्तं तस्य लुग्विधित्वे
न प्रत्ययविधित्वाभावात् ननु व्यपदेशिवद्भावो प्रातिके नेति न्यायो नास्त्येव फलाभावत् सूत्रा।

पदि॰

नान्तककुदशांतानाडिन्त्यादौप्यंतग्रहसामर्थ्येनैकव्यपदेशिवद्भावाप्रवृत्तेरितिचेन्न ग्रहणवतेतिनि
प्रत्ययविधावितिच तदंतविधिनिषेधेन तदंतसंपादकतयां तग्रहणस्य चारितार्थ्यात् एकगो
पूर्वादित्यस्य केवलैकशब्दे व्याप्तत्वेनास्तस्य फलत्वाच्च पूर्वोत्त पूर्वादिनि रित्येकयोग एव कर्त्तव्ये प्र
पृथग्योगकरणं चास्या मानं नचैकादिभ्यश्चेति सूत्रे नुडर्थं तथा पाठः अत एवानि ष्टीत्यादिसि
द्धिरितिवाच्यं ज्ञापकपरभाष्यप्रामाण्येनानिष्टीत्यादिप्रयोगाणामनिष्टत्वात् एकयोगेपि
तावतन्तत्र रत्रानिवृत्तेर्बाधकाभावाच्च अत एव विभिन्नविभक्त्या निर्देशो भाष्यकृता दर्शितः अत
एव नांतादसंख्यादेरितिचरितार्थं अन्यथा पंचमरत्यादावपिव्यपदेशिवद्भावेन संख्यादित्वा
न्नुडेयर्थं स्यादेव पाठांतरं ज्ञापकस्य सजातीया तत्फलं तु सूत्रांतादिकृदशांताडुः एक
गोपूर्वादित्यादेः केवलसूत्रप्रवृत्तदशानु शादेकशब्दादिप्रवृत्तिः आद्ययोर्तग्रहणं तु प्रत्यय
विधौ तदंतग्रहणनिषेधात्कृतं इत्यंतं ज्ञापकस्य सजातीयापेक्षत्वाच्च सूत्रोपात्तं नादिशब्दविष
यतैवास्य स्पष्टं च येन विधिरित्यत्र कैयटेनोक्ता पाठांतरं अत एव सपूर्वाच्चेति सूत्रस्य ग्रहण
वतेतिप्रतिषेधज्ञापकताभाष्ये उक्ता अन्यथा केवलेन तदंतेन च सिध्यर्थं सूत्रद्वयस्यावश्यकत्वेन
तदसंगतिः स्पष्टैव इत्यंतं स्पष्टं चानयोः प्रत्ययविधिविषयत्वं असमासे निष्कादिभ्य इति सू ष्का
त्रे भाष्यकैयटयोः अत एव सर्वादेशादेस्तिलुक् प्रत्ययविधित्वाभावात्केवलपि सर्वशब्दे न ए
तेनानयोर्व्यपदेशिवद्भावेन निषेधात्केवले ह्नुप्राप्तेः कृत्वा त्वेमस्यातामित्यपास्तम् इति भावः

प्रौ॰ शे॰

तस्यासिद्धत्वादिति अकृतव्यूहपरिभाषया दीर्घाप्रवृत्तिशंकानेन वार्यते दीर्घस्तु परत्वाद्ध
ल्ङ्याब्भ्यो दिलोपात्पूर्वमेव बोध्यः वस्तुतस्तु नस्यासिद्धत्वादिति पूर्वपरान्वयि सावपि पदं भ
वतीति पक्षे हल्ङ्याब्भ्यो दिलोपाद्दीर्घात्प्रपरत्वे न रुत्वादिप्राप्तिः संबुद्धौ त्विति स्पष्टोऽत्र हल्ङ्या
दिलोपात् रुत्वे संबुद्धावित्युक्तो दीर्घाभावे हविष्पाचेत्युत्वे वाङ्गुणः इत्युग्रहणेन षष्ठीकस्याविग्र
हणमुक्तं तत्फलमाह स्रग्वीणीत्यादि पदान्ते कुत्वमिति किन्प्रत्ययस्येत्यस्यासिद्धत्वाद्ध
श्चुतिषत्वे कुत्वमित्यर्थः षत्वं तु स्रष्टुमित्यादौ चुलि सावकाशमिति भावः भाष्यप्रयोगा
दिति रज्जुसृड्भ्यामिति भाष्यप्रयोगेन नव्यायपूर्वपदे कुत्वभावो बोध्य नैतेनास्स्रगित्यत्र नदो
षत्वाद्धः कुत्वापवादइति स्पष्टियोः पूर्वोत्तरसाहचर्येण पदान्तेपि विशिष्य षत्वबोधनेन
तत्सामर्थ्यात्कुत्वबाध इति भावः अत एवोपपट्ठाम्पतीतिकाम्यच्च मत्त्रस्य भाष्यप्रयोगः स्व
रसतः संगच्छते निपातनादेवेति निपातनेन नह्येतयोः शास्त्रयोरपवादाप्रवृत्तिबाधनमात्रं कु
त्वं तु स्वशास्त्रेणैव एतेन निपातनादपदान्तेपि कुत्वापत्तिरिति निरस्तं यद्वा निपातनादित्य
स्य क्विन्निपातनसामर्थ्यादित्यर्थः अन्यथा क्विसंनियोगेन सन्त्स्रद्धिषन्त्यादावमादिकं नि
पात्येतेति भावः ऊर्गिति ऊर्जशब्दः पुल्लिंगोपि नपुंसकस्येति सूत्रे बहूर्जि इति कैयटस्व
रसात् नरजानां संयोग इति बहूर्जि नुम्प्रतिषेध इति वाचनिकमिति मताभिप्रायेणेदं बहू
र्जि नुम्प्रतिषेध इति अयं भावः भाष्ये नपुंसकस्येति सूत्रे ज्ञग्रहणसामर्थ्यान्नाच्त्याच इत्यस्य गलत्

विश्लेषणत्वाश्रयणेनाचः परो यो हलन्तं तस्य नुमित्यर्थान्नात्र नुमिति प्रत्याख्यानमूलत्
अन्यथा हि गतानामिकोचीत्यनेन नसिद्धत्वेनेतरेषु नपुंसकह्रस्वत्वेन चाकारग्रहणमेव कुर्यात्
अत्र वृत्तौ मानं च दीर्घेडिनायनेति सूत्रे हि ग्रहणमयानि इति निर्देश एव काष्ठतक्षीत्यादौ नुगत्व
त्वात इकः परत्वसत्त्वाद्धुवत्स्येव नुम् ऊर्क् इत्यादौ तु न भवत्येवेति तत्त्व [तदा नापः] स्पष्टं चेदं भाष्ये वार्त्ति
कपि वहुलग्रहणं स्वरूपहल्पूर्वावयवक संयोगान्तोपलक्षणं बोध्यं एतेन पुत्रशब्दान्नपुंसके शौ
नपुंसकस्येति पुत्रीति च नुम्भूयमित्यपास्तं पुत्राणि त्यत्रांतरंगत्वात् त्रित्वत्वाच्च पूर्वप्रवृत्तौ
अचः परहलोऽभावेन नपुंसकस्येत्यस्याप्राप्तेः अचः परत्वस्य विघातेनाकृतव्यूहपरिभाष
यानुत्तरस्याप्राप्तेश्च उभयोरप्यचः परत्वं तु ब्राह्मणापि इत्युपपादमित्याहुः अन्यादिति द्वंद्वं
वाचनिकमेव वहूर्जे शब्दमात्रविषयकम् वहूर्जिरिति श्रुत्वस्यासिद्धत्वादनुस्वारे परसवर्णे
त्रेन्याहुः स्थानिवत्वादिति कौलुन्नेनेत्यस्यासार्वत्रिकत्वादिति भावः स्पष्टं चेदं दीधीवेवीय
मिति सूत्रे भाष्यकैयटयोः स्वविधाविति समुदायावयवत्वेनापूर्वविधित्वात् पंचमीसमा
साश्रयेणापि न प्रत्याख्या पूर्वस्मान्निमित्तत्वेनाश्रितादिति कैयटादिभिर्व्याख्यानत्वात्
अत एवापरविधाविति वक्तव्यमिति वार्त्तिकं भाष्ये प्रत्याख्यातं ज्ञायते नवसौ न यामिसिच
नवम्यामिस भसांसंगमे घटसंख्यानि नवैव सुप्यथ जसि त्रीणि एतद्धकसि चत्वार्यन्यव
चः सुकस्य सुकस्य विवुधाः शब्दस्य रूपाणि तज्ज्ञाने तु प्रतिभान्ति चेत्त्रिगदितं तु पारामा

प्रा॰ श्रो॰ सिकोऽत्रावधिरिति प्राचीनात्ते पंश्लोकद्वयेनोत्तरमाह गवाकुशाब्दस्येति प्राद्युपरत्वेन पूज्यार्थकत्वा
भावान्नलोपः भेदत इति आद्यादित्वात्तसिः भेदेनेत्यर्थः नवेति द्वंद्वान्ते श्रूयमाणस्य प्रत्ये
कमभिसंबंधात्प्रत्येकं नवेत्यर्थः एतत्साहचर्यात्प्रागेऽपि प्रत्येकमेव संख्यान्वय इति बोध्यं
गवाग्रिति सोऽलुक्कालुत्वान्नानुम् षण्णामिति कुकाले त्रयाणां गतो त्रयाणामित्यर्थः
चत्वस्येति तथा च शास्त्रदृष्ट्या गस्यैव सत्वेन गतो त्रयाणामाधिक्यं नेत्यर्थः नन्वेवमपि
पूज्यायां कुकाले च यो द्वितीयाऽन्त्यस्य च वृत्तेः त्रयाणामाधिक्यं दुर्वारमिति चेदिष्टापत्तिरि
त्याह वर्धत इति एवं च सत्यपि द्वादशसंकलनया द्वादशाधिकं शतानीत्यर्थः अष्टाशीति
सप्तविंशत्यधिकापंचशतानीत्यर्थः तथाहि सौनवानामेत्यद्वित्वे १८ ओ॰ ङि॰ चतुर्णांमा
धे पूज्यार्थानां त्रयाणां त्रद्वित्वे ९। अनुनासिकस्त्वस्य नास्ति प्रगृह्यत्वात् तसि त्रद्वि
त्वस्यानुनासिकस्य च विकल्पात् १२ संकलनया ३० एवं द्वितीयायामपि संकलनया ७४
ननु तत्प्रशासोः पूज्यायां नुमागमे तस्यानुस्वारे परसवर्णे च पाक्षिके द्वित्वे नकारत्रयस्य हि
तथस्त्यां च ध्वान्तसंख्याऽपुक्तेति चेन्न नैपादिकपरसवर्णानुस्वारयोरसिद्धत्वात्पूर्वेणनु +
मि वर्णग्रहणे जातिग्रहणेन द्वयोरपि नकारयोरेकस्मिन्ननुस्वारे तस्य परसवर्णे द्वित्वेऽपि +
त्र द्वयस्यैव सिद्धेः किं च अचः परायो झलितित्यान्यानत्वेन नुमोऽप्राप्तेः नच वर्णग्रहणे जा
तिग्रहणात्प्राप्तिः नकारे झल्त्वाभावादित्याहुः ठायां १४ पूज्यार्थानां त्रयाणां त्रद्वित्वात्

ष्टनामननुनासिकविकल्पात्र भ्यामि ४८ भ्याम्वर्णस्य यमयोश्च द्वित्वात् भिसि २४ भ्याम्वर्णे
वर्णविसर्गद्वित्वात् विसर्गेननुनासिकः अप्रगृह्यस्येति पर्युदासेनाच्त्वस्य समाम्नायिकेष्वेव न
सम्बन्धेः विसर्गेऽनुनासिकाभावस्य प्रागुक्तत्वात् संकलनया तृतीयायां ८६ ङ-पि ७। एकारस्यान
एत्वेनानुनासिकत्वात् भ्यांभ्यसोः प्रत्येकं ४८ संकलनया चतुर्थ्यां ९२ ङ-सोः २४ भ्यांभ्यसोः प्रत्ये
कं ४८ संकलनया पंचम्यां ११ संकलनया तृतीयादित्रिके २९६ प्रथमाभ्यां सह ३९६ षष्ठ्याव
चनत्रये प्रत्येकं २४ संकलनया ७२ ङ्योसि च २४ सुपि गत्यर्थकत्रयाणां ककारवकारयोर्द्वि
त्वे उकारस्यानुनासिकत्वे चतुर्विंशतिः २४ षष्ठ्यप्सरः खपर इति द्वित्वं शरोऽचीति निषेधान्न प्रा
रः खपरत्वस्य अप्सराः इति भाष्योदाहरणेन शरोऽस्य सोढ द्वित्वमात्रनिषेधकतायाबोधक
तायाबोधनात् एवं कुक्कुटे षष्ठ्यां ङ-षयोर्द्वित्वे नुनासिकत्वे च ४८ कुगभावे ङ-द्वित्वेनुनासिक
त्वे च १२ संकलनया सप्तम्यां ११२ षष्ठ्यां संकलने १५७ पूर्वोक्तं पंचम्यांतैः संकलने ५२७ इति दि
क् तिरश्चीरिति भाष्यादच इत्यल्लोपः अल्लोपरत्वमुक्तं स्तिर्यादेशाभावः युः प्रातेति प्राप्तप्रत्यय
इत्यर्थः ननु या प्राविति त्येव सत्त्रयेनुमुचितं नपुंसके तस्यैव सर्वनामस्थानस्य संभवात् इति चेन्न
गृह्यमाणशास्त्रेण तस्यैव नपुंसकत्वे यथा स्यात् बहुवो ददतो ये पुत्रानि कुलानि बहुदददती त्यत्र मा
भूत् बहूनि ददति ये पुत्रे बहुददं तत् तत्र च यथा स्यादित्येवमर्थं ननु स्यपुंश्चेदं सत्यमाने पुंसका
दिति सूत्रे भाष्येन त्रहि नपुंसकपदं गृह्यमाणस्यैव विशेषणं गृह्यमाणाभावे प्रकृतां गस्यानुक्त

प॰ शे॰ मृ॰ इत्याहुः आक्री यत्तु नुमग्रहणं प्रतिषेधसंबद्धानुवृत्तिर्माभूदिति न च नन्तृतिः उत्तरसूत्रेणा-
प्तिनिषेधस्यैव नित्यत्वापत्तेरिति तत्र निषेधस्य प्राप्तिपूर्वकत्वेनात्र च प्राप्त्यभावेन सामर्थ्यादेव
निषेधनिवृत्तिसिद्धेः एवं च नुमग्रहणं व्यर्थं सत् वेदं ज्ञापयत्याकृत्तुरिति सूत्रे भाष्ये वेति नु संब
ध्यतएव उत्तरसूत्रे नित्यग्रहणात् न चानेनैव नुमि सिद्धे शप्श्यनोरित्यारंभसामर्थ्यादेवा
स्यैवैकल्पिकत्वं न स्य च नित्यत्वं सिद्धमिति ॥ सिद्धिरिति व्यर्थं नित्यग्रहणमिति वाच्यं वैपरी-
त्यापत्तेः तदेतद्भाष्ये उक्तं निषेधस्तावत् त्वां त्यासिकं नित्यग्रहणमिति प्रानुस्वयवरूति पररोप
।शात्तेति नुनोक्तं नुदंतीत्यादावेकादेशे कृते उभयतआश्रयणे नादिवद्भाववि रहणेन नुमभावाप
त्तेः भूतपूर्वगत्याश्रयणे त्वदतीत्यादावपि स्यात् अवर्ण श्रुतत्वाकौडिन्यन्यायात् कन्तु भि
न्नावयवएवगृह्यते ॥ शाकारेणाव्यभिचारादित्याहुः ॥ भाष्यत्याहुः शप्श्यनोः आदिति किम् भांती
त्यादौ नित्यं नुम् माभूत् नत्तु मतेति निषेधस्तु प्रत्यासत्त्या लग्न प्रत्ययनिमित्तांगसंगेनलकस्य कार्ये
एव प्रवर्त्तत इति स्पष्टं षष्ठ्यां र्धधातुकइति सूत्रे कैयटे पंचतीत्यादिवद्बहुवचनेतु नगं सकस्य गल
च इति नुम् स्यप्रति शोभनाश्चापोऽस्मिन् सरसीति बहुव्रीहिः न हृज्जनादिति समासांत निषे
धः ईतरितीत्वमपि न अपइति कृतसमासांतानुकरणात् निरवकाशत्वमिति इदं च कद्रूपधि
वत्ले र्ट्जितिसूत्रे भाष्ये स्पष्टं तत्र हि क्रादिषु पंचमेत्यत्र चर्मणोस्तीति बाधित्वा पूर्वविप्रतिषेधात्स्नि
त्युक्तं अन्यथा प्रतिपदोक्तत्वेनैव ढत्रोऽत्रो बाधसिद्धौ किं तेन कद्रिष्वमैविकारापि चर्मणोस्तिम

स्य च धर्म्मविकारवाचकाद्भिन्न इत्यर्थः नुमेवेति एवकारेण पूर्वमनेपि नुमित्यकारनिष्ठोपधात्वस्य वि
नाशो नुक्त्वत्वादकृत् तत्राह परिभाषयानुमः पूर्वं दीर्घो दुर्लभ इति सूचितं धनुरिति धौरित्ति दीर्घो न
रेफान्तस्य धातुत्वात् इति हलंता नपुंसकलिंगाः स्वरादिनिपाताः ननु प्राग्रीश्वरान्निपाताः ततः स्व
रादीनीत्यादिष्वव्ययीभावचेत्यंतं पाठ्यं ततश्चादयः असत्वे इत्यादिष्वधिरीश्वर इत्यंतं पाठ्यं तत्रा
सत्वे इत्यस्येह शास्त्रे ये चादयस्तेऽसत्वे ते यादय इत्यर्थः निपातएकाजिति सूत्रे चादिरेकाजिति पा+
ठं तेन स्वाचिदर्तिणास्तीतिष्वतिकास्तीत्यादौ हस्वश्चेत्यादौ च न दोषः एवं च संज्ञाहार्यं स्वर्थे र
तिचेन्न अव्ययमिति महासंज्ञावललभ्यगौणव्याप्तिरूपफलासिध्यापत्तेः स्वरादावपि निपाता।
श्चाघकदाचारित्यापत्तेश्च नहि तत्र चादयइति पठितं शकंध्वादीनामसंग्रहापत्तेः संग्रहे वा कथा
दियोगाभावे प्याघकदाचित्वापत्तिः एतेनाकडारस्यैनाव्ययसंज्ञामात्रेण निर्वाह इत्यपास्तं स्वरित्या
दि प्रयोगस्यानामनुकरणान्येतानि नचानुकार्यानुकरणयोरभेदविवक्षया प्रातिपदिकत्वाभावे
नस्त्वनुत्पत्तिः भूसत्तायामित्यादिवत् तेन विसर्गादिकं न स्वरादीनां शक्तिमत्प्रधानता स्वश्चागतः
स्वःस्थितः स्वः पश्येत्यादिप्रयोगदर्शनात् उच्चैरित्यादिनु अधिकरणशक्तिप्रधानं शब्दशक्ति
स्वभावात् हिरुगादीनां च क्रियाप्रधानत्वं वद्यत्यादौ धात्वर्थत्वेन दृष्टस्यात्रापि प्रतीतेरसत्वभूतता
त्वक्रियाविशेषणत्वात् इत्याहुः सायं चिरमिति मान्तत्वे सायं चिरं प्राह्णे प्रगे इति सूत्रे त्वनव्य
यभूताकारान्तयोः प्रत्ययसंनियोगेन मान्तत्वं निपात्यत इति स्पष्टं तत्रैव भाष्ये नन्वेवमपि मान्ता

263

प्रा॰ शे॰

व्ययात्तुटस्ये चिरंतनमित्यस्य सिद्धत्वेन चिरशब्दात् ट्युट्युलोर्न्ययोः स्य च तत्र शब्दस्ययेनैव बाधसिद्धेः
स्तत्र चिरंग्रहणं व्यर्थमिति चेन्न अव्ययत्वप्रयुक्तट्युट्युलोरनित्यत्वज्ञापनेन चारितार्थ्यात् तेन
सायंप्राप्तिकरत्यादि सिद्धमित्याहुः केचित्तु तदभाष्यप्रामाण्यात् चिरमित्यव्ययमप्रामाणि
कमित्याहुः वदिति तेन तुल्यमित्यधिकारे तत्र तस्येवेति विहितः तस्य च नामार्थयोरभेदान्व
यानुरोधात् धर्मिप्राप्तिनामाश्रावश्यकत्वेन लिंगसंख्यान्वयि विशेष्यसमानाधिनाधिकरणत्वेन च
सत्ववाचकत्वान्महासंज्ञया तद्धितश्चेत्यप्राप्तेरह पाठसामर्थ्यात्तत्वेपि संज्ञासिध्यति न च त
स्यैवार्थे: अभेदान्वयप्रयुक्तेरोचाव्ययातिरिक्तत्वं विशेषणं देयमिति वाच्यं गौरवापत्तेः एवं
चेवादीनामपि पाठसामर्थ्यादेव स्वरादिवदव्ययसंज्ञेति बोध्यं तेन तुल्यमिति विहितस्य तु सद
शवाचकत्वेपि असत्वभूतक्रियासमानाधिकरणत्वेनासत्वभूतत्वान्नैनैवसिद्धा संज्ञा उपसर्गो
क्तं दसीति विहितस्य तु क्कादसत्वादेव न संज्ञेति बोध्यं यदि तु स्तोकादीनां क्रियाविशेषणत्वेपि स
त्ववाचकत्ववत् ईवादीनां सत्ववाचकविशेषणत्वेपीवादीनां शक्तिप्राप्तिस्वभावात्तत्रसामान्यलिंग
संख्याद्यन्वयित्वमित्यसत्ववाचित्वमेवेति विभाव्यते तदा वत्ग्रहणं व्यर्थमेव तद्धितश्चेति सूत्राणि
त्यत्वज्ञापकं वा तेन परिगणनं सिद्धमित्याहुः अंतरांतरेणेति अंतरांतरेणयुक्ते इति सूत्रभाष्येन।
योर्निपातत्वोक्तेः स्वरादिष्वनयोः पाठः प्रक्षिप्त इति केचित् विनानानेति अनयोस्तद्धितश्चेत्येव
सिद्धेः खण्डयोरर्थांतरे व्ययत्वार्थे नानेत्यस्यां नोदात्तत्वार्थं च पाठ इत्याहुः अस्तीति विभक्ति

प्रतिरूपकत्वादेव सिद्धे धनवाचिनः स्वत्ववचनस्याव्ययत्वार्थं पाठ इत्याहुः ये आस्वस्तिमानिनि वि
भक्ति प्रतिरूपकत्वे विनिगमनाविरहाकरूतोर्थश्चेति न धनवाचिनः प्रानितित्यपरे नमस्सिति
महस्सां नमस्त्वामिति प्रयोगस्तु स्वत्ववाचकत्वेबोध्यः अमूस्त्रामिति शौर्ध्यांगीकारादर्थोपलभ्य
योभिन्नावेव प्रतामप्रशामामिति प्रतानिति तां ताव्ययस्य पृथक्पाठसामर्थ्यान्नुतामित्यव्यया
स्य प्रयोगे नत्वाभाव इत्याहुः अव्ययमित्यन्वर्थसंज्ञाबलादसत्वार्थकस्य धर्मवाचकस्याव्य । द्य.
यत्वम् न धर्मिवाचकस्य अत एव प्रशामो प्रतामावितिभाष्यादुदाहृतं संगच्छते अव्ययाल्य
विति सूत्रे भाष्ये ग्रामविशेषणवाचिनः प्रातरादेरुस्याव्ययत्वे स्वीकृते न च प्रशानुरिति ग्राम्य
तेः क्विवन्तस्य रूपमितिकल्पनेनं तत्सूत्रभाष्यकैयटादौ स्पष्टं एवं प्रशानितिनांतगणे पाठोऽ
युक्तः स्वरित्यादिवत् गणे विभक्त्यनुकूलेर्विति वाच्यं प्रशामिति मांतपाठस्यैव सांप्रदायिकत्वात् प्रयो ।
गस्य कृतनस्यानुकरणं वा कृन्मेजंत इति सूत्रे भाष्ये स्वरसोप्येवमेवेन ज्ञायते आदिप्रशमानिकः पाठः अत एव
अव्ययेन सकृन्नयानामित्य सूत्रभाष्येनिपातानां पृथक्कन्नत्याद्युदितं इत्याहुः तत्र नञ्सूत्रे भाष्ये ऽस्य द्योतक
तायाउक्तत्वात् अत एव नञ्नञ्ग्रहणस्य स्पष्टार्थमिति कैयटो व्याख्यात् अकरणिरित्यादौ परस्यापि
कृत्स्वरस्य बाधनार्थं नस्य सत्वात्स्वरादिपाठस्तु विंत्यप्रयोजनः एवं माङोपि यत्तु सत्ववचनानाम
व्ययत्वार्थं स्वरादिपाठ इति तन्न सत्ववाचकस्य माङ्त्वाभावात् न च ङकारोऽविवक्षितः लक्ष्मीवाचक मा इत्यस्य पृथ
मा शब्दस्याप्यव्ययत्वापत्तेः यावत्तावदकृत्वाबुत्पत्तौ उपसर्गविभक्ति अत्र प्रतिरूपकत्वे विनिगमनाविर क्पाठे वैयर्थ्याप
तेः

श०कौ०

हादर्थेनः शब्दस्तस्य प्रयुज्यते विनीतो वामित्र त्वापि वामित्यस्य कर्मत्वेन समानार्थत्वमस्त्येव तत्र हि न
त्वयमोर्नं स्वरादेशोऽनुनार्थेनः अनव्ययत्वाच्च रस्यापि च परनिपातः एतेन युगपन्नीत्यादिप्रयुक्त्यन्त्या
श्रयणेन युगपदित्यादीनां विभक्तिश्रुतिरूपकत्वादेव सिद्धे तेषां गणे पाठो व्यर्थ इति परास्तं ध्वनि
तेऽचेदं मनुसूत्रे भाष्यकैयटयोः एवं तदित्यपि लुप्तषष्ठ्यन्तादिभक्ति प्रतिरूपकमव्ययम् अत एव
वाविघातस्त्रितोर्योगः तन्नदर्थविभागरत्यादौ त्यदादीनि सर्वैरिति नैकशेषः नापि विभक्तिश्रवणं
त्यदादिषु साहचर्येणानव्ययस्यैव ग्रहणादित्याहुः अवदत्तमिति ननु क्रियायोगादत्रोपसर्ग
त्वमेवास्ति न चैवमुपसर्गात्तः इत्यस्यापत्तिः अवदत्तं विदत्तं चादिकर्मणि सुदात्तमनुदत्तं चनिद
र्शमिति च व्यतरत्तिभाष्योक्तेः एतेन दत्तवत्तः नचेदमत्राप्यसिद्धार्थकथनमेव प्रदत्तं चादि
कर्मणीत्यस्यासंगत्यापत्तेरिति चेन्न साक्षात्प्रधानतत्त्वविधिवाधापेक्षया गुणभूतोपसर्गस
ञ्ज्ञावाध एव तेन भाष्यवचनेन वोध्यत इत्याशयात् निपातत्वाव्ययत्वयोः फलं त्वव्ययपूर्वपद
प्रकृतिस्वरत्वमेवेति वोध्यं प्रादयइतियोगविभागसिद्धार्थकथनमेवेदं प्राकृतीति अहरन्यह
नीत्यर्थे एवमोमिति स्वरादिषु अवतेष्टिलोपश्चेति वचनाद्बहुलग्रहणात् अङ्गीकारे चोमिति सिद्धं अथ
उञ्चम् चेति प्रयुक्त्यन्त्या व्याप्तिवादिवाचकं वा स्वरादित्वमुभयोरपि अविशेषात् नचाद्यस्य कृन्मेजन्त
इत्येव सिद्धं चिरमव्ययमित्युणादिपठितेन नियमादप्राप्तेः उणादिप्रयुक्त्यन्तानां चेजादि स्वराद्य
पठितानां भवति न दाच्छन्तानामेवेति तदर्थात् अन्यथाच्छन्तानां निपातत्वादेव सिद्धे तत्पाठो

र्थ एव स्यात् इति दिक् । एवं मतिशयेन साधु इत्यर्थे साधीयः इत्यपि अत एव कथं साधीयः इत्यादि तत्र तत्र
भाष्यप्रयोगः । इत्थं च द्वैविध्यं उभयोरप्यक्तानिगमत्वेपि येषानि यान्स्वरः ईदृशस्ते चादिषु अन्ये स्वरादिषु स्वर
दृश्यमानस्तु भयत्रेति । सर्वे शब्दः प्रकारकार्त्स्न्ये यथा सर्वान्नीनो भिक्षुः सर्वप्रकारान्नभक्षक इत्यर्थः ।
अस्ति चावयवकार्त्स्न्ये यथा सर्वः पटो दग्धः इति न त्वाद्यो न गृह्यते अव्ययेभ्यः सर्वे सामेकवचनानि
उत्पद्यन्त इति पक्षे स्त्रत्वस्यासंभवादुक्तिकल्प्यापत्तेः अतो द्वितीयस्यैव ग्रहणं इत्याशयेनाह यस्मात्स
र्वैति वचनत्रयात्मिकेत्यर्थः त्रिके एव प्राचां विभक्तिव्यवहारात् नेति किं त्वेकवचनमेवोत्पद्यत
इति भावः ननु कर्मणि द्वितीयाद्येकयोरित्यादीनां स्वादिवाक्ये नैकवाक्यत्वात् अव्ययेभ्यः स्वादी
नां प्राप्तिरेव नास्ति न चार्थे प्रथमेत्येव सिद्धे प्रातिपदिकग्रहणसामर्थ्येनासत्त्वभूतार्थेभ्यः संख्यात्वेपि
प्रथमेति भाष्यकैयटयोरुक्तत्वेन कथमत्र स्याद्यप्राप्तिरिति वाच्यं [illegible] समानाधिकरणे प्रथमेत्या
दिन्यासे एतद्दूषणानुद्भावनेन तत्पूर्वस्यास्य न्याय्यस्य प्रौढिवाददत्त्वबोधनेनाहतेरित्यादि स्पष्टम
क्तत्वभाष्यप्रदीपोद्योते अव्ययादाप्सुप इति लापकाश्रयणपक्षे च सर्वोऽप्यपीति किमुच्यते सर्वानाम्
वेत द्यत इति संसामर्थ्यात्सर्वेत्यस्य सर्वधर्मविशिष्टा विभक्तिरित्यर्थः एवं च लापकाद्युत्पन्नानां निरर्थ
कत्वेन विशिष्टविभक्तीनां नुत्पत्तिरस्त्येव कर्त्राद्यर्थप्रतिपादकत्वासंभवस्यापि विभक्तिः [illegible] धर्मित्यादि तिमिग्धपक्षो
व्ययादाप्सुपः बहुषु वचनमित्यादिसूत्रे भाष्ये स्पष्टः न चैवं पचति कल्पमित्यादौ विभक्त्युत्पत्तिः श
दृशक्तिस्वाभाव्येन नपुंसकलिंगेनैव एकत्वसंख्ययापि तद्वाच्यार्थयोगस्वीकारात् दिवादिके तु न

प्रातिपदिकात् प्रथमैवेति अआदिरर्थनियमः अत्र पक्षे सर्वाः सप्तापि विभ
क्तयो व्ययेभ्यो विभक्तीनामनियतत्वादिति वृद्धिहित्यत्र भाष्ये स्पष्टं

265

प्रा॰ प्रो॰ भेदेन क्रियायाः अनुपस्थितेः अत एव तत्र नियतैकवचनमेवेति बोध्यं पाठान्तरं यद्वाभिन्नवाक्यतया नियमः अ
त्र पक्षे सर्वेष्वर्थेषु प्रातिपदिकात्सर्वविभक्त्युत्पत्तौ लोपेनैव तात्तस्य निवृत्तिः एकप्रकृतेकथं सर्वेषां परत्वमिति
चेन्न विधेयतया प्रधानप्रत्ययानुरोधेन गुणभूतप्रकृतिभेदकल्पनात् नियमेन प्रत्ययनिवृत्तौ च गुणः खल एव
निवर्तते सच द्विविधोर्थनियमः प्रत्ययनियमश्चान्त्योपि द्विविधः प्रकृतार्थापेक्षः सामान्यापेक्षो वा इदं पक्ष
त्रयमपि सार्वधातुके यक् वृद्धिरित्यादिसूत्रेषु भाष्ये स्पष्टं तत्र कर्माद्यर्थयोग्यप्रातिपदिकाद् द्विभक्तिस्तदा
द्वितीयैव कर्मादिरहिततद्योग्यप्रातिपदिकार्थे ताद्दृशात्कर्माद्यर्थयोग्यप्रातिपदिकाद्द्वितीया कर्मण्येव करणादौ मं ६
संख्यावदर्थयोग्यप्रातिपदिकाच्चेत् एकत्वादावेवैकवचनादि न द्वित्वादावित्यादिः प्रकृतार्थापेक्षः प्रत्ययनिय
मः तत्र न करणादावित्यादिशब्देन कर्मादियोग्यतद्रहितप्रातिपदिकार्थस्यापि ग्रहणं ताद्दृशात् प्रातिपदिका
त्तेन्नदर्थे एव प्रथमा न कर्मादाविति च प्रथमानियमः अत्रापि पक्षे व्ययेभ्यः सप्तापि विभक्तयः संपूर्णा इत्यपि त
त्रैव भाष्ये अत्र द्वयेपि सर्वा विभक्तिर्नोत्पद्यत इत्यस्योक्त एवार्थो भाष्ये स्पष्टः अथ प्रातिपदिकाच्चेद्द्वितीया कर्म
ण्येव नान्यत्रेत्यादिः सामान्यापेक्षः प्रत्ययनियमस्तदाव्ययेभ्यो विभक्तिर्न प्राप्नोतीति ज्ञापकादेव सेति वृद्धिरि
त्यत्र भाष्यं तथा हि द्वितीयादीनामभावस्तावत्स्पष्ट एव प्रथमापि न प्रातिपदिकार्थसूत्रे मात्रग्रहणेन पर्युदा
सन्यायेन च प्रातिपदिकाच्चेत्सा कर्मादियोग्यकर्मादिरहितप्रातिपदिकार्थ एव नान्यत्रेत्येवं तन्निमात् किंचा
ताद्दृशनियमासंभवोपि तत्रैव भाष्ये उक्तः सुबन्तानि ङा च संख्या कर्माभयार्थान्वेन कर्मण्येव नान्यत्रेत्यादेवक्त
मशक्यत्वात् पचति कल्पमित्यादौ क्रियायाः कर्तृत्वकर्मत्वस्वीकारेण शाकशक्तिस्वाभाव्यान्नपुंसकलिंगे

त्रिविकल्पासिद्धिः ननु संज्ञाभूतोनेहोदाहरणमूतस्याभाषितपुंस्कात्वेनैनैव सिद्धेरिति चेन्न संज्ञाहु
रणेपि श्चेत्यनेन पुंवद्भावनिषेधेन संज्ञायामपि भाषितपुंस्कत्वबाधनात् आत्मीयत्वपुरस्कारेणैव
संज्ञाकरणात् अत एव निषेधान्नसिलादिष्विति पुंवद्भावो न केण इति हस्वेन परत्वाद्बाधाच्चेतिस्य ष्टं पुकपप्रत्ययपाठे
भाष्ये नित्यमेवेति तत्र ह्यकचित्कृतेऽत्रातः स्थानिकत्वाभावइतिभावः यत्तु यत्नोज्ञातिधनयोः स्व पितासिलादि
कात्स्विके न्युक्तं तच्चिन्त्यं तयोः स्त्रीलिंगत्वाभावात् न च स्वार्थिकाः क्वचित्प्रकृतितो लिंगवचनान्यति
वर्त्तन्तेइति न दोषः उक्तरीत्याकप्रत्ययान्तात्संभवेपि प्रकृतेरस्त्रीत्वादातस्थानेइत्वं शासस्य इरूप
पादत्वात् नन्वात्मीयवाचिनोपि ज्ञासि सर्वनामसंज्ञायावैकल्पिकत्वात् कप्रत्यये सतीत्वविकल्पो
दाहरणत्वं संभवत्येवेति चेन्न अर्थाधिकारेण प्रीभावाख्ये कार्य एव विभाषा पूर्वनामत्वात् वस्तुत
स्तु नित्यमेवेत्यस्याकज्विषय इति शेषः संज्ञोपसर्जनीभूतइत्यपि अकज्भाववदुपलक्षणं अ
त एव स्वाशब्दादत्वं न स्वार्थिके के इत्वविकल्पो भवत्येव नत्वकजन्तं न स्याकारे इ पादवयस्यार्थिका
स्याप्यपवादः एतेन मुनेर्मनोर्वृत्तिरिव स्विकायामिति व्याख्यातं येत्वकच मत्रोदाहरणं उत्काभस्त्रे
षतीत्वविकल्पमुदाहरंति ते देवानांप्रियाएवेति दिक् कृतषत्वेतिभस्त्राशब्दस्याहचर्येण व्याख्यानेनत्व
क्तानुपूर्वीकस्यैव एषा सदृशस्य ग्रहणादिति भावः अत एव बहुकत्वेपि भस्त्राशब्दस्य पूर्वनिपातः
त निर्णायकत्वेनाभ्यर्हितत्वात् अत एव एषा द्वन्द्वे न पूर्वं अनुहरण इति भाष्येपि एषेत्येवोक्तं सूत्रे रूपस्यावि
विवक्षितत्वेनतु एतद्धीत्येव वदेदिति दिक् निःस्वकेति स्वस्यानिष्क्रान्तेति विग्रहः उपसर्जनह्रस्वः

प्रा·प्रो· दापूर्वतोऽज्ञाताटेकः ननु स्विकस्याद्युतितथा सत्यतस्मात्ः स्थानिकत्वाभावात्स्वकृतनस् आप्राप्तिरेव।
स्यादत्रव देति स्त्रीलिंगनिर्देशादजादयः स्त्रीलिंगा एव गृह्यंते तेन शुभ्रोज्ञोयस्याः शुभ्राज्ञिका प्रियो
ज्ञाय स्याः प्रियज्ञिके त्यादौ नेति अभाषितपुंस्कात्तु स्त्रीविषयात्वेतितु नोक्तं स्त्रीनपुंसकलिंगा+
दामशब्दात्तु अपि अज्ञातादामिका दामाका दामके त्याद्यसिध्यापत्तेः विहितस्येति अनएव बहुव्रस
त्रेभस्त्राग्रहणमुपसर्जनार्थं अनुपसर्जनत्वेनैव सिद्धमिति भाष्ये उक्तं परविशेषणे हि अभाषि
तपुंस्कभस्त्राशब्दात्परत्वस्य सत्वेनोपसर्जनेपानेनैव सिद्धे स्यादसंगतिः स्पष्टैव विहितविशेषणे।
फलमाह बहुव्रीहेरिति अविद्यमानाखट्वाय स्या इति बहुव्रीहौ वैकल्पिकत्वात्समासांतकबभावे+
गोस्त्रियोरित्युपसर्जनह्रस्वत्वे खट्वशब्दादपि सुप्यज्ञाताटेके सुपुल्लुकि केण इति ह्रस्वे पुनःखट्वाभा
षितपुंस्काद्धिहितकारस्थानिकाकाराभावेनातिह्रकत्वापत्तावुत्सर्गेण नित्यमेवेति भावः बहुव्री
हेरित्युपसर्जनोपलक्षणम् तेन निःखट्विके त्यादावपि नित्यमेवेत्वम् शेषिके कपि इति अयंभावः
बहुव्रसहखट्वाज्ञसकृत्यस्यामवस्थायां शेषाद्विति कपि सुब्लुकि प्रत्ययलक्षणेन भागद्वयस्यापि
सुबंतत्वात्समासैकदेशस्यैव समासत्वेन उपसर्जनस्त्रीप्रत्ययांतत्वात् समासरूपप्रातिपदिकाभा
वाद्गोस्त्रियोरिति ह्रस्वत्वाभावे केण इति ह्रस्वत्वेच नकपीति निषिद्धे आपोऽन्यतरस्यामिति ह्रस्वप
क्षेकपः प्रागवर्त्तिनः खट्वशब्दात्परस्यापोऽभाषितपुंस्काद्धिहितत्वेन तत्स्थानिकाकारस्याद्येवि
कल्पाइति ह्रस्वाभावेच खट्वाकेत्यपि बोध्यं संगाकेति एवं मेनाशब्दात्के मेनका मेनिका मेना।

तेन स्वंदरावूरू भित्त्रो यस्याः सा स्वंदरोरुभित्त्रेत्यादौ न ङीषु मध्यमपदेन व्यवधानात् जातिश्चैवो
दितीहापि संबध्यते बहुनञादीनामुत्संगतेन परत्वादिकल्पस्यैव शाञत्वेन शृवंस्तेनस्य फलाभावात्
न धनयत्राह नित्यशञत्रेति एतेन उत्रहृतीत्यादावनेन ङीषिति कैयटः परास्तः न च पुत्रशब्दो जातिवचनः
आकृतिग्रहणत्वाद्यभावात् अत एव पुत्रादिनीत्यादौ सुप्यजातावितिणिनिः जातिकालसुखादिभ्य
नित्यस्त्रेजातेः किंपुत्रजातः इत्तिश्चत्रिग्रथ्यप्रसंगकेत पुत्रहृतशब्दस्यांतोदात्तत्वाभावाच्च केचित्तु उद्दृहजा
तेति निःपुत्रेतोदात्तत्वादिति च न संबध्यते वा ग्रहणं च व्यवस्थितविभाषार्थं तेन नातिप्रसंगः अत एवात्र
पुत्रपदग्रहणं सार्थकमित्यनुपदं स्फुटीभविष्यति अयमेव कैयटाशयः इत्याहुः न च स्वांगात् इत्या
वसिद्धे पूर्वपदग्रहणं व्यर्थं मुखेन स्वरापीतायया सा मुखस्वरापीतेति त्रिपदबहुव्रीहौ ङीषापत्तेः
मध्यमपदादस्वांगात्परत्वात् क्तांतस्य न चांतोदात्तत्वाभावादेव न तत्रातिव्याप्तिः जातिकालेत्यनेन
हि पूर्वपदस्य तजान्यादिभ्यो व्यवहितपरक्तांतोत्तरपदस्य बहुव्रीहौ तद्विधानादिति वाच्यं उत्तरार्थ
मावश्यकत्वात् तत्रयंतोदात्तादिति नानुवर्तनं इति स्पष्टं भाष्ये स्वस्त्रकैतेति बहुव्रीहित्वे ग्रहणं पूर्वपदप्रकृ
तिस्वरे पूर्वपदनिधानो चानुदात्तोन्तो यमुखाङ्गो या अत्रापि उपसर्जनादिति संबध्यते असंबंधे मानाभा
वात् नद्योपसर्जनस्वांगांतस्य विशेषणम् तेन कल्याणः स्वंदरमुखोयस्याः इति बहुव्रीहौ हि गर्भबहु
व्रीहौ ङीषित्याहुः तदंतादिति बहुव्रीहेरितिश्चवर्तमाने उपसर्जनग्रहणफलं दर्शयति अतिकेशी।
ति अत एव बहुव्रीहेः क्तांतादंतोदात्तादिति निरस्तमिति बोध्यं शिखेति यत्तु भाष्ये ऽशिखेत्युदाहृतं तत्र
स्याप्येकदेशोतात्पर्यम् बहुव्रीहावुपसर्जनग्रहणे कृते पि दोषस्पष्टुवीरत्वेनतस्यु स्वंदंतत्वाभावेनश्च

301

शा॰ शे॰

प्राभावात्समुदायपरत्वे भाष्ये बहुव्रीहावुपसर्जनग्रहणे कृतेपि दोषः स्पष्ट एवेति रत्नेन तत्त्वं स्पष्टं तत्त्वात् संग
ततापत्तेः नञ्पूर्वकत्वे सह नञ्विद्यमानेति निषेधनञः प्राभावाच्च प्रचुरपाठस्तु भाष्येपि स्मृतिरित्येव धनय
त्वाह शोभननासिकास्त्रियामिति एतेन शिखाशाहुः क्रोडादिषु पठ्यत इति निरस्तम् फलाभावाच्च न
नुत्वमंगं त्वाङ्गमेवं वस्तुतः शिखाशालेत्यत्रापि स्यात् सुखस्य शालांगत्वात् सुकेशी रथ्यात्पत्रवनस्या
त् केशानां तद्गत्वाभावात्स्वतश्चाह अद्रवमूर्तिस्पर्शसमानाधिकरणद्रव्यपरिमाणं मूर्तिः सम्
ख्याशालेति एवं च फलमुखीकरणामुखीचार्त्तेस्यत्यादिप्रयोगाः प्रामादिका इति बोध्यं रथ्याति रदा
नीशाणिस्थत्वाभावान्न पूर्वलक्षणेनासिद्धिरिति भावः एवं च पूर्वलक्षणे शाणिस्थत्वं उपलक्षणमि
त्यत्रार्थे तात्पर्यग्राहकं बोध्यं प्रतिमादिगतस्तनस्य प्राणिनि कदाप्यदृष्टत्वाददृष्टेनेन चेदिति श्वतन्त्य
मित्यनुपद्यते अप्राणिस्थमपि स्वांगं यदि तेन वत्सनाशाणीय थासेवट्टः एवमशाणीति न संवर्ण
स्वरित्यर्थः तस्य चेदिति भाष्यपाठः तत्र करणस्यैव शेषत्वविवक्षायां षष्ठी बोध्या उपसर्जनं चात्र शा
स्त्रीयमेव गृह्यते कृत्रिमत्वात् गोस्त्रियोरितिवत् तेन कल्याणपाणिपादेत्यादौ न ङीष् अत्र हि य
दुपसर्जनं पाणिपादमिति समुदायः न स स्वांगं समुदायश्च न स्वांगशब्देन गृह्यत इति स्पष्टं भाष्ये
यश्च स्वांगं केवलपादशब्दो न स उपसर्जनम् न च समाहारद्वन्द्वार्थे प्रतीतस्य पाण्युपसर्जनत्वमस्त्येवे
ति वाच्यं अत्यायतः प्रातिपदिकान्ङीषि विशेषणभूततदर्थे प्रत्युपसर्जनीयाएव विवक्षितत्वात्
अत्रास्वांगपूर्वपदादित्यनुवर्तने कर्मधारयश्च अस्वांगभूतपूर्वपदान्तं यत्स्वांगं तदंतादित्यर्थः
स्पष्टं चेदं भाष्ये तेन करमुखत्वादौ त्रिपदबहुव्रीहौ च न एवं च करमुखीत्यादयो ये प्रयोगा एव

अत्र पूर्वपदशब्दो यौगिक अत एवा

इदं तु सुंदरमुखीत्यत्र पूर्वपदे उपमानसमासगर्भबहुव्रीहौ बोध्यं त्रिपदबहुव्रीहौ तु न भवतीत्याहुः प्रायः
पीतिसूत्रे भाष्ये स्खलत्खलीनमुखीकन्येति दर्शनेन च कर्मधारयपूर्वपदो बहुव्रीहिर्बोध्यः पुरस्तादिति सत्व
नेनरस्यैव बाधकः मध्ये इति सहिपूर्वस्यैव बाधकः प्रामाणिका इति एवं च सुगात्रीत्यादयोपप्रयोगा एव नि
त्यमित्येवेति अत एव भाष्ये नोपदर्शनोदाहृतम् कवरएणीत्युत्तरं पठितं चेत्याहुः नक्रोडाश्रस्वानामुर इति
टाबंतक्रोडाशब्दस्य स्वभावतो विशेषविषयत्वमिति भावः तेन समासे उपसर्जनह्रस्वत्वे दंतत्वा त्वाप्तिः न ना
क्रोडं भुजान्तरमित्यमरः क्रोडमुत्संगे पुमानपि स्त्रूकरे च गणे च टाबंतमेव पठ्यते तेनान्येन समासे ङीष्
भवत्येवेति माधवः हरदत्तस्त्वरसो व्यवंगणे क्रोडेति प्रातिपदिकमात्रं पठ्यते न तु टाबंतं एवं चाविशेषाल्लिं
गत्रयेपि उदाहरणं बोध्यमिति गणं रत्नेशम् सदनम् अत्र सहनञ्विद्यमानेष्व इति वक्तव्ये पूर्वग्र
हणं विद्यमानकल्याणमुखेत्यादौ व्यवहितेपि निषेधार्थमिति बोध्यं शूर्पणखेति पूर्वपदात्संज्ञाया
मिति णत्वं यदा तु केवलयौगिकस्तदा न ङीष् निषेधो न वा णत्वम् शूर्पनखीत्येवेत्याहुः ङीवादेश
ति स्वतंत्रतया विधायकत्वे तु प्राग्गुल्फादावपि प्रसङ्गेन अस्संयोगोपधादित्याद्यनुवृत्त्या स्वतंत्रप्र
त्ययविधाने तु प्रतिपत्तिगौरवं दिक्पूर्वपदादिति पंचम्याच मङीषिति प्रथमायाः षष्ठीकल्पनमिति
भावः नङीवीति अस्वरितत्वादित्याहुः सख्यशिश्वी इति भाषाग्रहणं विशिष्टोच्चारणं च वाग्रहणनि
वृत्तिबोधनद्वारा भाषायां नित्यत्वबोधनार्थम् विशिष्टोच्चारणादेव वाग्रहणनिवृत्तौ भाषायामिति
चिंत्यप्रयोजनं कंदासीत्यस्य तु न स्वाङ्गत्वं दिक्पूर्वपदादित्यादौ वृत्तिकाङ्गिरसं वेधात् केचित्तु दि

शा०श्रो० गित्तिस्तत्रेवाहइत्यूचक्केदसीतिवर्त्तनेलोकेत्वांनोदात्तमेवप्राप्तमस्तीति एवंच तन्निवृत्तिनिबोधनाय भाषाग्रह
णं इति शब्दस्यार्थे तेन चक्केदस्यपीत्याहुः ङ्यमिति सूत्रे सख्याशिश्वीति भाषायामिति च घटितसूत्रपाठः
क्वचिदिति सर्वविधीनां छंदसि वैकल्पिकत्वादिति भावः तेन सख्यासन्नपदी भवेत्यादि सिद्धमित्याहुः
अशिश्वीति न विद्यते शिशुरस्या इत्यशिश्वी अथ नवाधुनयंतामशिश्वीरित्यत्राद्युदात्तत्वं नु अशिश्वीशब्द
स्यच्छांदसत्वादिति बोध्यं यद्वेति शब्दः काकाक्षिन्यायेनोभयात्वपि तेनाद्युदात्तयोरप्यनेनैव साधुत्वमित्याहुः
जातिशब्देन स्ववाचकशब्दो लक्ष्यते अर्थे कार्यस्यासंभवात् स्वरूपं तु न गृह्यते ऽस्त्रीविषयादित्यादेर्वैयर्थ्य
र्थ्यापत्तेरित्याहुः जातिवाचीति अनन्यभावे विषयशब्द इत्याह न चेति ननु नित्यत्वे सत्यनेकसमवेतत्वे सत्ये
का जातिरिति वक्तुमशक्यं देवदत्तत्वत्रापि ङीषापत्तेः देवदत्तत्वादेर्बाल्याद्यवस्थाभेदभिन्नानेकदेहवृत्तित्वा
नुस्यूतत्वादि गुणस्यैकत्वनित्यत्वपक्षे शुक्लत्वस्यासिद्धेश्चोत्पन्नत्वाद्दशानां कतिपयानामेवात्र शास्त्रे तत्वेन ग्रह
णमित्याह आकृतीति ग्रहणमिति कर्मणि ल्युट् सामान्येन पुंसकं आकृतिः संस्थानं संस्थानमाकृतो
त्यावितिको शब्दात् संस्थानं अवयवसंनिवेशः आकृतिग्रहणं यस्या इति बहुव्रीहिः तदाह अनुगतेनेति इदंशा
कारो गौरिति आकृत्युपदेशव्यंग्येत्यर्थः नन्वेवमपि वृषलत्वादीनां जातित्वेन स्यात् अवयवसंस्थानस्य
ब्राह्मणादिसाधारण्यात्र सा आकृत्युपदेशव्यंग्या किं तु मातापित्रुपदेशगम्यातो लक्षणांतरमाह लिं
गानामिति कर्मणि षष्ठी सर्वाणि लिंगानि न भजतीति सर्वशब्दस्य लिंगापेक्षत्वात्वापि किमोदनः शाली
नामिति वज्राद्यप्रामाणानुभज्जो णिवः समासश्च आख्यातमाख्यातेनंउपदेशोतेन चामने न चानेकसम

वेतत्वमुपलक्षितं तदाह अस्सर्वलिंगत्वे सतीत्यादिकथनात् उपदेशादित्यर्थः व्यक्तांतरेति तत्वसमा
नकालिकत्वेन विशेषणीयमनेनापर्णादुर्गाशिवेत्यादौ न ङीष् अन्यथा कलाभेदेन दुर्गाशरीराणां
भिन्नत्वात् अनेककल्पस्थापि मार्कंडेयादिभिः सकृदाख्यानग्राह्यत्वाच्च तत्वापत्तेः अत एवेंद्रत्वादिकं
न जातिः अत एवेंद्रपीतशाखो वज्रीहावाद्युदात्त इत्याहुः एवंलक्षणेनापींद्रत्वादीनां न जातित्वं समा
नकालिकानेकव्यक्तिवृत्तित्वे सतीत्यनेन तत्रापि विशेषणात् सर्वकल्पेंद्राणामवयवसंनिवेशस्यैक
त्वेमानाभावेन तद्व्यंग्यत्वाभावात् इंद्रत्वस्य तज्ज्ञानकर्मान्नरकालिकत्वेन नित्यत्वाभावाच्च नन्वेवं ब्राह्म
णत्वादेर्जातित्वं न स्यात् तस्योपदेशगम्यत्वे पि एकत्र कथितेन्यत्र सुग्रहत्वाभावात् एवं च ब्राह्मणीभा
र्येत्यत्र जातेश्चेति पुंवद्भावनिषेधानापत्तिरिति चेन्न तन्मित्रादिषु सुग्रहत्वेनालं तेषु पलत्वस्य तदप
त्यतत्सहोदरादौ सुग्रहत्वाच्च अस्य सर्वलिंगत्वे तटीत्यादावसंभवादाद्यमुक्तं जलसमीपदेशविशेषस्यै
वतद्वाच्यत्वेन तटत्वादीनामनुगतसंस्थानव्यंग्यत्वात् युवत्यादिकं तु आकृतिग्रहणमपि न जातिः
नित्यत्वाभावात् अत एव वृद्धेत्यादौ न ङीष् युवजानिरित्यादौ च पुंवद्भावः पुंवति तरेत्यत्र तु इत्याह
त्रभाष्योदाहरणप्रामाण्यान्न पुंवद्भावः न चाद्यलक्षणेन नित्यत्वे ऽविशेषसकृदित्यादिसंबंधेन तेन नि
त्यत्वादीनामुपलक्षणात् तथा हि यद्येकानस्यान्नैव सेत गोत्वे गृहीते ऽश्वत्ववतः तथानित्यत्वा
भावे पिंडेन सह विनाशात् पिंडांतरे न गृह्येत एवं प्रत्येकं सर्वात्मना समवेतत्वाभावे यत्राप्याता
तत्रापि पिंडे सर्वात्मना न गृह्येत किं तु नः पिंडांतरे स्पष्टं चेदं पदं तत्र योगं ध्वनितं केयटेनेत्याहुः

तंत्रिकोक्त
नित्यत्वादी
नामत्राप्यु
पलक्षणादि
त्याहुः

२२

303

पा॰ शो॰ अपरेतु यथाभाष्यं तथाकृतिग्रहणाज्जातिरव्यक्तिरितिलक्षणं नित्यानित्यानित्यसाधारणं अत एव याव
द्द्रव्यभावित्वे सति गुणसमानाधिकरणत्वमिति अनित्यव्यावर्तकं लक्षणं न रमपरस्त्वाहेत्यादिना दर्शि
तं एवं च भिन्नऋषिकत्वं लक्षणद्वयप्रामाण्येन कुमारादिशब्दे जातिकार्यविकल्पः फलति वृद्धेषा
दीत्यत्र जातिपाठाद्वा पुं अत एव युवजानिरित्यत्र पुंवत्त्वं युवतिजरेत्यत्र पुंवत्त्वाभावो भाष्योदाहृत इति
वदंति अत्र पक्षे गोत्रादिषु न तकुणं न तु न पाठे फले चित्यं सप्रमादिको वेत्ति वोध्यं शुक्लेति मीमांसम क
ते तेषां नित्यत्वैकत्वानेकसमवेतत्वसत्त्वादिति भावः देवदत्तेति परिमाणभेदे न द्रव्यभेदमानाभा
वात् भेदेपि तस्य व्यक्त्यन्तरसमानकालिकत्वाभावादिति भावः न चाद्यलक्षणेनास्य जातित्वं स्यात्
तत्रापि सकृदित्यादिविशेषणान्वयात् स्पष्टं चेदं मञ्जर्यां नन्वेताभ्यां पीलुपर्णीत्यादेरसंग्रहः
अनुगतसंस्थानव्यंग्यत्वाभावात् कठः कठी कठमिदं कुलं नाडायनः कुलमिति दर्शनेनासर्वलिंग
त्वाभावाच्चात आह गोत्रं चेति अपत्येति गोत्रमिह न शास्त्रीयं अपत्याधिकारादन्यत्र लौकिकं
गोत्रं पाठांतरं मिति पूनिलुक्सूत्रभाष्योक्तेः यद्यपि लौकिकं गोत्रं प्रवराध्यायप्रसिद्धऋष्यपत्य
रूपं पूनिलुक्सूत्रभाष्यस्वरसादिति त्रोरिति सूत्रस्थभाष्यात् लभ्यते तथाप्यत्र वक्ष्यमाणभाष्या
दपत्यमात्रमिति तच्च लोके अपत्यत्वेन वाधजनकप्रत्ययांतवोध्यमात्रमिति सिद्धांतादिति भावः
अत्रोपगवपत्यत्वादेः शास्त्रवोध्यत्वादश्वनित्यत्वेके तेरतिजात्याख्यायामिति सूत्रेके यठ न घनितं
अत एवानंतरापत्येऽवंतीत्यादावपि इति जाति प्रयुक्तोङीष्प्राप्ते गच्छते स्पष्टं चेदमनुपसर्जनादिति
उक्तलौकिकगोत्रग्रहणादेव २ नित्यत्वादिविरहेपि यत्नेन जातिसंज्ञेति जात्याख्यायामिति सू

भाष्येन च ज्ञातेरित्यनुवर्त्तमाने पुनरितो मनुष्यजातेरित्यत्र जातिग्रहणाद्वपत्याऽत्र्यन्यस्यां तु ग्रहणमिति।
वाच्यं तथा शाङ्गर्मर्यादया लाभात् जातिग्रहणमयोपधादित्यस्य निवृत्त्यर्थमिति भाष्यविरोधापत्तेः अत
एव प्रवाहणस्य टे इत्यत्र परस्येत्यनुवृत्तौ निवृत्तौ वा न काचित्क्षतिः शेषः उत्तरपदस्य तेनावृद्धिमत्त्वात्
ज्ञाते श्चेति पुंवद्भावनिषेधाच्चेति श्रोकारो गोमंसंगच्छते जातिलक्षणे इत्यत्र मगोत्रग्रहणं तु गांगयोभीष्मः
कानीनो व्यासः इत्यादिसिद्ध्यर्थं पुत्राकादिभ्यः परत्वात्तु तं गोत्र इत्यस्य निवृत्तेरावश्यकत्वेनानन्तरापत्ये ट
कि पूर्वपदस्य वृध्यभावप्रसक्तेर्वृद्धिनिमित्तस्येत्यत्र बहुव्रीहिरित्यनुवृत्तिर्भ्यां विशेषस्य स्पष्टत्वेन भाष्यमसंग
तमेव स्यात् गोत्रसंज्ञा सूत्रपर्यन्ते गोत्राधिकार इति मुनेर्नीत्यैवं तीत्यादि भाष्यमेन साधकं वाधकं
ठाहरतीति सूत्रेण स्यप्रयोजनाविरोधे पूर्वपदस्युदाहरणं फांटाहृता भार्येगोत्रस्त्रियाः इति सूत्रस्य पूर्व
पदस्युदाहरणं गार्गी भार्येचटापूर्येनाद्यायेनतेनोक्तो न ङीषुत्यान्सूत्रस्य भाष्यप्रदीपोद्योतेनिरू
पितं तन्निरूपयिष्यते तत्रैवास्माभिस्तत एवावधार्य नचैवमपि गोत्राद्यूनि प्रत्ययो भवति ततः स्त्रियां लुग्।
गितिन्यासे औपगवी माणविकेत्यत्रापण्यानुपसर्जनमित्यनुपसर्जनेन लक्षणे ईकारागमेन प्राप्नोति माभूदे
वमर्थं तादृशोपसर्जनादित्येवं भविष्यति इह तर्हि औपगवी भार्या जातिलक्षणः पुंवद्भावप्रतिषेधोन
तर्हि प्राप्नोति माभूदेवं वृद्धिनिमित्तस्येत्येवं भविष्यति एवं तर्हि त्वकायनीभार्येदोषः इत्येको गोत्र इति सूत्रस्थ
भाष्यविरुद्धोऽयं तत्परत्वात् जातिलक्षणङीषएव वक्तुं युक्तत्वात् पुंवद्भावप्रतिषेधसिद्धेश्चेतिवाच्यं पा
ठान्तरे स्त्रियां लुगिति न्यासे स्योपगव शाङ्गरवस्य युवापत्यरूपे वृद्धिनिमित्ते पुंसोऽनुत्तरा ऽस्त्रीविषयत्वा

२॰४

प्रा॰ शे॰

भावेन जातिलक्षणङीषः प्राप्त्यभावः इत्याशयात् । तत्रकृष्टेऽप्यस्य गोत्रयुवत्वादिनैव बाधः । एकदेशी समा।
धत्ते माभूदेवमिति तदंतविशेषणत्वे तदंतानां तस्यापि विशेषणत्वापत्त्यावनुपसर्जनाधिकारवैयर्थ्यापत्त्या ८८
तदंतविशेषणत्वस्यासिद्धांतसंमतत्वात् यदेकदेश्याह इह तद्धीत्यादीति भाष्यस्य संगत्वात्तत्क
श्चिद्विरोध इत्याहुः परेत्वत्र शास्त्रीयमेव गोत्रमपत्याधिकारात्परं लौकिकं गोत्रमिति यूनि लुगित्यत्र
त्र भाष्योक्तेः परमुत्तरमिति कैयटेन व्याख्यानात्त्वत्रस्य च ततः पूर्वत्वात् प्रवराध्यायप्रसिद्धस्यैव लौकि
कगोत्रत्वाच्चापत्यं मात्रं लौकिके गोत्रमित्यस्य भाष्यस्याप्यदर्शनाच्च लोकेपि तथाऽव्यवहाराच्च
लौकिकवैदिकेष्वित्यादौ भाष्ये लौकिकशब्दस्य स्मार्तव्यवहारे प्रसिद्धेश्च त्र्यवतीत्यादिसूत्रेणापि तद्व्य
पचारे गोत्रव्याचिर्वाह्यं गोत्रसंज्ञासूत्रपर्यंतं गोत्रे इत्यधिकार इति भाष्यसंमते पक्षे गार्ग्येयवच्च एवं
चानंतरापत्यत्वादिना बाधेऽपगवीत्यादावणंतत्वान्ङीबेवेत्याहुः इत्थंते तदंतविशेषणत्वे तदं
तानां तस्यापि विशेषणत्वापत्त्यावन्नुपसर्जनाधिकारवैयर्थ्यापत्त्याश्यापि शालाब्राह्मणीत्यस्य सिद्धये
चाऽप्येवानुपसर्जनमित्यर्थस्यावश्यकत्वेन ङीपः प्राप्त्याश्रवंतीत्यादिनाष्यविरोधेन च तद्भाष्यस्य प्रौ
ढिवादपरत्वात् किंच गोत्रापत्याणंतादौपगवशब्दादौपगवस्यापत्यमित्यतइञो लुकि विशिष्यमा
णं लुप्यमानार्थाभिधायीति न्यायेन युवबोधकत्वेपि गोत्रबोधकतायाः सत्वेन ज्जातिवाचकत्व
स्य तत्त्वलोपि सत्वेन सिद्धांते जातिलक्षणपुंवत्त्वप्रतिषेधस्य दुर्वारत्वेन तस्य तत्त्वावश्यकत्वा
त्तं च ज्जातिमात्रवाचकतानेन निवाच्यं ब्राह्मणादिशब्दानामपि जातिविशिष्टव्यक्तिपरत्वेन तत्त्वा

भावान्नध्रुनितेचेदमत्रैव कैयटे शाखाध्येतरि द्वंद्वः चरणशब्दः कठादिषु शाखाभेदेषु मुख्यः तदध्या
यिषु पुरुषेषु गौणः प्रकृते चोभयोर्ग्रहणमिष्टमिति स्पष्टमनुवादे न चरणानामिति सूत्रे कौस्तुभपदमं त्वर्थैः
एतदन्यतमत्वं चानुगतं ज्ञातिलक्षणमिति दिक् कठीति कठेन प्रोक्तमधीते इति विग्रहः वैशंपायन।
नोतेवासित्वात्प्रोक्तार्थणिनेः कठचरकादिति लुक् अध्येतृणस्तु प्रोक्ताल्लुक व ह्योक्तं चोध्येतव्याय
स्यादिति विग्रहः तत्कृत् रित्यपि प्रत्ययः समासांतः स्त्रियामध्ययनाभावेपि तद्धितप्राप्यत्वात् नाकस्मिंयथा
नधीयाने माणवके कठी शाखेत्यत्र तु कल्पभेदेन कठशाखानामनेकत्वादनेकसमवेतत्वं बोध्यं अन्ये
तु शाखायां पुंयोगादिति ङीषु सिद्ध इति शाखावाचिनोत्र ग्रहणे फलाभावः कैयटस्वरसोप्येवमेव शा
खायाम स्त्रीविषयत्वाभावाच्च पुंवद्भावोपि भाषितपुंस्कत्वादेव न प्राप्नोतीत्याहुः ब्राह्मणीत्यत्रेति अप
त्यणि ब्राह्मणो जातौ जातावित्यत्र जातावित्युक्ते ष्टिलोपाभावः वलाकेति वकन्तवाप्यजातिवचनो नित्यास्त्री
लिंगः याविसकंठिकापदेनोच्यते अस्त्रीविषयादित्यस्याहि प्रवृत्तिनिमित्तैकत्वे लिंगांतररहितमित्यान्तर
त्यर्थः एतेन वलाकायतनीति यौगिकस्य सर्वलिंगत्वात् वलाका वकपंक्तिः स्याद्बलाका बिसकंठिका व
लाका मुकीप्रोक्ता वलाकश्च बको मत इति शाश्वतकोशे पुंल्लिंगस्याप्यभिधानाच्चेदमयुक्तमित्यपास्तं
अत एव पाककर्णेति सूत्रे चरितार्थे तद्धि स्त्रीविषयार्थं अन्यथा तेषामपि यौगिकत्वे लिंगान्तरसंभवे
नास्त्रीविषयत्वात्पूर्वेणैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव द्रोणीकुटीत्यादयो गौरादिषु बोध्याः द्रोणशब्दः परि
माणे पुमान् गवादन्यां स्त्री कुटशब्दो घटे पुमान् गेहे स्त्री पात्रशब्दो भाजने सामान्येऽर्धर्चादिः भात्र

३०५

शा॰ श्रो॰ 305

नविशेषे स्त्रीग्रहणाणादिकेष्वनिषिद्धत्वान्ङीबित्यप्याहुः भाष्ये शोभनान्तस्य क्वचित्पदस्त्रीविषयत्वं पंपदानाम
मित्यर्थं माश्रित्य द्रोणीत्यादयः साधिताः मालावलाकयोस्त्वजादिपाठात्सिद्धमित्युक्तं एवं च पाकक
र्णेत्यनिष्टत्वं न कार्यमिति तद्भावः अत्र पक्षे स्त्रीविषयादित्यस्य प्रत्युदाहरणमन्वेषणीयं कुलीनेत्यत्रा
जादित्वाट्टापू वोध्यः पाककर्णेत्यादि जातिवाचिनः किमवहृष्पाद्याप्तत्वापूर्वसूत्रेणसिद्धे स्त्रीविष
यार्थमिदमित्याह स्त्रीविषयादिति नि चाजात्यर्थमेव किं न स्यादिति वाच्यं अनेनत्वेनास्त्रीवि
षयादित्यस्यैव वाधात् त्रिफलाकाण्डपुष्पादिषु जातिवचनेषु नित्यस्त्रीलिंगेषु सदक्कांडेत्या
दिषु निषेधारंभात्त्रयोपाधावीति पुनर्जातिग्रहणादिति भावः अस्त्रीविषयादिति नानुवर्त्तते।
पूर्वसूत्रेण विकल्पेदात् तिन्निरिति ननु तिन्निरिः ककुभोलावद्भतिसाहचर्यात्पुंस्त्वेनास्य स्त्रीत्वा
भाव इति चेन्न स्त्रीपुंसयोः पश्यानामाद्विचत्नुः षट्पदोवगाऽन्यमरेण स्त्रीत्वस्यापि वोधनात् अत्र भ
पसंख्यानं अन्तान्त्यर्थम् सोतंगमीस्तुतंगमपूर्वाख्यानकर्णादिना इन्गोरादिपाठः कार्य इत्यन्ये इ
तः किमुदरत् धात्रुमगधेत्यणोत स्वतिलङ्क ऊङ्तः ङकारो नोङ्धात्वोरिति विशेषणार्थः
अन्यथा पवाग्वोल्यादावपि निषेधः स्यात् ऊङ्धात्वोर्यणः परा ऽ सर्वनामस्थानविभक्तिरुदात्ता
नेति तदर्थः दीर्घोच्चारणं तु अश्रूशब्दार्थम् अन्यत्र सवर्णदीर्घेणापि सिद्धेः इह ऊकारान्तं प्रति प्र
पुनर्विधानसामर्थ्याद्भूतवर्त्तत्वं भूरित्यत्र अन्तरंगोपि शैषिकः कत्र नघुन्नरपदत्वाभावान्नष्टत्र शेत्यस्य
प्राप्तिरेव नास्ति ब्रह्माबंधुर्यस्येतिवक्रुवीहिरयं मनुष्यजातिविशेषे रूढः स्पष्टं चेदं भाष्यकैयटयोः

कुरुः कुरूरिति एकादेशस्य पूर्वान्तवत्त्वात् त्वादयः लिंगविशिष्टपरिभाषया वा यत्तु प्रातिपदिकग्रहणे लिंगवि-
त्ययांतस्य ग्रहणमिति पठित्वा नात्र परिभाषाप्रवृत्तिः लिंगबोधकप्रत्ययांतत्वरूपलिंगवैशिष्ट्यस्य प्रातिपदिकत्व-
स्य च लाभाय पूर्वान्तत्वपरादित्वयोरवयवरूपकत्वेनोभयतआश्रयणेनादिवत्भावाभावादिति तन्न प्रा-
तिपदिकत्वस्योपयोगाभावात् नहि लिंगप्रत्ययांतप्रातिपदिकस्य तुक्कमस्ति नादृशार्थत्वे हि इंद्रा-
णीत्याद्यसिद्धिः नहि इंद्रं तं प्रातिपदिकं भवति वस्तुतो लिंगप्रत्ययविशिष्टस्यैतस्यैव पाठो भाष्यप्रवृत्त्यादि-
ष्टुदृश्यते इति यत्किंचिदेतत् अध्वर्युरिति अध्वर्युरिति शाखाध्यायिवंशोत्तभवेत्यर्थः रज्ज्वादीति उत्तर
तिनु नेह संबध्यते अलाबूरिति भाष्योदाहरणादिति भावः कृकवाकुरिति मनुष्यजातित्वभावात्पूर्वे-
णापि नेति ध्येयम् पंग्वोश्च पंगुशब्दस्य गुणवाचित्वात्पूर्वेणाप्राप्तिः श्वश्रुरः श्वश्रूरिति निर्देशात्सिद्धार्थ-
माह श्वशुरस्येति अतएवान्त्याकारस्यैव लोपः उरूत्तर उपमीयतेनयेत्युपमा उपमानं तद्भावऔपम्यं
तच्च सादृश्यं एवं च सादृश्यबोधकोरूत्तरपदादित्यर्थः पूर्वपदे सादृश्यलक्षणाभ्युपगमात्समासस्यैव स
तम वो शक्त्याभ्युपगमात्समासस्य लत्वंस्वरूपपादं उत्तरपदेन च पूर्वपूर्वपदमाक्षिप्यते तच्च प्रत्यासत्त्या
यादुपमानवाच्येव अतएवोत्तरपदग्रहणं चरितार्थम् अन्यथा वैत्तादित्येवं वदेत् अतएव करभोप-
मोरूरित्यत्र न पूर्वपदस्योपमानवाचित्वाभावादित्याशयेनाह उपमानवाचीति करभोरूरिति
मणिबंधादाकनिष्ठं करस्य बहिर्भागः करभः तद्वत् ऊरू यस्याः इत्यर्थः उत्तरपदग्रहणेन समासस्य गृ-
ह्यमाणत्वात् अनुपसर्जनादिति तस्यैव विशेषणं बोध्यं उत्तरपदग्रहणात् कदलीकांडवत् मृदू

शा॰ शो॰ न्यस्याकृतिविग्रहे कदलीकांडगुरू ऊरू इत्यत्र गुरुशब्दस्योत्तरपदत्वेपि ऊरुशब्दस्य उपमान
वाचिपूर्वपदकसमासोत्तरपदत्वाभावात् त्रिपदबहुव्रीहौ नु भवत्येव ऊरुशब्दस्योत्तरपदत्वाविघा
तादित्याहुः शफाविति शफः खुरे गवादीनामिति हेमचंद्रकोशात् कफशब्दस्य पुंस्त्वमयीति भावः
शफं क्लीबे खुरः पुमानित्यमरात्तु नपुंसकत्वमपि अतएव शफाविव गर्भुराणेति श्रुतिप्रयोगः संग।
कृते उपचारादिति शफशब्दप्रवृत्तिनिमित्तस्य खुरत्वस्य ऊरुपदार्थे आरोपादिति भावः पुरुपदे
पाठांतरं सादृश्यप्रकारको बोधः इति प्राचीनालंकारिकमतं त्वश्रद्धेयमेव एतेन उपचारोपपूर्वपदस्योपमानवाचि
त्वेन एवं च समासस्य सादृश्यप्रकारकबोधजनकत्वेन पूर्वसूत्रप्राप्तिर्नास्तीत्यर्थः अभेदारोपे साद
श्यं निमित्तमित्यत्वदेतत् इदमेवाभिप्रेत्य पुंयोगादाख्यायामिति सूत्रे भाष्ये भगवतोक्तं भिन्नानामभे
दभावात् कथमतस्मिंस्तदिति चतुर्भिः प्रकारैः सादृश्यमारोप्यते तात्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् त
त्साहचर्यात् इति आलंकारिकाणामपीत्थमेव संमतं स्पष्टं चेदं चित्रमीमांसादित्वमव्याहतमेवेति मंदोक्तिः परा॥
स्ता उपमानवाचीत्यस्य प्रतियोगिनासंबंधेन सादृश्यानुवयत्वे प्रतिपादकेत्यर्थात् सूत्रान्तरे स्त्रथेवला
भाव एवं च करभोरुशब्देपि न एकविवक्षायामूङ् न भवत्येव एतेन निचकरेण... करेरुभिविति माधोव्या
ख्यातः पीवरोरुरितिसंज्ञापूर्वकविधेरनित्यत्वाज्जुणाभावः योध्यं हितेन सहेतिसमोवाहितनतयोरिति
सूत्रादितस्य नु एकदेशो विकृतन्यायेन संहितग्रहणादेव सिद्धिरिति भावः ननु सहग्रहणं व्यर्थं सर्वस्यो शब्द
रुमत्वेन सह शब्दप्रयोगस्य तत्समभिव्याहारे व्यर्थत्वेन सहोरूरिति प्रयोगस्येवाभावादनत्याह सहे
ह

नयतीति कद्रूरिति नागमातुः संज्ञेयम् कद्रूरिति कुत्सितो वृत्तः इत्यर्थः कमंडलुशब्दश्च तनुप्रधानत्वाति
वचनः पात्रवाचीत्युक्तं न स्त्रीलिंगइति न स प्रत्युदाहरणम् अचकंदोर्थमिति कंदमित्युक्तं कद्रुकमंडलो
रुच्छंदसीत्यनेनैव सिद्धेरिति भावः अन्योयोऽकारइति शार्ङ्गरवादीति लुप्तपंचम्यंतमज्ञइति षु।
ष्ठीति भावः अनुपसर्जनादिति च विभक्तिविपरिणामेनास्य समानाधिकरणं विशेषणं एवं टित इ
८ त्यत्रापि सुवचं नह्यत्रपंचम्यंतत्वमपि सुवचमित्यपि बोध्यं एकत्रोक्तार्थस्यापरत्रापि ग्रहणादि।
पिक्वचित ति दिक् अतएवानुयोऽकार इत्येव ग्रंथे यएणमूले पाठः अत्राकारविशेषणं किम् शूरसेनी जनपद
शब्दादित्यञोऽतश्चेति लुक् नतोत्र जातिलक्षणोङीषेव अतएव न शाच्छम भगोदियोधेयादिभ्य
इति सूत्रे योधेयादिग्रहणं सार्थकं नहि पर्श्वादियौधेयादिभ्यामणञाविति विहितस्वार्थिकाञो
ऽतश्चेति शाङ्गलुको निषेधार्थं तत्फलं चात्र तत्वान्ङीन्यघास्यात् टगंतत्वान्ङीपु माभूदिति शा।
ङ्गरवीति अंगकशब्दादपत्येण आदिवृद्धिरागुणः तत्र जातिलक्षणे ङीषि प्राप्ते वचनं जातेरित्यु
क्तेरिति स्पष्टं चेदं टिड्ढेति सूत्रे भाष्ये शार्ङ्गरव कापटवशब्दात्तण गौग्गुलव गौतम ऋष्यण्ंतो गौतमादिभ्य
पिकामंडलेयः चतुष्पाद्भ्यो ढञ् तः अस्यजित्वेनाद्युदात्तत्वात् ङीपि ङीनि च विशेषाभावेन योपधत्वान्ङी
षोप्राप्त्या चैतत्पाठफलं चिंत्यमित्याहुः पुंवद्भावः फलमित्यपि केचित् ब्राह्मणवृतेय आनीचेय।
आग्निधेय आशोकेय आरंगकेय शुभ्रादिठगंताः वात्स्यायन एतत्पाठसामर्थ्यादेव स्त्रियां युव
संज्ञा गोत्रे वा अन्यत्र द्वयम् गर्गादियञंताद्यञिञोश्चेति फगत्र यञंतश्चकृति कष्फक ष्फस्य यांतइत्य

२० 307

शु॰ शे॰ पिके चित् मौञ्जायनायनानडादिर्मुञ्जः कैकसेय कीकसाशब्दः शुभ्रादिः काप्य सेव्य कपिश्याविभ्यांत्य
ङ् आग्रमरथ्याः गर्गादि यञन्तः अयवाद्यष्कप्रत्ययस्य पूर्ववर्णोन त्वेन ष्फ ङीनो पर्यायेण वा धौम्यः हि पर्यहि
कृदिकारांतो औदपान उदपानः शुण्डिकादिः अराल वनराड् वन एडान्त्वे नियमो लुक् स्त्रियामिति लुक्
भोगवज्जौरिष्ठिनोः संज्ञायां भोगशब्दो घञन्तः गौरिशब्दो लङन्तः ताभ्यां मतुप् पित्वादनुदात्तः नच ह्रस्व
नुड्भ्यां मतुपो वेति तिन स्योदात्तत्वं नद्यां तो दात्ता आदिस्य नुट् ने नन्वेवमुगितश्चेति ङीपा सिद्धिः ङीनोः स्वरेवि
शेषाभावात् नच घादिषूगितश्चेति ह्रस्वविकल्पापत्तिः ङीन्यपि द्वार्वारत्वात् उगितोविहितायानदीत्वस्य
स्यैव यूवोरनाकाविति सूत्रे भाष्ये सिद्धांतितत्वात् ननूगित्त्वे न विहिते नीति चेन्न संज्ञायामेवेति नियमा
र्थत्वात् नियमसामर्थ्याद्वा संज्ञायां ङीवपिनेत्याहुः पुत्र अस्य पाठसामर्थ्याज्जातित्वाभावेपि ङी
न्न च पुत्रशब्दः स्त्रियां नास्तीति भ्रमितव्यम् सुतः पुत्रः स्त्रियां त्वमी स्याद्दुहितेत्यमरात् तत्र स्त्रीत्व
बोधईकारसमभिव्याहारस्तंत्रे केवलाकारांत पुत्रशब्दः स्तनुपुंस्त्वविशिष्टस्यैव बोधकः अत एव सपुत्र
ह्स्यतो न सदेह्य त्य स्मन्कृत काव्यप्रदीपो विस्तरः पुमांसपुत्र माघे हीत्यादौ पुंस्त्वे न विशेषणेन त्रा
तशापितत्तद्विधनाय एवं च सूनोयरानभोजकुलमेरुभ्यो दुहितुः पुत्रड्डितिकारे सत्यागदस्येति सू
त्रस्थं वार्त्तिकं किमर्थमिति चिंत्यं नच दुहितुः पुत्रडादेशो निरनुबंधकन्यायेन नादित्याक्रोशे पुत्रस्य
त्यादीनामप्रवृत्तिः फलमिति वाच्यं पुत्रीशब्दघटितनारशाकोशस्य क्रोशस्य लोके प्रसिद्धे एतत्सं

पाठांतरे

हस्ववर्णदीर्घात्संवर्णादां नस्यबलीयस्त्वादपवादत्वाच्चैदेशं बाधित्वान्त्यककारइत्तरस्याकारस्येत्वं
स्यादित्यर्थः राकेति कदाचारादिकत्विभ्यंकः मामकेति कस्यप्रत्ययस्थत्वाभावात्प्राप्तेवचनं मा
मिकेति ममेयमितिविग्रहेयुष्मदस्मदोरन्यतरस्यामित्यणितवकममकावेकवचनेइतिममकादेशो
आदिवृद्धिः संज्ञायांकंदसोरभावात्केवलमामकेनिङीप् नरानिति केशाद्वेश्चादेव उपदेशाइत्यात्वेआ
तोनुपसर्गेइतिकप्रत्ययेआतोलोपइटिचेत्यालोपः त्यकन्ययोरिति उदीचामातइत्यस्यापवादः दा
क्षिणात्यिकेति दक्षिणस्यामदूरेदक्षिणाआजंतः दक्षिणाभवेत्यर्थेदक्षिणापश्चादितित्यक्दक्षिण
स्यांदिशिभवेतिनुनार्थः त्यगृधियोसाहचर्येणव्ययदक्षिणाशब्दस्याजंतस्यैवग्रहणात् अन्यथासर्व
नाम्नोवृत्तिमात्रइतिपुंवत्वापत्तिः किलादादिवृद्धौटापिअज्ञातादौकः केणइतिह्रस्वः टाप् इद्धि
केति अव्ययात्यप् नया प्रत्ययस्थादितिप्राप्तेनिषेधोयम् यकेति यत्तदोरकच्प्रत्यदाद्यन्तेटाप्
नचात्राकारस्य नापरत्वं अकारहयककारैर्व्यवधानात् एकोयककशब्दसंवंधाकारः अपरस्यपदादी
नामः नचैकादेशएकएवस्थानिवद्भावस्यदुर्वारत्वात् सूत्रेतुसर्विकेत्यादौककाराभ्यांव्यवायेचरि
तार्थमितिवाच्यं अस्मादेवप्रतिषेधात्त्रिभिर्व्यवायेपिप्रत्ययः स्यादित्यस्यप्रवृत्त्यंगीकारात् अत
एवएतिकेइत्यादिसिद्धिः तकामिति यासयोरिति यत्तदोरुपलक्षणं नतुस्यच्पं विवक्षितमितिभावः
नचविभक्तिसंनिपातेनकृतमत्वंकथंटापंप्रवर्तयेत्संनिपातपरिभाषाविरोधादितिवाच्यं अनेनैव
निषेधेननिर्देशेनचतस्यात्रप्रवृत्त्यनित्यकल्पनात् अन्यथाऽकारस्यापरत्वाभावेनाप्राप्तौवैयर्थ्यं ।

307

प्रा॰ श्रो॰

स्पष्टमेव उपत्यकेति। उपाधिभ्यामिति त्यकन्। उपत्यकादेः आसन्नाभूमिरूर्ध्वमधित्यकेत्यमरः। तत्र।
पर्वतसमीपभूवाचको पत्यकाशब्दस्य क्वचित्समीपमात्रे लक्षणया प्रयोगः। एतेन समुद्रोपत्यकादे
मीपर्व[illegible]ताधित्यकापुरीति महाकविप्रयोगविरोधादमरश्चिंत्यः। उपत्यभूरासन्नाभूमिरूर्ध्वमधि
त्यकेति वामरे पाठ इति मंदोक्तिः परास्ता। यत्तु त्यकन्नंतस्य नित्यस्त्रीत्वेन प्रक्रियालाघवात्पत्यिकनि
ति वक्तव्ये ऽकारोच्चारणसामर्थ्यादित्वाभावे सिद्धे व्यर्थं प्रतिषेधवचनमिति तन्न। पंचभिरुपत्यका।
भिः क्रीतः पंचोपत्यक इत्यादौ चारितार्थ्यात्। अत्र हि क्रीतार्थकस्य ठकोऽध्यर्द्धेति लुकि लुक्तद्धित
लुकीति टापो लुकि अप्रत्ययत्वाभावादित्वाप्राप्तेः। ननु च टापो लुकः स्थानिवद्भावेनेत्वमत्रापि दुर्वार
मिति वाच्यं तत्राकारप्रश्लेषेणाल्विधित्वेन स्थानिवत्त्वाप्राप्तेः। प्रत्ययलक्षणस्य च नलुमतांगस्येति
प्रतिषेधात्। प्रत्ययलक्षणसूत्रस्य नियमार्थत्वे स्थानिवत्त्वस्यैव तेन निषेधाच्च। इत्यंतं परत्वेन प्रत्य
यलक्षणसूत्रेण स्थानिवत्त्वस्य बाधात्। तस्य च नलुमतांगस्येति प्रतिषेधात्। प्रतिषेधयुक्ताप्र
वृत्त्वाच्च विरोधे सकृद्गतिन्यायाच्च न पुनः स्थानिवद्भावः। प्रत्ययलक्षणसूत्रस्य नियमार्थत्वे दो
षाच्च। अचः परस्मिन्निति स्थानिवत्त्वं तु नालुकि तन्निषेधात्। किं च बहिर्भूततद्धितलुङ्निमित्तत्वेन टापो
लुको बहिरंगासिद्धत्वेन लुङ्न नाञानंतर्य इति निषेधात्। अकृतव्यूहपरिभाषांतरंगानयीति परिभाष
योरंतरंगपरिभाषापवादत्वेन तद्विषयेन तदप्रवृत्तेः। अंतरंगानपीति परिभाषयाऽकृतव्यूहपरिभाष
याच पूर्वमित्वं न। अतएवमृदस्तिकन्निस्यत्रेकारोच्चारणं चरितार्थं तद्धि पंचमृत्तिकः पटइत्यादावि

ध्यच: परे आदिनी शब्दस्य पदत्वाभावाच्च इत्युक्तं नादिनीति सूत्रे ङीपो ग्रहणस्य प्रागेव व्यवस्थापितत्वात् स
मुदायस्य लिंगप्रत्ययविशिष्टत्वे पि पुत्र शब्दस्य तत्वे मानाभावाच्च एतेन पुत्र: पुंभ्य इत्यनेन पुंशब्दादन्यत्र
पुत्र शब्दात् ततस्तुरुषे पुत्रस्यादिरुदात्त इत्यर्थकेन तदभाव: फलमिति परास्तं प्रतिपत्तिलाघवायनाचार्य
राजेत्युक्तं इत्युक्तो य राजभोजकुलमेरुभ्य: पुत्र्यावेत्येव स्वरप्रकरणे कर्तव्ये आदेशविधानस्यैवेयर्थ्यात्त्वन
च पुत्र टिड्डीपि उदात्तनिवृत्तिस्वरेणांतोदात्तत्वे ङीनित्वादाद्युदात्तत्वमिति स्वरे विशेष: न च पुत्र ङादेशो स्थानि
वद्भावेन ङहित्व शब्दत्वात्तत्पुरुषस्य सप्तम्यादिर्भवतीति निषेधान्ङीपोऽप्राप्ति: टित्वैवेयर्थ्यापत्तेरिति वाच्यं ङीनंतेन
तत्पुरुषे समासस्वरेणांतोदात्तत्वात् टित्वान्ङीप्यनुदात्तनिवृत्तिस्वरेणांतोदात्तत्वस्यैव सत्वात् न चोग्री उग्रा
वा ङहितायस्याइति बहुव्रीहो उग्रपुत्रीत्यादि सिद्ध्यर्थेन दावश्यकं पुत्रीशब्देन बहुव्रीहो तत्पुरुषेतिरिति स्यादि।
पाठांतरं निवाच्यं अस्य टित्व उपसर्जनत्वेन बहुव्रीहो ङीपोऽप्राप्ते: किंच वार्तिकस्य इत्युक्तं कुलमेरुभ्यां बहुव्रीह्यसंभवात्
तत्साहचर्येण तत्पुरुष एव प्रवृत्ते: कारे सत्याग इत्यस्य तिसूत्रे उपसंख्यानतत्वेन तस्य तत्पुरुष एव प्रवृत्त्या इत्स्या
पितत्रैव प्रवृत्तेश्च तत्रान्यासंभवात् दौहित्र साहचर्येण च तत्पुरुष एव प्रवर्त्तते राजपुत्रीत्यादौ तत्पुरुषार्थ
स्यैव प्रतीतेश्च कुलमेरुग्रहणसार्थक्यस्योपपादयितुमशक्यत्वाच्च यत्तु वार्त्तिके आद्युदात्त: पुत्र शब्दो।
निपात्यत इति तत्र स्वरप्रकरण एव वचस्य कर्तुं युक्तत्वे न टकारस्य ङहित्व ग्रहणस्य च वैयर्थ्यात् यद
पि शार्ङ्गरवादौ पुत्र शब्दस्याधुनिक प्रक्षिप्त इति तदपि न प्रत्ययस्थादिति सूत्रे वासूतकापुत्रिके त्या

प्रा॰ स्त्री॰

टिवार्त्तिकतद्भाष्यादेरसंगत्यापत्तेः शोलपुत्रीपुत्रीत्यादिप्रयोगासंगत्यापत्तेश्चेति पाठांतरं इतिकेचित् अ
परेतु सूत्रादिपुंशब्देभ्यः परेङीबंते पुत्रशब्देन तत्पुरुषे पुत्रः पुंभ्य इत्यनेन पुंशब्दात्परपुत्रशब्दांततत्पुरुषेपु
त्र्यादिरुदात्त इत्यर्थकेन लिंगविशिष्टपरिभाषया पुंशब्दोदकारोदात्तत्वं पुत्रडादेशेलतु ननत्पुरुष इति सा
नुबंधकत्वात् तत्स्वरेणोदात्तनिवृत्तिस्वरेणांतोदात्तत्वं कुलकुलशब्दांतबहुव्रीहौ पुंस्त्वेन तत्पूर्वपदेपि स्व
र विशेषाबाधः इष्टकादिसूत्र इवोत्तिपूर्वपदस्य विशेष्यतया तदंतविधेः सुलभत्वात् इत्यंतं अ
परेतु वार्त्तिकारंभसामर्थ्यादुदात्तनिवृत्तिस्वरबाधः तेनोग्रपुत्रीत्यादि सर्वानुदात्तपदसिद्धिः सर्वानुदात्त
प्रकरणेतु कर्त्तुमशक्यं पदादावनापत्तेः वाक्येप्यापत्तेश्च इदंवार्त्तिकं तत्र पदाधिकारस्थत्वात्समा।
सप्रवर्त्ततेत इदमेव च मनोरमायां चिंताबीजमित्याहुरित्तिदिक् नरस्योरिति नृशब्दे नरन्नेभ्य इतिङी
पि नरशब्दाज्जातिलक्षणेङीषि प्राप्ते वचनं ननु नारीति प्रयोगस्य नृशब्देन सिद्धत्वान्नरीति प्रयोगस्य पुं
योगलक्षणेङीपाद्दुर्वारत्वाद्वनरग्रहणं व्यर्थं पुंयोगलक्षणस्तु ङीषू नानेन बाध्यते किंतु अत्र जाति
ग्रहणानुवृत्तेर्जातिलक्षण एवेति सर्वसंमतमनेन तस्येति न्यायसिद्धं च स्पष्टं च टिड्ढाणञ् सूत्रे
भाष्ये अत एव किन्नरीणां नरीणांमितिप्रयोगः संगच्छते इति चेन्न पाठांतरं नरत्वजातिमात्रप्रतिपिपा
दयिषायां नरीति प्रयोगन्याय्य इत्यर्थेन तस्यावश्यकत्वात् अत्र आद्याकारस्यैव वृद्धिः अंत्यस्य लोपेनाप
हारात् न च तत्सामर्थ्याल्लोपबाधः गुणवृद्धिपरिभाषाबाधस्यैव न्याय्यत्वात् व्याख्यानाच्च यद्वा नर
स्य अ इति शाकंध्वादित्वात्पररूपं तत्सामर्थ्याद्वाद्यस्य ᐩᐩ पद्धा इत्यंतं नरसंज्ञायामिति सूत्रे प्रातिपदि
द्धा

दा

कग्रहणंलिंगविशिष्टस्यापिग्रहणमितिपरिभाषयानारीशब्दग्रहणार्थंनदित्याहुः अत्रनारीतिरेफांत
मनुकृत्यतस्यग्रहणमितिव्याख्यानसामर्थ्यादाकारस्यैववृद्धिरितिबोध्यं अन्यथालौकिकस्येतिस्यात् नचरेफांता
नुकरणेवानरशब्देतिप्रसंगः शब्दसाहचर्येणमनुष्यजातिवाचकघटकस्यैवग्रहणात् प्रथमतरं ङीनो
कारांतप्रकृतिलाभः कथमितिचिंत्यः इत्यंतं यत्तु प्रत्ययसंनियोगसंशिष्टाऽमनंतरंगामपिचोर्वृद्धिंबाधित्वाऽङ्ग
त्य नवृद्धपरिभाषयायस्येतिलोपेनैतस्यवृद्धिरितितन्नस्थानेंतरतमानंतरतमादेशप्रसक्तौनियमार्थत्वात्ता
त्स्थानेंतरतमपरिभाषायाः प्रकृतेऽप्रवर्त्तेरेफस्यैववृध्यापत्तेः यङश्चाप् यकारोयाडापइत्यत्रसामान्य
ग्रहणार्थः चकारस्यचानुबंधकत्वसंपादनद्वारासामान्यग्रहणाविघातकत्वेनचारितार्थ्येपिआंवष्ठ्याश्चावेत्या
दौपरत्वाच्चित्स्वरःपित्स्वरंबाधते किंचसामान्यग्रहणाविघातमात्रार्थत्वेटाप्प्रकरणएवयङइतिवक्त
व्येप्रत्ययांतरकरणेनचित्त्वसामर्थ्याच्च एतन्मूलकमेवपरिभाषास्थंक्वचित्स्वरूपेतपित्स्वराच्चित्स्वरो
बलीयानिति आवट्याच्चेति आवटशब्दाद्यञि वृद्धेत्कोसलेतिञ्यङ् कारीषगंध्येति करीषस्येवगंधो
यस्यकरीषगंधिः उपमानाच्चेतिगंधस्येदंतादेशः तस्यगोत्रापत्यंस्त्रीत्यर्थेअणिञोरितिष्यङ् तस्य
स्त्रियांविधानेपिङकारोच्चारणसामर्थ्यात् द्योतिकत्वाच्चनदंतादण्यर्थंचाप् षाच्चइतिवृत्तिमाबो
गर्गादिः एवंचगोकक्ष्यशब्दस्यगर्गादिपाठेतस्यउदीचांमतेअनेनैवचापःसिद्धत्वात् क्रौड्यादि
षुपाठोनकार्यइतिभावः नचगोकक्षीपुत्रइत्यत्रष्यङःसंप्रसारणमितिनस्यादितिवाच्यं इष्टाप

१०९

३०९

प्रा॰ शो॰ त्तेः एतच्चावयाञ्चेतिचकारस्यानुक्तसमुच्चयार्थत्वात्सिद्धमित्याहुः तद्धिताः बहुवचनमनुक्तानांसंग्रहा।
र्थम् अतएवाल्पार्थेग्रामटिकादयः साधवइत्याहुः महासंज्ञाकरणंतेभ्योपिहितादृत्यषष्ठ्यापत्तेनय।
थाभिधानमेवसाधवः ननुष्फविधौतद्धितग्रहणाकरणलाघवानुरोधादयः प्रागेवायमधिकारो।
स्तु नचङीवादीनांङस्येत्वानापत्तिः चुटूङ इतिसूत्रकरणेनतत्संभवात् टीपूटीनूटीषित्येववाप्र।
त्ययाःसंतुनच तद्धितान्त्वात्प्रातिपदिकत्वेफिषोन्तउदात्तइत्यस्यापत्तिः प्रकृतिप्रत्ययविभागशून्ये।
नकार एवतत्प्रवृत्तेः यकारषकारैकरूपभिन्नात्वानुबंधकरणेवैयर्थ्यापत्तेश्च अतएवसिद्धांतेलिंगविशिष्ट
परिभाषयानदोषः डाप्प्रत्ययेविजातीयडकारानुबंधकरणंचनकार्यमित्यपरंलाघवमटिलोपस्य
नस्तद्धितइत्यनेनैवसिद्धेः यस्येतिसूत्रेईतुग्रहणंडौङ्‌ः पामितिवार्त्तिकंचनकार्यं नचईग्रहणांङी
वादिषुतद्धितकार्याभावज्ञापनार्थं तेनयह्वीत्यादौनौर्गुणापत्तिरितिवाच्यं पाठांतरं कृतारित्यादिसि
ध्यर्थंस्त्रीप्रत्ययेपुनरभावज्ञापने इत्येतं प्रमाणानांसामान्यपक्षपातेनस्त्रियामित्यधिकारस्थानां।
तत्कार्याभावज्ञापनात्रापत्त्रावासुरायणीत्यादौषष्ठपियस्येतिलोपानापत्तेरितिचत्राकुरुः यह्वीत्यादा
वोर्गुणापत्तेः अतएवदंडिनीत्यादौटिलोपोनेतिध्विक् पूनस्ति इत्रेभ्यइतिङीपोषवादः प्राचंतादि
ति तेनयुवतीनांसमूहोयौवनमितिसिध्यति अन्यथायौवनमितिस्यात् यत्तुभिक्षादिपाठसामर्थ्या
न्पुंवदितितन्नभाष्यतत्पाठस्यप्रत्याख्यानात् पाठस्यविकारभावमात्रमात्यर्थकत्वेवृध्यादीनामप्य
भावापत्तेश्च अतएवचयुवतीकरनिर्मिमेथितेदधीत्यादिप्रयोगसिद्धिः युवतिशब्देलिंगविशिष्टप

रिभाषयैव प्रातिपदिककार्यसिद्धेश्च तद्धिताइत्यधिकारो लिंगविशिष्टपरिभाषानित्यत्वज्ञापनार्थः घट घटी ग्रहणवदिति टि
क् इति स्त्रीप्रत्ययाः स्त्रोत्तरसमोङित्यादिनानावत्त्वस्यादयो विहिताः तेषामर्थविशेषव्यवस्थां दर्शयितुमाह प्रातिप
दिकार्थेति इदमपि सूत्रं प्रायः क्रियायोग एव प्रवर्त्तते अस्तिक्रियायाः सर्वत्र सत्वात् आख्यातार्थकर्त्रादिनाऽभेदा
न्वयेऽपि तद्द्वारकः क्रियायोगो बोध्यः अत एवास्याः कारकविभक्तित्वेनानभिहिते पादे तत्र भाष्यकृतो व्यवहार इत्या
हुः ननु कृष्णादिशब्देषु लिंगस्यापि प्रातिपदिकार्थत्वाल्लिंगग्रहणमनर्थमत आह नियतेति यस्मिन् प्रातिपदि
के उच्चारिते यस्यार्थस्य यदा नियमेनोपस्थितिः स तदा तच्छब्दार्थ इत्यर्थः तेन शाकचलत्यगोणानां सर्वेषामेव
संग्रहः येषां तु अन्वयानुपपत्तिप्रतिसंधानपूर्वकालक्षणया देव तेषां न कालांतर्भाव इति बोध्यम् प्रत्ययो
त्पत्तेः सर्वत्र शाक्यार्थे एव सत्वात् इति अयं भावः तटादिशब्दानां तत्तत्प्रत्ययसमभिव्याहारेण सकललिंगबो
धकतया न किमपि लिंगं तत्तानियतोपस्थितिकमिति न तद्वाच्यलिंगस्यात्र प्रातिपदिकार्थशब्देन ग्रहणमिति
लिंगेत्युक्तमिति अत एव तटेनेत्यत्र लिंगसंदेह उपपद्यते इदं च त्रिकं प्रातिपदिकार्थ इति पक्षे बोध्यं द्विकं
तदर्थ इति पक्षे तु कृष्णादिशब्दा अपि लिंगेत्यस्यैवोदाहरणं न चैवं त्वत्पक्षे कृष्णेनेत्यादितो लिंगबोधो न स्यात्
यदुत्तरप्रथमया यल्लिंगं बोध्यते तदुत्तरप्रत्ययस्य लिंगे विहितस्यापि तत्तल्लिंगे लक्षणाभ्युपगमेनादोषात्
तटेनेत्यादौ तु पदांतरसमभिव्याहारादिना निर्णयाय तत्तु तटादिशब्दानां नानाकारांतानां लिंगबोधकत्वं तट
मित्यादावपि पुल्लिंगबोधापत्तेः बोधकतावच्छेदकानुपूर्व्याः सत्वात् किंतु विसर्गाद्येतानामेव तत्त्वं एवं च
तेषु लिंगस्य तटेत्यत्रानियतोपस्थित्यभावेन प्रातिपदिकार्थत्वाभावात् तदर्थलिंगग्रहणमावश्यकं तटेने
त्यादौ तेनैव लिंगबोधः अत एव तत्रो लिंगसंदेह उपपद्यत इति तत्त्वं एवं हि तटादौ लिंगस्य प्रातिपदिक

प्रान्तो ३१०

जन्योपस्थितितिविषयत्वाभावे नैव वारणो नियतपदस्य वैयर्थ्यापत्तेः किंच कृष्णेत्यादौ प्रातिपदिकार्थस्तत्
तटादौ प्रत्ययांनार्थ इति वैवमंडूकप्लुतिपादं द्विकपक्षे हि सर्वत्र प्रत्ययार्थ एव त्रिकादिपक्षे सर्वत्र प्रकृत्यर्थ
त्वमेव अन्यथा ततः तत्पक्षे स्वरूपस्यैव भानापत्तेरित्याहुः मात्रशब्दस्येति मात्रशब्दोवधारणार्थकः मा
त्रं कान्त्स्न्येवधारणे इत्यमरः प्रातिपदिकार्थादीनामेवेत्यस्य पदविग्रहः मयूरव्यंसकादित्वात्समासं
अत एव लिंगादिग्रहणं चरितार्थं न दाह आधिक्ये इति कृष्ण इति कृष्णस्य तु भगवद्वाचकस्य नित्यपुंलिंग
बोधकत्वं गुणवाचकत्वं नीलरूपवत्त्वरूपत्वनियतलिंगः अस्त्वेव तत इति भाष्यप्रयोगेण क्वचिल्लाघवा
नादरस्यापि सूचनात्कर्मधारयान्मत्वर्थीयो यदि क्वचिद्भवतीति नीलरूपवदिति नानुपपन्नं प्रशस्तत्वेन वा।
मतुप् न देवाह अलिंगा इत्यादि ननु वीरः पुरुष इत्यादावभेदसंसर्गस्याधिकस्य भानात् वक्ष्यमानस्यात्
पूर्वापरत्वादिसमासविधानं तु वीरं पुरुषमानयेत्यादौ चरितार्थमिति चेन्न संसर्गस्य वाक्यार्थत्वेन वहि
रंगत्वात्त्वार्थमात्रनिमित्तप्रथमप्रवृत्तसंस्कारवाधानुपपत्तेः न चैवं घटं पशुपतीत्यादावपि प्रथमाप
त्तेः कर्मत्वादेः क्रियासापेक्षत्वेन वहिरंगत्वादिति वाच्यं पदांतरसंबंधनिमित्तककार्यप्राप्तियोग्येप
दसंस्कारपक्षानाश्रयणात् अत एव वह्नितीयादिप्रकरणं चरितार्थम् किंच प्रकरणाद्विभक्तिवाच्यक
मेत्याद्यधिकस्यैव मात्रपदेन वारणान्न दोषः न चाभेदोपि राहोः शिर इत्यादौ षष्ठ्यर्थत्वेन लक्षणात्वइ।
निवाच्यं औपाधिकमभेदमादायैवषष्ठ्युपपादनस्यादत एव भाष्यादावुक्तत्वादित्याहुः परिच्छेद
परिच्छेदकभावेनेति अयं च संसर्गः न चात्रापि प्रातिपदिकार्थ एव प्रथमास्त्विति तेन च संबंधेन नामा

र्थयोरेवान्वयोस्त्विति वाच्यं नामार्थयोरभेदसंसर्गेणैवान्वयव्युत्पत्तेः नचास्याराजपुरुष इत्यादौ व्यभि
चारः एकार्थीभावाभ्युपगमात् व्युत्पत्तेरयस्तु भिन्नोपस्थितिविषयाइत्यदोषः व्यपेक्षावादेपि पूर्वपदे संबं।
ध्यादिलक्षणाभ्युपगमात् अत एवार्थवद्बहुव्रीहौ नतु न व्यभिचारः व्यपेक्षावादेपि प्राप्तोदक इत्यादौ प्राप्तपदा
दौ विशेषणविशेष्यभाववैपरीत्यस्य व्युत्पत्त्यन्तरकल्पनया स्वीकारेण प्रकारीभूतैकपदार्थस्याभेदेने ६
वान्वयात् नच प्राप्तावुदकस्य कर्तृतासंबंधेनान्वयः क्तस्य तु कर्मणि लक्षणेति पक्षे सः इति वाच्यं त
त्पक्षेनेकस्त्वेवं तस्यान्यपदार्थत्वस्य भावेन समासे वानापत्तेः उक्तरीत्या विनैव लक्षणां मत्वर्थलक्षणत्या
गायाः प्रत्यार्थप्राधान्यव्युत्पत्तेस्त्यागमात्रेणैवोपपत्तेरस्याः कल्पनाया अयुक्तत्वात् नच एतद्विधैका
र्थीभावस्वीकारस्यानौचित्यात् नच निपातनार्थे व्यभिचारः तेषां द्योतकत्वात् अत एवानुभूयत इत्या
दौ सकर्मकत्वात्तदतिरिक्तत्वेन विशेषणाद्दानदोषः नच प्रकृतिप्रत्ययार्थयोरभेदान्वयो न क्वापि दृ
ष्ट इति वाच्यं आमिक्षां देवतायुक्तां वदत्येव पतद्धित इति मीमांसकमते देवतार्थकतद्धितादौ दृष्टत्वात्
वस्तुतस्तु राज्ञः पुरुषस्य धनमित्यादौ सति तात्पर्ये भेदान्वयस्यापि दर्शनेन तस्या व्युत्पत्तेर्व्यभिचरितत्व
या नामार्थयोस्तथान्वयोपि वक्तुं शक्यः नचैवं द्रोणो व्रीहिमानयेत्यस्यापि साधुतापत्तिरिति वाच्यं प्राति
पदिकार्थयोर्हि साहचर्येण नाम्नोः संबंधे समानविभक्तिकनाम्नां नयार्थान्वये एव परिमाणे प्रथमायाः सा
धुत्वबोधनात् अत एवाभिहिते प्रथमेत्यनल्लक्षणं करिष्यते तिङ्समानाधिकरणे प्रथमेत्येतल्ल
क्षणं करिष्यते इति वार्त्तिकोक्तिः संगच्छते तन्मते हि सिंहो माणवक इति वत्तद्द्रोणो व्रीहिरितिल

तणयासाधु नच तदा द्रोणो व्रीहिरित्यप्रसंगोऽस्मिन्नच सूत्रे मते परिच्छेद्यपरिच्छेदकभावेनान्वयः वार्त्तिकमते
त्वभेदेनेति वैलक्षण्यमिति वाच्यं शाब्दबोधस्य युक्तवैलक्षण्यस्यानादरेणानभ्युपवृत्तेः अत एव सर्पिः कुडव
मित्यादौ द्रव्यत्सोरिति षत्वविकल्पो न वार्त्तिकमते समानाधिकरणतयाऽसमर्थत्वेन तदप्राप्तेः अमते
पि व्यवस्थितविभाषया तद्वारणात् वचनं संख्येति तथैव शब्दाव्यवहारात् इद्रोणार्थत्वादिति उक्तार्थानाम
प्रयोगात् प्रातिपदिकप्रतिपादितसंख्याविशिष्टसंख्यांतराभावाच्च केवलप्रकृतिप्रयोगाभावाद्विभक्तौ
तु अनियमापत्तिरिति भावः लिंगविशिष्टपरिभाषयैं द्राणीत्यादौ प्रथमासिद्धिः परिमाणशब्देन संख्या
कालातिरिक्तं परिच्छेदकमात्रं गृह्यते तेन यत्तं घृतमित्यादावुन्मानेपि प्रथमासिद्धिरित्याहुः नच
प्रातिपदिकेन स्वार्थस्योक्तत्वादुक्तार्थानामप्रयोग इति प्रथमासिद्धिमानापत्तिरिति वाच्यं प्रथमा
विधायकसामर्थ्यान्न प्रातिपदिकोक्तत्वस्याव्यावर्त्तकत्वात् अत एव पंचकप्रातिपदिकार्थपक्षे द्वि
तीयादीनां सुलभत्वान्ननु पंचकपक्षेपि विभक्तिरहितप्रातिपदिकेन कर्मत्वाद्यर्थो वक्तुमशक्य इति
चेत् स्वार्थः प्रथमां विना वक्तुमशक्य इति समानं निरर्थकत्वादीनां तु निपातस्यानर्थकस्येति प्रातिप
दिकसंज्ञाविधानसामर्थ्यादेव प्रथमैकवचनमिति बोध्यं अत्र वदंति अत्र सूत्रे प्रातिपदिकार्थशब्दे
न प्रवृत्तिनिमित्तं तदाश्रयश्चेत्येतावन्मात्रं गृह्यते अत एव लिंगग्रहणं चरितार्थं अन्यथा त्रिकादिप
क्षे तस्यापि प्रातिपदिकार्थत्वात् तद्वैयर्थ्यं स्पष्टमेव न त्रिकादिपक्षेपि लिंगस्य क्वचित्त्वाद्धातुप्रा
तिपदिकमात्रात् तत्र निपातोपस्थितिकमिति न तस्य प्रातिपदिकार्थपदेन ग्रहणं इदमेवाभिप्रे

प्रकारीभूतत्व
मर्थः

त्यवृत्तौ प्रातिपदिकार्थः सत्त्वमुक्तं तत्र सत्ताग्रहणं प्रवृत्तिनिमित्तोपलक्षणं आश्रयस्तु तदाक्षिप्त
त्वात्पृथग्गणितः एवं च प्रातिपदिकार्थ इत्यस्यालिंगाः लिंगप्रवृत्तिनिमित्तकाश्च शुमादयः प्राज्ञाउदा
हरणं प्रातिपदिकग्रहणेलिंगविशिष्टस्यापि ग्रहणात् स्त्रीप्रार्द्यस्यैवोदाहरणं अन्ये सर्वलिंगा
धिकारइत्यस्य कुमारीशब्दादयोप्यस्यैव नहि तत्र लिंगं प्रवृत्तिनिमित्तं किंतु विशेषणमित्येव यं
धर्मधर्मितौ वक्केदकीकृत्य वृत्ति ग्रहणस्यैव प्रवृत्तिनिमित्तत्वात् पद एव लक्षणेति नलाक्षणिकेषु दा
षः यत्तु ननु द्रोणादीनां परिमाणं वृत्तेः प्रातिपदिकार्थत्वादेव सिद्धौ परिमाणग्रहणं व्यर्थं
न च नियतोपस्थितिकस्यैव प्रातिपदिकार्थत्वात् यदा व्रीह्यादौ मेयद्रोणादीनां वृत्तिस्तदा तस्याने
कत्वेन परिमाणमात्रवाचकत्वेन तद्बोधेन च व्यभिचारात् मेयस्यानियतोपस्थितिकत्वाभावेनाप्राति
पदिकार्थत्वात्तदसिद्धौकमेवतत्पाश्च मेयार्थकं परिमाणग्रहणमिति कैयटाद्युक्तं युक्तं एवमपि सिद्धे
माणवकइत्यसिध्यापत्तेः तत्र सदृशस्यापि नियतोपस्थितिकत्वांगीकारे तु प्रकृतेपि तुल्यं यदि च प्रा
कृत्यर्थमादाय पदसंस्कारोत्तरमेव लक्षणेत्युच्यते तदपि प्रकृते सममिति चेन्न परिमाणत्वेन तु परिमाण
शब्दार्थः तत्र प्रकृत्यर्थोऽभेदेन विशेषणं न च व्रीह्यादेरभेदेन विशेषणं एतदर्थमेव परि[माण]ग्रहण माण
मिति तन्न एवमपि द्रोणो व्रीहिमानयेति प्रयोगापत्तेः न च वार्त्तिकानुरोधात् समानविभक्तिकनामान्त
रार्थान्वये एव साधुत्वमिति वाच्यं एवं हि तदनुरोधादभेदान्वय एव साधुत्वमित्यर्थस्याप्यंगीकर्त्तुमुचि
तत्वात् किंच द्रोणं व्रीहिमानयेत्यादावभेदबोधानापत्तिः यदि तत्र लक्षणया तद्बोधस्तदा द्रोणो व्री

प्रा॰ प्रो॰

स॰

द्विरित्रापि तत्रैवास्तु किमनेन न किंच राजन्तः पुरुषस्य धनमित्यादौ सति नान्यथैव भेदान्वयस्यापि दर्शनेन द्रोणो व्रीहि
रित्यादावपि तान्यथैव प्राप्त्यपरिच्छेदापरिच्छेदकभावे नान्वयस्यापि संभवादेव मपि परिमाणग्रहणं मर्थमेव
किंच विभक्त्यर्थे मद्धारीकृत्य नामार्थधात्वर्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वेपि विभक्त्यर्थस्य तत्त्वान्वयस्वी
कारेण द्रोणः पचतीत्यादिप्रयोगाणां साधुत्वापत्तिः विभक्त्यर्थपरिमाणस्य तस्य परिच्छेद्यकर्मतासंबंधेन
धाकेन्वयसंभवात् तस्मात्परिमाणत्वेन परिमाणमपि द्रोणादिशब्दार्थ इत्यवश्यं सूत्रभाष्यप्रामाण्या
दंगीकार्यं यथाहि लिङ् सर्वोसर्वोसंमतकर्तृवाचकत्वस्य सूत्रभाष्यादिबलादभ्युपगमः तच्च न प्रवृत्ति।
निमित्तं किं तु लिंगादिवद्विशेषणान्वयिमात्रं एवंच प्रातिपदिकार्थत्वाभावात्तेनासिद्धो परिमाणग्रहण
मावश्यकं नचैवं द्रोणः परिमाणमिति प्रयोगानापत्तिः द्वौ ब्राह्मणावित्तिवदुपपत्तेः तदंशे प्रमादे
णाप्युपपत्तेश्च तदंशे तात्पर्याभावाच्च नच द्रोणादयः शब्दा इयत्ताविशेषावच्छिन्नधान्यादिपरिच्छे
दके शक्ता इति तदेव तत्र प्रवृत्तिनिमित्तमिति वाच्यं तत्समानाधिकरणद्रोणत्वाद्युपाधेर्जातिवि
शेषस्यैव प्रवृत्तिनिमित्तत्वस्वीकारात् तथैवानुभवात् तत्र च विशेष्यविशेषणमित्युक्तमेव एतावतैव
यं परिमाणशब्दा इति व्यवहारो भाष्यकृतः एतेनापि परिमाणं प्रत्ययार्थ इत्यपास्तं प्रकृतिएव त
द्वाभात् इति वाच्यं अत एव प्रस्थ इत्याद्यकोपरिच्छेदकोनवेत्तिनसंदेहः ननु प्रातिपदिकार्थादिषु वि
हित प्रथमा अनुवादकत्वेपि संख्यारूपार्थबोधबोधकतया सार्थकेन घटादिभ्य स्तद्द्रव्यत्वावपि एक
दिभ्यो न स्यात् तत्र संख्याया अनुक्तत्वात् उच्चैरादिवत् एकवचनोत्पत्तिश्च द्व्याद्यावपि न स्यैव पत्तिः

सर्ववचनोत्पत्तिर्वा स्यात् इति चेन्न वचनग्रहणेन सिद्धेः नचैवं द्व्यादिभ्यः सर्वत्र प्रथमापत्तिः निरर्थ
कविभक्त्यपेक्षयानुवादकविभक्तेरेवन्याय्यत्वात् एवं हि सूत्रे द्वंद्वोपि न्यायत उपपन्नो भवति ए
वमर्थेष्ववर्त्तमानात्प्रातिपदिकात्स्वार्थे तत्र द्योतिका प्रथमेति वाक्यार्थः यदि तु प्रमेयार्थैकपरि
माणग्रहणं लाक्षणिकार्थोपलक्षणिकार्थोपलक्षणं व्याख्यायते इदमेव लाक्षणिकानां साधु
त्वमानं तदा केयटाद्युक्तमपि साधु परं तु भाष्यद्वाराणः स्वारीत्याढकमित्युदाहरणेषु स्त्रीत्याद्विपदा
अत्रपाठान्तरस्य त्रुटिः ५२ नुपादानात्तदननुगुणं स्पष्टं चेदं भाष्ये सर्वमिति मात्रार्थे मुक्तायेन्यधीमि राकबनीयार
किं च पदे एव लक्षणोत्पत्त्योमस्त्रकेयटोक्तौ प्रमाणाभावेपि चिंत्य एव किं च मात्रग्रहणादविप्रवृत्तिनिमि
त्ततदाश्रयोरेवात्र प्रातिपदिकार्थग्रहणेन ग्रहणं तथा हि तद्धिकर्मण्येव द्वितीयेति प्रत्ययनियमे
कर्मादिविशिष्टे माभूदित्यर्थम् नचात्रापि प्रातिपदिकार्थ एवेति नियमाद्विस्पनत्राप्राप्तेन तद्यर्थ ।
मिति वाच्यं पंचकप्रातिपदिकार्थपक्षे तेषामपि तदर्थत्वात् अयमेव च सूत्रसंमतः पक्षः प्रातिपदि
कार्थमात्रे वर्त्तमानात्त्वनुनदाधिके वर्त्तमानादित्यर्थस्याहारमर्यादयालाभात् संबोधनमपि प्राति
पदिकार्थ एव विभक्तिर्द्योतिके वद्वितीयादिवदिति संबोधने इति ज्ञापकेनार्थमुमार्थं साधयित्वा +
तद्भाष्ये प्रत्याख्यानमित्याननु नचैवं संख्याधिकेपि प्रथमा तस्मात् श्लोकयोरित्यादिभिरस्येक
वीकृतयानदाधिके प्रवृत्तेः एकादिशब्देन तु एतन्त्रयाणामनुवृत्तेनानभिहितइत्यस्यानुवृत्तिलाभाबान्नेद ।

113

प्रा० शे० कत्वाकत्वापन्नसंख्यावाचकाबन्त्वयितेन न तदप्राप्तौ वचनग्रहणबलेन तत्साधितं द्विकं प्रातिपदिका
र्थ इत्यस्य कश्चिन्नादेव प्रातिपदिकग्रहणेन गृह्यत इत्येकार्थता वदेव प्रातिपदिकार्थ इति पदकृत्तनस्य
त्र भाष्यादिसंमतः समासेऽकृन्नेपुंसकात् नपुंसकस्य गलचरित्यादिसूत्रे कठुके: तस्मात्कस्य
त्र पुंसीत्यस्य पुंप्राद्रूस्य प्रकृतिनेसी त्रे भाष्यादिसंमतः इत्यर्थः अत एव स्त्रियामिति सूत्रे स्त्रीत्वा
द्यान्वेइत्ये वार्यो भाष्ये सिद्धान्तितः मात्रग्रहणं च प्रत्ययनियमेकमोधिकेववारणायेत्युक्तं मात्रग्रह
णाद्ध सूत्रकस्य प्रत्ययनियमपक्ष एवाभिमत इति गम्यते मात्रग्रहणं करणलाघवेनत्युकमेणिद्वि
नीयेवेत्यर्थ नियम उक्तो भाष्यादौ एवं च संबोधने चेति लिंगादिग्रहणं च प्रत्याख्यातमेवं वचनग्र
इति हणमपि अनभिहितसूत्रे एकोद्वावित्यादौ विभक्तिनेस्यादित्याशंकासमयाद्भविष्यति अंतेवाय र्थे
वस्थेति वदता भागवता प्रत्याख्यातमेव अर्थवत इत्यादेरनुवादकविभक्तेर्नोपपत्त्वभिन्यर्थ इतित
त्रैककैयटः प्रातिपदिग्रहणमपि सूत्रोपक्रमे संख्याविधायकवाक्यतयाऽव्ययेभ्यो प्राप्तौ तेभ्यो वि
धानमितिवदतानद्धितास्थ्रेत्येवं विभक्तिर्वे कुर्षिस्यादिसूत्रेष्वव्ययेभ्यः प्रकारांतरेण विभक्तिं साध
यिता च प्रत्याख्यातमेव स्वादीनां प्रातिपदिकादेव विधानेनार्थे प्रथमेत्युक्तावपि कल्पार्थे इत्याका
ङ्क्षायां यस्मात्स्वादिविधिस्तदर्थे इत्यस्य लाभ इति तदापाय इति मात्सर्येमुक्त्वायेस्तधीभिर्विभावि
नीयम् ।अत्राहुः अर्थे प्रथमेत्येतावदेव सूत्रं कार्यं यस्मात्स्वादिविधिस्तदर्थे इत्यर्थात्स्वादि
श्च प्रातिपदिकाल्लिंगप्रत्ययविशिष्टाद्विधीयते तदर्थेत्वंच ततो नियतोपस्थितिकत्वमेव अत

एवमृश्रनीहिमानीत्यादौ पुंयोगमहत्वादेशाधिक्यादिज्ञानाच्चियं तद्यामानेन प्रथमासिद्धिः नच प्रा
तिपदिकग्रहणं उच्चैरित्याद्यव्ययार्थेष्वन्यथासिद्धेकयोरित्यादिभिरेकवाक्यतया प्रातिपदिकार्थे एक
त्वादौ प्रथमैकवचनादीत्यर्थः स्यात् एवं चाव्ययेषु तज्ज्ञानाद शाब्दज्ञानं तदभावेपि विधानार्थं तत्त्वानि पदि
कार्थमात्रे भवतीति उक्तं च भाष्ये प्रातिपदिकार्थग्रहणं किमर्थं उच्चैरित्यादावपि प्रथमा स्यादिति इतिवा ती
च्यं अव्ययप्रकरणोक्तरीत्या समाधानात् यथान्यासे प्रातिपदिकग्रहणसामर्थ्याल्लिङ्गविशि
ष्टपरिभाषयाश्च वृत्यापन्नो शृङ्गानीत्यादौ प्रथमानापत्तेः मात्रग्रहणाभावान्न त्रिकादि प्रा
तिपदिकार्थत्वाच्च न नदीत्यादौ दोषः अत एव नदीत्यादौ लिङ्गबोधः ननु प्रथमेन्येवास्तु स्या
दिसूत्रेणैव प्रथमायाः सिद्धत्वेन पुनः प्रथमेत्युक्त्याऽनिर्दिष्टार्थाः स्वार्थे इति न्यायेन प्रकृ
त्यर्थे प्रथमेत्यर्थस्य नियमस्य च सुलभत्वादिति चेन्न स्पष्टतया नियमलाभार्थं तत्सत्त्वात्
द्रोणशब्दस्य चतुरस्त्रिमितेलक्षणया न दोषः गौर्वाहीक इतिवत् एवं च तं वत्समित्यपि एकोद्धावित्या
दावपि न केवला प्रकृतिरिति निषेधान्न न्वितार्थकत्व योगापेक्षया नुवादकमात्रप्रयोगस्यान्या
य्यत्वाच्च न दोषः किंच उक्तार्थानामिति न्यायेन त्वावधित्रिकः मात्रग्रहणं तु व्यर्थमेव संबोधने
चेति त्वाएके नकर्माद्यधिके प्रथमायाश्च प्रवृत्तेः कर्मणि द्वितीयेवेत्यादि नियमेस्तत्र प्रथमायाश्च शा
न्तेश्च अत्रापि नियमांगीकाराद्वा यत्तु प्रातिपदिकार्थः सत्तायोग्यः सत्त्वित्येव केवलं भासते न जात्या
दिधर्मविशिष्ट इति न चोच्चैरादीनामपि स्वाधारे नात्व विशिष्टा स्वाधारता शक्तिर्वाच्या नत्वं

स॰ कौ॰

गसंख्याकारकयोगीतिनदर्थात् यथोच्चैर्नीचैरितिभ्यलिंगसंख्यावैत्तौ केवलं लिंगादिनिरपेक्षं
स्वार्थं ज्ञात्वा ग्राहत्वर्थतो व्ययार्थः केवलमस्तीति शाकपार्थिवरक्तं न पुनरमुकलिंगादिः कुत्र।
इत्यादौ तु लिंगग्रहणात् सिद्धिरिति ननूच्चैर्नीचैरित्यादितः सन्निति प्रतीतेः सर्वेतत्रविरुद्धत्वा
त् अस्त्यादिः समानाधिकरणस्याप्यसत्वार्थके षष्ठ्यर्थेप्युद्भूलभत्वं सत्वे नान्वयात् नालिंगसंख्या
कारयोगीतित्युक्तिविरोधः न चैवं तिङ्समानाधिकरणे प्रथमे भाष्यवार्त्तिकविरोधः नत्वत्यति
ङ्समानाधिकरणपदस्य तिङर्थे व्यधिकरणेना नन्वित परत्वात् न च क्वचिदन्वयाभावात्
सामानाधिकरण्ये नान्वयात् उच्चैः पठतीत्यादावपि उच्चैरादेर्धात्वर्थेन्वयो न तिङर्थ इति न दोषः
अभिहिते प्रथमेति न्यासेप्ययमेवार्थः एवं च तादृशार्थे नुवादिका प्रथमेत्येतन्यासेर्थः ध्वनितं
वेदमत्रैव भाष्यकैयटयोः यत्तु वाक्यसंस्कारपक्षे सिद्धस्य शब्दलक्षणायां गोणमुख्ये न्यायात्प्रा
तिपदिकत्वं न स्यादिति तन्न विशिष्टरूपोपादान एव तन्न्यायप्रवृत्तेः पदकार्ये षष्ठेवनसमस्य तत्वेऽन्व
स्तत्वं तावत् संबोधने च मात्रग्रहणात् संबोधनाधिके न प्राप्नोतीत्यारंभः संबोधनं ज्ञापनं अत
एवानुवाद्य एव संबोधनविभक्तिः अस्या अक्रियायामन्वयः अनुवाद्यस्य विधेयाकांक्षितत्वेन
विधेयस्य क्रियारूपत्वे नतथैवोचितत्वात् देवदत्तत्वं सुंदर इत्यादौ चासीत्या पाठांतरं क्रिया
यां यद्विषयस्तत्कर्मादि संज्ञमित्यर्थः विषयत्वं च जनकत्वेनेति बोध्यं संयोगसमवायातिरि
क्तसंबंधेन संबंधीहि वैषयिकाधार इत्यत्र विषयपदे नोच्यत इत्यग्रे उपपादयिष्यामः अत एवे

षां क्रियायामेवान्वयः क्रियाजनकमिति ज्ञाने कस्मात्क्रियेत्याकांक्षोदये न क्रियाया जनकाकांक्षया त
त्रैवान्वयस्योचितत्वात् जनकत्वं चैषां तत्तु क्रियोपयोगि क्रियान्वयित्वेनेति भाष्यारूढः पंथाः अन्ये तु अ
न्वे तु अन्वेतीत्याध्याहारः क्रियान्वयित्वं कारकत्वमित्याहुः तेषां कारकाणां भावेनान्वय इति वा
क्यं घटत्ववान् घटत्ववानिति वत्स्यात् इति बोध्यं इत्यंतं क्रियाध्याहारः अत एव धिङ् मूर्खेत्यादौ प्रथ
मा अनध्याहारे तु द्वितीयैव अत एव संबोधनं प्रकृत्यर्थं प्रति विशेष्यं क्रियां प्रति विशेषणमिति सि
द्धांतः अत एवैकवाक्यत्वप्रयुक्तोऽन्वज्ञानि देवदत्तेत्यादौ निघातः सिध्यति अधिकमस्मत्कृतस्ववर्ण
तादेद्रष्टव्यम् इति प्रथमाकारके इत्यधिकृत्येति करोति कर्त्रे कर्मादिव्यपदेशानिति व्युत्पत्त्याकार
कशब्दः क्रियापरः तेन क्रियायामित्यर्थः तदुक्तं भाष्ये यावद्ब्रूयात् क्रियायामिति तावत्कारके
इतीति विधिवाक्ये अन्वेतीत्याध्याहारः क्रियायां यदन्वेति तत्कर्मादिसंज्ञमित्यर्थः तेन क्रियान्व
यित्वं कारकत्वं फलितं कारकाद्दत्तश्रुतयोरित्यादौ च कारकशब्दः स्वर्यते तेनैतदधिकारोक्तं
कर्त्रादिषट्कं गृह्यते इति नातिप्रसंगः यद्वा कारके इति सप्तमी प्रथमया विपरिणम्यते तदुक्तं भाष्ये
किमिदं कारक इति संज्ञानिर्देशः इति ब्रूमः अपाये इत्यादौ कारके इत्यनुवर्त्य वाक्यभेदेन कारकसं
ज्ञापि विधीयते अपाये ध्रुवं कारकसंज्ञं स्यात् न च कारकमपादानसंज्ञं स्यादिति नन्वेकसंज्ञाधि
कारात्पर्यायापत्तिः न चानुवृत्तिं विनैव कारक इति स्वरूपेण संज्ञाविधानेनैव पर्यायप्रसिद्धे पुनरनुवृत्तिः
समावेशार्थो भविष्यति न च संज्ञिनामनुपादानात्कथं तेन संज्ञाविधानं क्रियान्वयिनामपादा

315

पू॰श्रो॰

नादीनामहेयेणनत्वंभादितिवाच्यंग्राह्येपादेत्वयाऽनुक्तत्वेस्वत्वधीयस्त्वात नटस्यश्रुतंनटश्रुतमित्या
वारणाद्यकारकाऽदन्तेत्यादौस्वरितपाठाश्रयणेऽधिकंगौरवाच्चेति चेन्नअपादानमित्यादिविभक्त्यकार
कमित्यनुवर्त्यकारकंसदपादानमित्यर्थे कारकसंज्ञायाअनुवाद्यत्वबलात्समावेशासिद्धेध्रुवम
पायइतिविभक्तौशस्तुकारकसंज्ञायाएवविधायकः अत्रयोगविभागेनसंज्ञाद्वयविधानादेवपर्याये
सिद्धेअनुक्तत्वान्नुवाद्यत्वकरणंसमावेशायेतिबोध्यं तेनग्रामेवासइत्यादावधिकरणत्वात्सम
मीकारकत्वात्कुड्यन्तरपथप्रकृतिस्वरस्यसिद्धः भीत्रार्थानामित्यादौत्वर्थाधिकरादाइत्यावासमावे वध्यादृत्योक्त रीत्या पाठं
श्रोबोध्यः यद्यपिकर्तरिण्वुल्विधानात्कारकत्वंकर्तृत्वपर्यायः एवंकर्मत्वादिविवक्षायांकर्तृत्वा
भावात्कारकंकर्मेतिविरुद्धं तथापिसंज्ञाविधानसामर्थ्यात्कारकपदंस्वातंत्र्यमात्रलक्षणकं
स्वतंत्रःकर्तेत्यत्रतुकारकत्वादेवस्वातंत्र्योलब्धेपुनस्तदुक्तिः तात्कालिकप्रधानीभूतधात्वर्थ
निरूपितास्वातंत्र्येणविवक्षायस्यतस्यग्रहणार्था कारकत्वंपदाकदाचिद्विद्यमानस्यनिष्ठतक्रि
योपयोगिक्रियानिरूपितस्वातंत्र्यमादायेतिस्पष्टंभाष्यकैयटयोः अन्वर्थसंज्ञाविज्ञानाद्धिक्रिया
पाठांतरं याअन्यजनकस्यतेनब्राह्मणस्यपुत्रंपंथानंपृच्छतीत्यादौब्राह्मणपदार्थस्य इत्यस्यज्ञा
तादित्यनेनसंबंधः नन्वयिनोन अन्यथासुंदरादिविशिष्टपुत्रस्यक्रियाव्याप्यत्वेनसुंदरंपुत्र
मित्यादौसुंदरादीनांकर्मत्ववत् ब्राह्मणस्यपुत्रंपंथानंपृच्छतीत्यादौब्राह्मणस्यापिकर्मत्वाप
त्तिः सिद्धांतेतु नदोषाअरुणाधिकरणन्यायेनसुंदरादीनांक्रियान्वयवत्ब्राह्मणस्यक्रिया।

त्वयित्वाभावात् यद्वा पुत्रपाठेन जन्यतायाश्चपि बोधनात् ब्राह्मणस्य विश्लेषाश्रयत्वेनापादान।
त्वापत्तिः तदविवक्षायां तु अकथितं चेत्यनेन पथि रूपकर्मयोगेन पुत्रस्येव पुत्ररूपकर्मयोगेन ब्रा
ह्मणस्यापि कर्मत्वापत्तिरित्यलं अत्र वदन्ति क्रियाव्याप्यत्वं क्रियाजन्यफलाश्रयत्वं न तत् ब्राह्म
णस्येति क्रियाऽव्याप्यत्वमित्याद्यः पक्षो न युक्तः नापि अकथितं चेत्यादि युक्तं तत्सूत्रे दुह्यादि
परिगणनात् दुह्याद्यर्थनिरूपितापादानत्वाद्यविवक्षायामेव तत्प्रवृत्तेः न हि त्वद्रीत्या पृच्छ्या।
र्थनिरूपितमपादानत्वं किं तु ज्ञानादिक्रियानिरूपितं तस्माज्ज्ञानादिपदाध्याहारं विनापि पुत्र
शब्दार्थजन्यताबोधितविश्लेषाश्रयत्वेन पदार्थान्वये अपादानत्वं स्यात् पाठान्तरे तु सिद्धान्ते
तु तत्र पुत्रशब्दार्थे विश्लेषनिरूपितं जनकत्वेपि तस्य क्रियात्वाभावेन क्रियाजनकत्वाभावा
त् ब्राह्मणस्तु अत्रमिति कदाचिदपि प्रयोगः संप्रदानस्यापि स्वत्वापनद्वारा क्रियाजनकत्वं सर्वे।
त्रास्तीति दिक् इत्थं च तत् इति फलं बोध्यं कर्तुरीप्सित ईप्सितशब्दोत्र क्रियापरो नाभिप्रेतपरो गूढः
व्याख्यानात् अभीष्टेभीप्सितं हृद्यमिति कोशो नाप्युपसर्गसहितस्यैव तत्र शक्तेरुक्तत्वेन केवल
स्य तदर्थत्वे मानाभावाच्च स्पष्टं चेदं वारणार्थानामिति सूत्रे भाष्ये कैयटादौ कर्तुरिति किं स्यैव वर्त
मानेः इति कर्तरि षष्ठी आप्नोतेः सन्नन्तान्मतिबुद्धीति वर्तमाने कर्मणि क्तः मतिरिच्छेति हि तत्रा।
कारः एवं च कर्त्राप्तुमिष्यमाणं कर्मेत्यर्थः आप्तिश्चात्र संबंधः स च कर्मत्वादीनां क्रियावाचक

316 ज

घा. श्रो. घाटोपाधिकत्वात् प्रधानीभूतधात्वर्थव्यापाराश्रयत्व एव कर्तृपदार्थविशेषणीभूतव्यापारद्वारकस्य
व उपस्थितपरित्यागेनानुपस्थितकल्पनायां मानाभावात् एवं च कर्त्रा स्वनिष्ठव्यापारजन्यफल
द्वारकसंबंधेन संबद्धुमिष्यमाणमित्यर्थः एवं च ईप्सितपदेन कर्तृव्यापारप्रयोज्यफलसंबंधी+
लभ्यते फलसंबंधस्याश्रयताभेदस्य विनिगमनाविरहात् यथा स्त्रोके पचति तंडुलं पचतीति
पा०टं फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वबोधं अत एव तत्समानाधिकरणे शोपनं पचती
त्यादौ कर्मत्वसिद्धिः इत्यंत एवं चाभिन्नाश्रयस्य द्वितीयार्थः न चैवमाश्रयावधिरुद्देश्यतइत्यभि
युक्तोक्तिविरोधः अभेदेपि व्यपदेशिवद्भावेनाधाराधेयभावस्वीकारे तत्ते कथंत्यपायापात्रत्वबद्धे इभा
मानत्वं न तु नविवक्षितं तेन कटं करोतीत्वांकरिष्यतीत्यासिद्धिः कर्तुः किमिति ता[redacted]वेपि केना
नुमित्याकांक्षायां कारकाधिकारात् प्रत्यासत्तिन्यायेन धात्वर्थव्यापारलाभ इति प्रश्नः माषेष्वि
ति अयं भावः यथा धात्वर्थप्रधानप्रधानव्यापारजन्यफलाभिन्नतदाश्रययोः कर्मत्वं तथा धात्व
र्थतावच्छेदकफलसंबंधजन्ये तत्कालिके तन्माषभक्षणाश्रयमाषाणामपि तत्त्वं द्वेवार+
मितिअधिकरणसंज्ञातः कटेश्वास्ते इत्यादौ चरितार्थ कर्तुरित्युक्तो नु कारकपदेन तदलभ्य धात्व
र्थयोः प्रत्यासत्त्यैव धात्वर्थत्वलाभात् कार्त्स्न्ये व्यापारवाचकोपात्त धात्वर्थतावच्छेदकफलाश्र
यत्वं लब्धुमिति न दोषः कारकाधिकारेणतुव्याप्तिकरणेन यथा धात्वर्थमात्रलाभः अत एव कर्म

स्कारकस्य फलेऽन्वयः न च ग्रहणं किमिति अवयवद्वारा समुदायशब्दः कर्त्रीकर्दपर्यं कर्मेत्येवास्त्विति
भावः यत्र सौदनमिति यदाकलभोजनेनापि यथोल्लाभेनौदनभोजने प्रवर्त्तते तदेदं प्रत्युदाहरणं तत्र
क्रियायाः यत्र उद्देश्यकत्वात् ईप्सिततमत्वं शब्दस्य तु क्रियाशब्दत्वात्त्वयसत्तदाफलाश्रयत्वेनाबि।
वक्षणात्र दोषः इति भावः तममात्रस्य प्रयोजनं तत्र एवक्ष्यते एतत्तथं व्याख्यातरूपणं चेनिदिक
कर्मेत्यनुवर्त्तताविति अधिशीङ्स्थासां कर्मेति सूत्रात् आधारेति कर्तृकर्मद्वारा क्रियाश्रये हि न क
र्म तदाह गेहं प्रविशतीति अनुक्तेऽकर्मेत्यत्र कर्मपदेन तत्कार्यविहितकर्मसंज्ञकमात्रं गृह्यते
ऽविशेषात् न च कर्त्रीप्सिततममिति सूत्रबोधितकर्मविहितद्वितीयायाः अयोऽर्थः कश्चिद्भेदो
ऽपि फलस्य धात्वेनैवलाभात् ईप्सिततमत्वस्य उद्देश्यतारूपस्य वाक्यार्थबोधोत्तरकालेनियमतो
ज्ञायमानेमानसबोधविषयत्वात् लाभात् तत्र प्रकृत्यर्थोऽभेदेनविशेषणं विशेष्यं चाश्रय
तासंबन्धेन प्रकृतधात्वर्थफलं फलेद्वारा क्रियेव वा एवं च हरिं भजतीत्यादौ हर्यभिन्नाश्रयवृत्ति
प्रीतिजनकोव्यापार इति बोधः प्रीतिजनको व्यापारो हि भजधात्वर्थः हरिः सेव्यत इत्यत्रापि अभि
वनेव विशिष्यमिति कश्चित् अपरे तु पक्वं तण्डुलमित्यादौ कर्मकृत्समभिव्याहारे फलव्यापारयोः।
कृत्यासेन बोधस्यावश्यकतया कर्माख्यातेऽपि फलविशेष्यकैव बोधः अत एव प्रत्ययार्थसाद्दता।
संबन्धेन प्रकृत्यर्थविशेष्यान्वयित्वस्योत्सर्गतः कृत्प्रत्ययस्य न त्यागः अन्वयित्वं विशेष्यतयाविशे
षणतया वा अत एव कर्तृलकारेण फलविशेष्यको बोधः कृत्प्रत्ययानुक्तनियमभङ्गापत्तेः अत
धात्वर्थफलविशेषबोध्यत्वेति कर्मसमभिव्याहारस्यैककारणत्वेति भावः

पु॰ श्रो॰ 317

एवंष्यते पुत्र इत्यर्थे पुत्रीयतीति न प्रयोगः भिन्नार्थत्वात् किंतु मिच्छतीति ऽत्रार्थ एवेति क्यजंतात्क
र्मणि प्रत्ययस्तद्‌र्लभोऽकर्मकत्वादित्यर्थकस्य प्रात्मनइति सूत्रस्य भाष्यादि ग्रंथाः संगच्छंते
अन्यथा एकाश्रयकः पुत्रकर्मकेच्छानुकूलव्यापार इति बोधस्योभयत्रापि तुल्यत्वेन भिन्नार्थ
त्वादित्यसंगतिः स्पष्टैव ममतु कर्मलकारे एकाश्रयकव्यापारजन्या पुत्रकर्मिकेच्छेति बोधः
कर्तृलकारे उक्त इति भिन्नार्थत्वं स्पष्टमेव तदुक्तं कैयटेन यदा क्रियाफलस्य प्राधान्यं प्रतिपिपादयि
षितं तदा वाक्यमेव प्रयुज्यते इष्टः पुत्रः इष्यते पुत्र इति ननु क्यजंतस्याकर्मकत्वात्कर्मणि प्र
त्ययानुत्पादादिति न चैवं कालान्वयोपि फले स्यादिति वाच्यं इष्टापत्तेः न चैवं व्यापारापगमेपि
विच्छित्तिसत्वेन पच्यत इति स्याद्यावच्छित्तिचनस्यादिति वाच्यं स्ववाचकधात्वर्थव्यापारसम
कालिकयाविच्छित्या एवधातुवाच्यत्वेनास्याश्च तथात्वेनाहतेः व्यापारेप्येवं तस्य साकांक्षत्वा
द्विशेषणीभूते तत्रैववान्वयतत्त्राभिमतफलनिष्पादकसकलव्यापारापगमे भूतत्वाद्यवहारः । तत्रैव तदन्वेन तद्देशेउत्सर्गे त्यागादित्याहुः पाठः
नादृशसकलव्यापारस्य भावित्वे भविष्यत्वव्यवहारः यावत्त्वाभिमतप्रयोजकसकलक्रियायाः
समाप्तिर्न भवति तावद्वर्तमानत्वव्यवहार इति स्पष्टमाकरे इत्याहुः भावलकारे तु व्यापारे एववि
शेष्यः स्वांतादौ सामानाधिकरण्यसंबंधेन व्यापारयोरेव परस्परमन्वयदर्शनेनौत्सर्गिकस्य
व्यापारनिष्ठफलविशेष्यत्वस्य त्यागे मानाभावात् ननु न्यायनयवत् हरिकर्मकभजनानुकूल
व्यापारवान् देवदत्त इत्येव बोधोस्त्विति चेन्न क्रियाप्राधान्यमाख्यातमिति सिद्धांतविरोधात् ति

दुःखाभावस्तथा धात्वर्थः प्रधानमिति तदर्थः यद्यपि नामान्याख्यातजानीति शाकटायनोक्तेः सर्वं नाम
धातुजमाहेति उणादिसूत्रस्य भाष्याच्चाख्यातं प्रकृत्या न धातुरुच्यते तेन धात्वर्थाख्यातमाख्यातेनेत्या
द्येति इःतार्थकस्यापि दर्शनादिति ङःतग्रहणं तत्रैव नामाख्यातयोर्लक्षणमित्युपक्रम्य भाव
प्रधानमाख्यातमिति यास्कोक्तेश्च अन्यथा धातुलक्षणस्यास्य कृत्स्वकृतिधातावव्याप्त्यापत्तिः
अत एव भावकालकारकसंख्याश्चत्वार एतेर्था आख्यातस्य तत्र भाव प्रधानमाख्यातमिति निरुक्त
स्वभाष्यं संगच्छते अत एव महाभाष्येपि पचति रूपं पचतो रूपं पचन्ति रूपमित्यादौ सिद्धिमाशंक्य
क्रियाप्रधानमाख्यातं द्रव्यप्रधानं नाम यतः क्रियां पृष्टस्तिङन्तं चष्टे किं देवदत्तः करोति पचती
ति द्रव्यं पृष्टः कृदन्तं चष्टे कतरो देवदत्तः यः पाचक इति दर्शितं तथा चोपपत्तिनिरुक्ते उक्तं आख्यात
वति प्रश्नवाक्ये प्रकरणादिना क्रियाप्रश्नावगतौ आख्यातेनैव तत्प्रतिपादनात् कालसंख्यासाध
नाद्यवगमेपि तस्य क्रियाप्रधानत्वावगतिरिति तच्चिन्त्यं घटेनो नक्तं अत एव पाचति व्रजतीति नैकं वाक्यं
किं च तव मते पचदोदनं देवदत्तं पश्येत्यादिप्रयोगापत्तिरिति स्पष्टं शाब्दविधायकसूत्रभाष्ये
१५१ यदयोः अपि च देवदत्तः पचति कल्पं देवदत्तः पचतिकल्पस्य दर्शनमित्यादिप्रयोगानापत्तिः किं
च पाको भवतीत्यर्थे पचति भवतीत्यस्यानापत्तिः अपि च पश्य मृगो धावतीत्यादौ दर्शनेन मृग
स्यैव कर्मत्वात् तत्रो द्वितीयायाम प्रथमासामानाधिकरण्येन शाब्दबोधापत्तौ तत्प्रयोगविलयप्र
वस्यात् अपाक्षीद्देवदत्तो वेहीत्यादिप्रयोगानापत्तेश्च एकवाक्यतया भाष्यादिसंमतत्वेन दृष्टा

प्रा॰ श्री

प्रयोगाणां सांसाधुत्वस्याभाष्यवार्त्तिकादिसम्मतत्वात् अन्याख्यातपदे न तिङन्तस्यैव ग्रहणात्। नन्वेवं दे
वदत्तेन पक्वं तंडुलमित्यादौ तंडुलादेस्तत्तयापि क्रियाप्रधानं स्यादिति चेन्न तिङन्तत्वाभावात्। अत एवो
क्तं सत्त्वप्रधानानि नामानि नाम्नि सत्त्वप्राधान्यं च स्य घटकप्रकृतिभूतधात्वर्थः पेक्षयैव अत एव वि
भक्त्यर्थस्यासत्त्वभूतस्य प्राधान्येऽपि न क्षतिः नामपदेन चात्र विशेष्यतया सत्त्ववाचकप्रत्ययान्तं गृ
ह्यते अत एव पचतिकल्पमित्यादौ न दोषः नचैधामित्यस्य क्रियाप्रधानत्वानापत्तिस्तिङन्तत्वा।
भावात् इति वाच्यं लिटो पाठांतरं यन्न वहतीति सूत्रे भाष्ये तस्य पदमित्येव सिद्धे इदं व्यर्थमित्याशं।
क्य वहतीति तोरथस्य वोढेति शाब्दस्य भेदात् तेन विधिरित्युक्तेः शाब्दभेदेऽप्यर्थसामान्यात् सिद्धं यथ
वार्थे रथं वहतीति स एव रथस्य वोढेतीत्युक्तं तत्र शाब्दभेदादित्यस्यायमर्थः वहतीति क्रियाप्र
धानं वोढेति कर्त्तृप्रधानमिति तिसूर्थसामान्यादित्यस्यायं भावः वहतीत्यर्थे विधानेऽपि विशेषणवि
शेष्यभावव्यत्यासेन वहनकर्त्तैवात्र प्रत्ययार्थः वर्त्तमानकालस्त्वाविवक्षित एवेति न तद्विरोधः
इत्यन्ते क्रियायाः प्राधान्यमाख्यातघटकप्रत्ययार्थापेक्षयैव ग्रन्यास्तत्यावाध्यते अत एव पश्य
मृगो धावतीत्यादौ धावनक्रियायाः कर्मतया ह्यत्रापि विशेषणत्वेऽपि पचति भवतीत्यादौ कर्तृ
तया पाकक्रियायाः भवतिविशेषणत्वेऽपि न दोषः पाठांतरं तडन्तं भूवादिसूत्रे पचादयः क्रिया
भवतिक्रियायाः कर्त्र्यो भवन्तीति इत्यन्ते तत्र शाब्दजन्योपस्थितेरेव शाब्दबोधकारणत्वे कर्मत्व।
संसर्ग एवं कर्ता एवं पचतीत्यादौ धातूपात्तस्य फलस्य व्यापारेन्वयेऽपि कर्मत्वस्य संसर्गत्वं प्रका

रत्वं वा मतभेदेन द्रष्टव्यं अर्थाध्याहारवादे तु प्रकारत्वमेवेति बोध्यं अत एव तत्समानाधिकरणशो
भनं पचति शोभनं धावति पश्येत्यादौ द्वितीयैकवचनोपपत्तिः नचैवं पश्य मृगो धावतीत्यत्र विशेष्यसम
र्पकात्पचतीत्यादौ विशेषणफलसमर्पकात्कर्मादिवाचिका द्वितीया स्यादिति पदजन्योपस्थितिस
त्वेन कर्मत्वस्य प्रकारत्वमेवेति वाच्यं धातुतिङ्नयोरप्रातिपदिकत्वात् नच कर्तृत्वादिना क्रियाया
अन्वयेन तस्याश्च सत्त्वं न स्यात् कर्तृकर्मेतरकारकत्वेनान्वयितामात्रेण तथात्वाभ्युपगमात् स्व
रूपं च तं सार्वधातुके यगिति सूत्रे कैयटे क्रियानाधारकारकत्वेनानन्वयाद्वा अत एवाग्निष्टोमेन
यजेतेत्यादौ करणत्वं नान्वयेपि न दोषः ननु सर्वमतेपि तोद्वितीयपठतीत्यादौ क्रिययोरुपमानो
पमेयभावसत्त्वात्सत्त्वरूपतापत्तिर्वारा तेन तुल्यमिति सूत्रे यदा क्रियोपमानत्वेन विवक्षा तेन त
दा सा वृषणापेक्षसाधारणधर्माधारत्वात्क्रियात्वरूपतां हित्वा सत्त्वरूपतां प्रतिपद्यत इति कैयटोक्तेः य
एवं च क्रियाप्रधानमाख्यातमिति लक्षणाव्याप्तिः न च प्रत्ययोत्तरमिव शाब्दश्रवणेन धात्वर्थयोरुप
माङ्गलं भेति वाच्यं तिङोत्तरमिव प्राक्श्रवणेन तदर्थयोस्तथात्वे सुलभत्वात् रामकृष्णाविव
देवदत्तयज्ञदत्तावित्यादौ पूर्वपदार्थयोरुपमानोपमेयभावप्रतीत्यापत्तेश्च न चात्र ख्यातार्थ
कर्त्रोरेवोपमानोपमेयभावः तत्तयोः क्रियाप्रतिविशेषणत्वेन तस्यासंभवादिति चेन्न पाकं तर
सत्त्वरूपतां प्रतिपद्यत इति मत्वा भाष्यकृतैन द्रुक्तमिति कैयटोक्तेः तत्र त्वभाष्यपूर्वपक्षोपपादक
त्वेनोक्तस्य सत्त्वपदार्थत्वेन तस्यार्थाभावात् तत्र हि क्रियाचेष्टितत्वं तीयाम समर्थविशेषणमिति प

३१८

तेकर्थंचतत्तीयासमर्थक्रियास्यादितिपूर्वपक्षस्ततदाशयोद्घाटयंकैयटेनोक्तः अतएवतद्भाष्यंतत्ती
शा॰शो॰ यासमर्थत्वंनामतत्तीयार्थान्वित्वं नचतदन्वयिनिक्रियात्वंसंख्याया अपिविभक्त्यर्थत्वेनतत
दन्वययोग्यएवविभक्त्यर्थान्वयात् संख्यान्वययोग्यत्वेचक्रियात्वहानिरित्याशयेनान्वयो
क्तं किंच इत्यंतं तिङन्तसमभिव्याहृतेवशब्दस्यसादृश्यार्थत्वाभावात् तदुक्तंसत्त्वात्रेभाष्येन
वैतिङन्तेनोपमानमस्तितिङन्तेनेति असत्त्वभूतक्रियायेत्यर्थः अयंभावः तिङ्पस्याख्याक्रि
यायानभेदप्रतियोगित्वेनान्वयः नपचतिगच्छतीत्यादितस्तथाबोधाभावात् अतएव
तिङन्तसमभिव्याहृतनभोत्यंभवार्थकत्वमेव एवंचसादृश्यघटकभेदप्रतियोगित्वेनतस्या
अन्वयासंभवान्नोपमानत्वमितिदमेवाभिप्रेत्यकैयटेनोपमानोपमेयत्वस्पदं तादिति
पदामर्शविषयवस्तुगोचरत्वमित्युक्तं तत्रोपमेयत्वमित्यंशश्चिंत्यः त्रासएवधीनत्वस्या
तत्व दोअध्ययनक्रियायांप्रतीतेः अतएवभगवतोपमानमित्येवोक्तं किंतुतत्रसंभावनार्थइवशब्दः
नृत्यतीवगच्छति रोदितीवगायतीत्यादौ स्पष्टंचेदंकैयटेनचयथावेशपेनोनिपात्याक्त्रेमयं हि
वंतंआन्तव्यांनिपत्यादत्रेयमभिचरतिप्रयोगेनेत्यर्थं वाइवक्रियाभिन्ननिष्ठयोः क्रिययोरेकधान्तप
ग॰ न्नयोरप्युपमादर्शनादिदमसंगतवाच्यं यथाशाब्दस्यभेदकधर्मवद्वाचकतायाःप्रकारवचनेथा ।
लितिसूत्रस्याकरसंमततयायत्प्रकारवत्त्वरूपेणकर्तृकादानंतत्प्रकारकेणतत्कर्तृकरिष्यादानमि
तिबोधोत्तरंतमेवधर्मंनिमित्तीकृत्यतत्सदृशादानक्रियांवानिमित्तीकृत्यपश्चात्प्रानसादृशाय

भिन्निवुध्याकर्त्रीरेवोपमानोपमेयभावस्त्यादोषात् तस्य प्रकारके पाठोवायद्धातं प्रकारसाधार।
णधर्ममाश्रित्य स्मरतसत्त्वभावाद्युपन्नक्रियाविषयएववामानसः साद्यपवोधः यथा देवदत्तो
ग्राममं गच्छति तथैवापातीत्यादावप्येवमेवोह्यं तत्यादिपदार्थे तु क्रियान्वयोन संभवत्ये चन्
मार्थे व निपातातिरिक्तनाम् पाठान्तरे दोत्वाद्यवोधे नैवपर्यवसानरित्यूह्यम् इत्थं च तिङ्नार्थक्रि।
यायाविशेषणत्वे नान्वयस्याव्युत्पन्नत्वात् अन्यथा तण्डुलः पचतीत्यपि स्यात् क्रियाया
नामार्थे स्वनिरूपितकर्मत्वेनान्वयसंभवात् इति दिक् नचैवं पचतिकल्पं देवदत्त इत्यादौ
देवदत्तस्याभेदेन संबंधेन भावनायामन्वयानुपपत्तिः नामार्थत्वात् समानविभक्तिकत्वादि
रहविभक्तिराहित्याद्वेति वाच्यं देवदत्तादेस्तित्र्नामार्थे त्रयेऽभेदेनैवान्वयादत्तते: तिङर्थे
ष्वाश्रय एवेति नियत्यर्थे लोटाद्यूपत्तेः चेदिति स्त्रेभाष्ये स्पष्टं राजः पुरुषस्य पुत्र इत्यादौ व्य
भिचारेण तात्पर्ये तउभयविधवोधदर्शनेनचवोधे व्युत्पत्तिवैचित्र्यस्यैव नियामकत्वाच्च
२ अत्रेदं वोध्यं सर्वेच्छाविषयत्वरूपेप्सितत्वस्य निमित्तकोटावुपादानेपि तस्य प्राक् बोधेभानं श्री
कृदादिवत् संज्ञाप्रवृत्तावुपयोगेपि द्वितीयावाच्यकोटावप्रवेशात् तस्य वाक्यार्थबोधोत्तरकालं।
नियमतो ज्ञायमानमानसबोधविषयतयान्वलभ्यत्वात् नन्वेवं धातूपस्थाप्यफलशालित्वक
र्मत्वेवास्तु किमीप्सितानीप्सितयोः पृथक्कथनेनेति चेत् एवं सति वारणार्थानामितिसू
त्रमस्यापवादः स्यात् एवं चाग्नेर्माणवकं वारयतीत्यत्र कर्मत्वं न स्यात् नचाग्नेस्तवारितार्थः

320

प्रा॰ श्रो॰

तस्यापि तद्रूपस्याप्यसंयोगरूपफलाश्रयत्वात् वारणे तु संयोगाद्यनुकूलव्यापाराभावा
नुकूलव्यापारोऽर्थः एष एव प्रवृत्तिविघातपदेनोच्यते नच संयोगेन तत्कर्तृव्यापारजन्यः
कर्तृपदस्य तत्र स्वतंत्रोपलक्षणत्वात् स्वातंत्र्यं च संयोगानुकूलव्यापारं प्रति माणवकस्यास्ती
ति तद्व्यापारजन्यफलाश्रयत्वेस्याग्नावप्यत्तेः अत एव गां दोग्धि पयः इत्यादौ गोव्यापारजन्य
फलाश्रयत्वेन पयसः कर्मत्वं विभागानुकूलव्यापारानुकूलव्यापारस्य दुहधर्थत्वात् ईप्सिततम न
मित्यनुक्तेनुईप्सितमात्रेतस्याभावकाश[illegible]ईप्सितत्वेनेप्सिततमेनेन तद्बाधः तथा हि तमपा
मि प्रवृत्तिनिमित्तगतप्रकर्षो विधीयते प्रवृत्तिनिमित्तं चात्रेच्छा तस्याः प्रकर्षश्च प्रकृतधात्वर्थप्र
धानीभूतव्यापारप्रयोज्यफलसंबंधविषयकत्वरूपो व्याख्यानात् एवं च प्रकृतधात्वर्थप्रधा
नीभूतव्यापारप्रयोज्यफलाश्रयत्वमीप्सिततमत्वं तच्च नाग्न्यादौ प्रयोज्यता च जन्यजन्यसाधा
रणी स्वीयज्ञानप्रयोज्यज्ञानविषयसाधारणी च निवेश्या अत एव गां दोग्धि पयः इत्यादौ प
यसः कर्मत्वसिद्धिः मासमवनीत्यादौ अवच्छेदकतारूपव्याप्याश्रयस्य कर्मत्वसिद्धिः फल
त्वं च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वं स्पष्टं चेदं
वारणार्थानामितिसूत्रे प्रकृतसूत्रे च भाष्ये ॥ एवं च पयसौदनं भुंक्ते इत्यत्र पयसः करत्वस्यैव
विवक्षणेन प्रकृतधात्वर्थफलाश्रयत्वेनाविवक्षया च न कर्मत्वं पचकशान्तिपदिकार्थेपा
ले उभयविवक्षायां तु परत्वात्कर्मत्वमेव पयोगत्वभयव्यावर्त्तके भिन्नतमत्वस्य दुर्वचत्वात्

यत्तु भाष्येऽन्वयव्यतिरेकाभ्यां पयस ईप्सिततमत्वं दर्शयित्वा तत्र कर्मत्वाशंकाकरणात् तत्र ईप्सित
शब्दस्याभिप्रेतपरस्य तद्रूपस्य ग्रहणमभिप्रेतम् अत एव कैयटेनोक्तं अन्वयव्यतिरेकाभ्यां दधिप
यसोरीप्सिततमत्वं न त्वोदनस्येति दर्शयतीति अग्रे च क्रियया प्राप्तुं ईप्सिततममिति नीत्युक्तं तस्या
प्योदन एवेप्सिततमो न तु गुणत्वेऽस्यानुरोध इति क्रियाजन्यफलाश्रयता ओदन एव न तु क
रणत्वेन गुणभूते दध्यादाविति तदर्थ इत्यादिभाष्यभाष्यप्रदीपोद्योते स्पष्टं तस्मात् तत्र ग्रह
णफलमग्रे माणवकं वारयतीति पयसौदनमिति त्वीप्सितशब्दस्य क्रियया क्रियाशब्दस्य पु अयत्वविव
लमिति तु चिन्त्यम् न चैवं प्रकर्षप्रतियोग्युपादानेऽग्रे माणवकं वारयतीतिऽत्रैव स्यात् तत्तु घट त्तावेति
प प्रपतीत्यादावितिवाच्यं ललाटकुक्कुटौ पश्यतीत्यादिनिर्देशे तदनुपादानेपि सम्भा
न्य ज्ञापनेनादोषात् इत्यलं विस्तरः ननु तथापि कर्मत्वमनेन सामर्थ्येनैव हेत्वादिसंग्रहे सिद्धे +
किमनीप्सितग्रहणेनेति चेदीप्सितापन्नेरित्याहुः अत्र चाश्रययोर्द्वितीयार्थः इत्युक्तं यद्यपि कर्म
णीक्तेरित्यधिकरणे च विहितानां द्वितीयादीनामाश्रयो इति तुल्यं तथापि तन्निरूपकं फलं
व्यापारः स्वाश्रयद्वारा तदुभयं चेति फलीभूते शाब्दबोधे वैलक्षण्यं तरमपि वक्ष्यते नेन चाधारत्वे
व वाच्यास्तु कर्मणीत्यादिसूत्रस्वरसभंगापत्तेः आश्रयतात्वरूपशक्यतावच्छेदकतावच्छे
दकैक्यात् न शक्यतावच्छेदकानंत्यं शक्यतावच्छेदकगौरवं च प्रामाणिकत्वात् तत्रैवावहेव सत्त्व
तेनाधारताशब्देनाधारतासमानाधिकरणत्वं इष्टं क्रियाविशेषस्य विवक्षितत्वात् तेनान्य +

शा· शो·
तिलक

गौरवे तस्य चाभिलापकशब्दांतराभावात् आधारतापदेनोक्तिरिति बोध्यं एतेन यत्र घटं जा
नातीत्यादौ विषयत्वमर्थस्तत्र पात्यं कर्मादिभिन्नार्थस्य शेषपदेन ग्रहणेन षष्ठ्यापत्तेः शे
षषष्ठ्या वेति नियमात् कर्मणि द्वितीयेत्यादौ कर्मपदेन तु कृत्रिमाकृत्रिमन्यायेन स्वशास्त्रसं
केतितस्यैव ग्रहणं विषयतायां कर्मत्वव्यवहाराभावाच्च लोके करणादिपदानां धर्मिपरतया दृष्ट
त्वेन वक्ष्यमाणानुरोधेन च धर्मिण एव शक्तेः रुचितत्वात् कर्मैवार्थो न तु कर्मत्वादि तथा तिङः त्वपि ध
र्मिवार्थः अत एव कर्तृविहितलः कर्मणि च तयोरेव वक्ष्यते नियमत्राणामपेक्षं पाचको देवदत्तः
पक्व ओदन इत्यादौ सामानाधिकरण्यानुरोधे न कृतां धर्मिवाचकतया घञश्च भावकत्वाच्च हरिभि
त्यादौ भक्ष्यत्वार्थकर्मणः स्वघटकाधारतानिरूपकत्वसंबंधेन क्रियान्वयः यदि तु घञः भावघञन्तवि
वेक न्यायेनाकृत्यधिकरणन्यायेन वा शक्तिविशेषणत्व एव शक्यः तस्य च निरूपकतासंबंधेन धा
त्वर्थेन्वयः यद्वा ज्ञानत्वावच्छिन्नाततेय वन् तादृश शक्तिरूपधर्मेण तद्धृष्ठान्तयातेयस्तदाक्लृप्त कृत्त्व
पि धर्ममात्रेण तदेनं क्रममभियुक्तैः आश्रयो विधिरुद्देश्यः संबंधः शक्तिरेव वेति सर्वेषामन्वयायिका
घक्रमप्रधानतीयं हेयमेवेति दिक् नन्वेवमपि पक्वमोदनं भुंक्ते इत्यत्र द्वितीयानुपपत्तिः अनभि
हिताधिकारादुक्तार्थानामप्रयोगाच्चेति चेन्न पचिनिरूपितकर्मत्वशक्तेरभिहितत्वेपि प्रधान
भुजिक्रियानिरूपितानभिहितकर्मत्वमादाय द्वितीयोपपत्तेः एवमहं भुक्त्वा व्रजामीत्यर्थेम।
याभुक्त्वा व्रजामीति न प्रयोगः क्त्वाप्रत्ययार्थक्रियायाः सामानाधिकरण्यसंबंधेन प्रधानकि

यायामन्वयस्य सत्वेन तत्कार्यकत्वप्रयातत्क्रियायाः पार्थक्येन कर्त्रोकान्तताभावात् प्रधानेनत्वयो
र्येत्रइत्यस्यक्रिययोः पृथक्त्व शक्तिर्गुणाश्रयानतत्प्रधान मनुरुध्यते प्रधानुविषयाशक्तिः शब्द
येनाभिधीयते यदागुणेनदानतद्दत्तं क्वापिश्रूनीयतइतिहर्युक्तेश्चयत्रनयेवरीत्यापत्याशक्त
रूपेऽदनाभुज्यतइत्यत्रभुजनाभिहितेनपाकर्मेणिश्चयमेवपचेरप्रधान्यात्तत्रविद्यमानायाम्पि
पचिनिरूपितशक्तेः प्रधानभुजिनिरूपिताभिहितशक्तिसमानाधिकरणत्वेनाभिहितत्ववदेव
प्रतीत्यास्यकार्यानारंभकत्वात्तद्वदत्रस्तु तत्पदोपात्तेगुणक्रियानिरूपिताशक्तिनास्त्येव
यतोयुगपदुभयत्रशाब्दान्वयासंभवेनएकत्रप्रधानेएवशाब्दान्वयः इतरेणतुसंनिधानादा
र्थइतिहरिणाप्युक्तं पक्त्वाभुज्यतेइत्यादौकेचिन्नव्यपतेतेओदनपचतिः सोसावनुमाना
त्प्रतीयतइतितत्रग्रामायगंतुमिच्छतीतितिमनुविधायकस्तत्रस्थभाष्यप्रयोगविरोधापत्तेः
तस्मादार्थोन्वयेविशक्तिरस्त्येव अतएवतत्रभाष्येउक्तं गमेर्ग्रामः कर्मइच्छेस्तुभयमिति
वदंति इदं चस्वामिणमलिनिस्तत्रेसप्तमीपंचम्योःकारकमध्यइतिसूत्रेचभाष्यकैयट
योःस्पष्टं अतएवग्रामादेश्वास्तेग्रामनेवृत्तेइत्यादौसप्तम्यादिक्रियानिरूपिताधिकरणत्व
स्यान्तत्त्वेपिग्रासिनिरूपितस्यानभिहितत्वात्सप्तमीसिद्धान्तदयमत्रनिष्कर्षः पत्रक्रिय
योरेककर्मकत्वंतत्रोपात्तकर्मणः प्रधानाख्यातातांतवाच्यक्रिययैवशाब्दान्वयः नतदंता
तार्थेनअतएवग्रामंगंतुमिच्छतइतिन तदुक्तं हरिणाप्रवेशुगतिसंस्पर्शेनग्रामेयोलो

प्र॰शे॰

विधीयते तत्रैषिणेवनिर्भेदः क्रियते गतिकर्मण इत्युक्ते तथा स्थित्वाभिनिविशते सन्मार्ग
इत्यादौ स्थितिक्रियाधिकरणत्वेपि सप्तमी तद्वत्तं तथाभिनिविशोकमेतिदं तेनाभिधीयते
त्वांतेधिकरणत्वेपि न तत्रेष्टं इति सप्तमीमिति अयं चा तिङन्तार्थक्रियानिरूपितशक्तेरेवस्वभा
वः यत्तु समानाधिकरणगुणशक्तेरभिहितत्वस्वकार्यं अत एव स्य शुणयांन्त्यं ध्रुवतिहंत
शकामित्यपि भवतीति कैयटः शकामित्यादेरपुरस्तौ त्वादिनिरूपितगुणत्वेनन्यायापूर्वत्वैः
प्रतिहन्तुमित्यनेनापिकर्मान्वयसंभवाद्धिति प्राचीनग्रन्थपरिशीलनशालिनो विभावयन्तु
एतेन पक्त्वा भुज्यत इत्यादौ कर्मणः पचिभुजिभ्यां न युगपत्कारकोन्वयः किं त्वन्यतरेण शा।
ब्दापरेणार्थः तत्र प्रथमाद्वितीये व्यवस्थिते एव तद्यथा पक्त्वा भुज्यते ओदनः किं पक्त्वा
अर्थादोदनं यदा त्वोदनं पक्त्वा भुज्यत इति प्रयुज्यते तदा भुज्यत इत्यत्रार्थादोदन इति गम्यते ए
वं विवक्षाभेदेन ह जयितं शक्यते हरिर्हरिं चेत्युभयं साध्विति परास्तं अहं भुक्त्वा व्रजामीत्यर्थे मया
भुक्त्वा व्रजामीत्यापत्तेश्च समानाधिकरणेनान्वयेपि पार्थक्येन कर्त्राकांक्षाभावस्य दुरपपाद
त्वात् वाक्यार्थबोधात्प्राक् पदार्थोपस्थितिकाले क्रिययोः परस्पराकांक्षायाया दुर्वारत्वात्
अधिकं भाष्यप्रदीपोद्योतेष्वनुसन्धेयमित्यलं तेइष्टं अभिहितेत्विति उक्तार्थानामप्रयोग इति न्या
येन द्वितीयायाः प्राप्तेर्विनिर्भावः ननु इदं तरत्व बोधनार्थं समासेति सूत्रभाष्यात् नहि द्विर्बद्धं
भवतीति न्यायेनोक्तार्थप्रयोगोपि स्यात् अत एव द्वौ घटौ त्वमितिर्त्वनीति इत्यादि संगच्छते अ

र्थेन नित्यसमासः इति वचनमनमात्रज्ञापकं मयि वक्ष्यते वकुवाकल्पवादीनां वाधान्न समावेशप्रसक्त

प्रसंगभवे वाधनं भवतीति न्यायात् अत एव वास्तु इष्टम् आदिविषये स्मी युट् शवादिकं नेति चेन्न लक्ष्या

नुरोधेनात्र हि द्विवेदमिति न्यायानाश्रयणात् अत एव समासेनोक्तमादिवादेः प्रयोगो नेति संगच्छते प्रथ

मैवेति सा हि नामार्थस्य नाम्नोक्तत्वेपि भवत्येव ननु कर्मत्वस्योक्तत्वेपि विभक्त्यर्थसंख्याया अनुक्त

त्वात् द्वितीया स्यादेव यथा एकादिशब्देभ्यः संख्याया उक्तत्वेपि कर्मत्वादिबोधनाय सा क्रियते लोकयो

रित्येकवाक्यतया हि कर्मणि एकत्वे च द्वितीयैकवचनमित्यादि :कर्मणि द्वितीयेत्यादीनां वाक्यार्थः

संख्याकारकयोरुभयोरिव प्रतिलाघवात् तयोश्चैकपदार्थयोरवैवकारादाविव परस्परविशेष्यवि

शेषणाभावः विशिष्टशक्तौ न शक्यतावच्छेदकस्य गुरुत्वापत्तेः विशेष्यविशेषणभावे विनिगम

नाविरहेण शक्यानंत्यापत्तेश्च संख्यायाश्चाश्रयाकांक्षायां च प्रत्यासत्त्या कर्मादेरेवत्वमिति चेत्त्र पाठांत

रं प्रथमैकवचनादिभिरपि तस्या बोधयितुं शक्यत्वात् पंचकं प्रातिपदिकार्थपक्षेनु अनभिहित इति

सूत्रं तदा हि प्रातिपदिके नोक्ते कर्मत्वादौ भवति द्वितीयादेः तथा तिङादिभिरनुक्तेपि स्यादतस्तद्वारणा

य तदावश्यकम् अनयैव रीत्या संख्यातिरिक्तं च तु यत् प्रातिपदिकार्थः संख्यामात्रं विभक्त्यर्थ इति पक्षे

प्यावश्यकं तत् इत्थं च कारकमात्रं विभक्त्यर्थ इति पक्षे दोषाभावात् त्रिकं प्रातिपदिकार्थ इति पक्षे

पि न दोषः अनभिहित इत्यधिकारात् अनभिहित इत्यधिकृतं हि कर्मणीत्यादीनामेव विशेषणं न

तु संख्याया विप्रकृष्टत्वात् तथा हि एकवाक्यतया व्याख्यानेपि न कर्मणि एकत्वे इत्यादिरर्थः :प

अधिपरीइति सर्वोपि भावो स्फुटमेव मत

श्लो॰ श्लो॰

टमित्यादिशब्दाद्विवरणविशेष्यभावापन्नयोरेवोपस्थितेः शक्तिग्रहपदार्थोपस्थित्योः समानाकार
त्वस्वीकाराच्चलघोपस्थितत्वेविशिष्टशक्तेरेववाच्यतयासूत्रार्थस्यापितयैवौचित्यात् एवं कर्मणि
पदेकत्वं तत्रेत्यर्थः नचकर्मणीत्यस्यश्रुतत्वेनद्व्येकयोरित्यस्यागन्तुकत्वेनद्वितीयापदेनमात्रा +
त्वकर्मणीत्यन्वयस्यैवौचित्यात्तस्यव्यापाविशेषणत्वस्यैवप्रापकत्वाच्चैकत्वविशिष्टकर्मणीत्येवा
र्थो युक्त इतिवाच्यं समानविभक्तिकानामार्थयोर्भेदान्वयायोगेनोभयोधाराधेयभावेनान्वययोग्यता
याद्वारीभूतक्रियायाश्चसंभवेनचत्वत्रार्थासंभवात् नचैकत्वपदस्यतद्धतिलक्षणयाऽभेदान्वयस
लभः द्व्येकयोरितिसूत्रेएकत्वलाक्षणिकपदोपादानेनतस्यधर्मिपरत्वाभावबोधनादितिसूत्राशय
यः एवंचकर्माद्यन्यत्रावपिप्रधानैकत्वादिप्रतिपत्तयेद्वितीयादिप्रसंगैवारणायानभिहितइत्यप्रधा

कथाद्येत्र त्रिद्वितीयादे यो

नकर्मादिविशेषणार्थमावश्यकं उक्तार्थानामितिन्यायश्चप्रधानार्थ एवेत्यपास्तमिति स्पष्टंभाष्य
कैयटयोः कारकमात्रविभक्त्यर्थ इतिपक्षेतत्त्वायानुवादकमेवसूत्रमितिवाधकेविभक्तटं करोती +
त्यादौमात्रग्रहणेन संबोधनग्रहणेनचविभक्त्यर्थाधिक्ये प्रथमायाः प्रवृत्तेः सावकाशाद्विती +
योनवकाशप्रथमयाधकत्वः कटइत्यादौवाधितं तेक्तशब्दघटकप्रत्ययेनाभिधानादाधिक्यस्या
भावात् वृक्षइत्यादावपि तिङ्समानाधिकरणे प्रथमेत्यादिभाष्यप्रमाणेन प्रथमायाः प्रवृत्ति
पान्वयिकर्त्राद्यन्वयेएवसाधुतयास्तीत्यध्याहारावश्यकत्वेन तदर्थप्रतिकर्तृत्वेन तृतीयाप्रा
प्तेः रक्तादिनिरूढिपरेनीलमितिवाक्येपिप्रथमात्वन्यपर्थे तदावश्यकत्वेनकर्तृत्वस्यत्वात् ५

तेननिस्पन्दोघटइत्यादौनित्यत्वादीनांघटत्वादिनातावच्छेदेविवक्षितेनप्रथमायाअवकाशइति ।
परास्तंविशिष्टशक्तिवादेघटत्वादिजातीपदार्थैकदेशत्वेननतत्रैतरपदार्थान्वयस्यवक्तुमश
क्यत्वाच्चकेवलजातिशक्तिवादेपिविशिष्टोपस्थितिनियमेकार्यतावच्छेदकत्वाद्यध्यवसितस्यायम
र्थोविशेषतिषेध्याद्धेतिप्रतीकमुपादायावकाशाभ्युपगमोदमुच्यतेइतिवदताकैयटेन एवंचानभि
हितइतिसूत्रस्यार्थमेवेत्याहुः यत्तुरक्तादिनिःसृतत्रिपरेनीलमित्यादौप्रथमायाअवकाशमभ्युप
गम्यपरस्यापितथैवमनुक्तेनतत्र ततोपिपरत्वेनभवनोलाभोग्यः करइत्यादौकृद्योगलक्षणषष्ठीप्रसंगा
त्कर्तव्यः कटइत्यादौदोषाच्च यथाचात्रकृत्यानामितिनिषेधोननथानत्रैवस्वरूपेन प्रमाणंदइति
श्रानंदककर्तृकप्राश्निकमीभूतइत्यर्थः "इदंचवृत्यनुरोधेन परेतुयथाद्वितीयादिभिः कारकाणांत
त्कर्मत्वादिशक्तिमत्वेनाभिधानंतथासमासेनतद्धितेनवाबोधः किंतुकर्मकरणादिपदैरिवफ
लाश्रयत्वादिनैवशास्त्रइत्यादौतुनकारकान्वययोग्यतावच्छेदकसाध्यत्वेनधात्वर्थस्यापिभान
मतोननत्रैतत्कारकाणामप्यन्वयः एवंचतत्रद्वितीयादिप्राप्तिरेवन अतएवकर्तृकर्मणोरिति
सूत्रेकृतीत्यस्यतद्धिताधिकोमाभूदितिप्रयोजनंभाष्याद्युक्तं अन्यथादेवदत्तेनशास्त्रंघटइत्यादिवा
वृत्यातद्वारितार्थ्यंतावत्तदर्थंतमर्थोनसिध्येत् उपपादयिष्यतेचेदंतत्रैव अतएवप्रकृतसूत्रेभाष्ये
कर्मणिद्वितीयेत्याद्यनंतरसूत्रेषुतद्धितसमासपरिगणनफलमनुक्तासमर्थानांषष्ठीविषयेऽपगव ग
स्त्रिरत्नुरित्यत्रतत्फलमुक्तं संबंधस्याप्यनुपयैवरूपेणषष्ठ्याभानंतेनैवरूपेणतद्धितादिभिरपिस

मुदाय शक्तेत्विन दोषः इति भाष्यानुसारीयं पाठः इत्याहुः ॥ प्रायेणोक्तस्य फलमाह कश्चिदिति अत एव
परिगणनेन भाष्येऽपरस्यान्वयानां न च कटं भीष्मं कुर्वित्यादौ विशेष्योक्तत्र द्वितीयायोगानर्थत्वात् वि
शेषणतात्पर्यस्यापि तिवाच्यं पूर्वगुणेति समानाधिकरणे षष्ठीसमासनिषेधेनाभेदान्वयस्य
तेविशेषणे हि प्रोष्ठविभक्तिसजातीयाऽभेदार्थिका विभक्तिः साधुरिति ज्ञापनात् किं च भीष्मादि
पदं कटस्य कर्मत्वं प्रति पाद्यं न तु कटशब्दोत्तरद्वितीयया तदनभिधानात् तत्र योग्यतावशपकः
तत्र भिन्नविभक्तित्वेन यावतीतरभावात् तेभ्योपि द्वितीया भविष्यति कटोपि कर्मभीष्मादयोपी
ति पदेषु त्वयानां प्रकृत्यर्थान्विते तस्याधेयबोधकत्वमिति व्युत्पत्त्या कटत्वविशिष्टकटनिष्ठक
र्मत्वोक्तावपि भीष्मत्वादिविशिष्टनिष्ठस्य कर्मत्वस्यानुक्तत्वेन दोषाभावाच्च अत एवात्र पदेऽसवे
र्णाकारकत्वाविशेषेण विनिगमनाविरहात् भावनायामेवान्वयः पार्ष्णिकस्तु परस्परान्वयः केद।
बोधः कृत्स्नत्वपक्षे तु न प्रकृत्यर्थस्य कर्मतामाह किं तु स्वप्रकृत्यर्थप्रतियस्य यस्य कर्मत्वात् तस्य।
सर्वस्यापीति कृतः कटः संदरस्त्यादौ न क्वापि द्वितीयादिप्रसक्तिः अत एवामुं नारद इत्यबोधि
सहत्यादौ प्रथमा संगच्छते इति नाकर्मत्वस्योक्तत्वात् ननु नारद इति इत्यादौ निपातेन कर्मत्वा
नोक्तकर्मत्वादेरर्थे मे ज्ञात्वेनानुमितत्वात् पि द्वितीयानापत्तिरिति चेन्न इति शब्देन विभक्त्येव समभि
व्याहृतपदार्थमात्रनिष्ठकर्मत्वस्योक्तत्वात् अनुमितत्वात्र दोष नचैवमधिहरीति वस्त्रित्याव्ययी
भावापत्तिरिति वाच्यं साकल्यान्नेष्विन्येव सिद्धे वचनग्रहणेन विभक्त्यर्थमात्र वृत्त्यव्ययेनैव

कटशब्देन तदृशाकटस्यानभिधानाद् भीष्मादिपदस्य योग्यतावशपक इति पाठः

नञ्

तद्विधानात् अस्य च समभिव्याहृतपदस्य जन्यबोधप्रकारमात्रपरतया द्योतकत्वस्यापि सत्वेन तन्मा
त्रार्थत्वात् अत एवेति प्रकरणे हेत्वोश्चकाद्याः शाब्दसमाप्तिषु निदर्शने प्रकारे च स्यादिति कोप्रो
क्तं नचाव्ययमिति विभक्तिसूत्रेण समुदायार्थः तस्मिन्निति निर्दिष्टे पूर्वस्यादि निर्देशो वृत्तिशाहे तदश
वृत्तेः एवं च प्रयोगावित्त्व्यक्तिविशेष्यकनास्तित्वप्रकारबोध इति वाक्यार्थः केचित्तु नास्तीति श्रीक
ल्पीयज्ञानाकारानुकरणमेव नास्तीत्यनेन कथ्यमानाभिलप्यमानाकारो बोध इति बोधः एवं च प्र
मां तस्याप्रातिपदिकत्वात् कथं तत्र द्वितीयाप्राप्तिः इतः कर्मताद्योतकत्वेन मानं किं च सां
प्रतमित्यस्यैतर्हि संप्रतीदानीमधुनासांप्रतं तथेत्यमरादिदानीमित्यर्थतया वर्तमानकालोपी
त्यत्र वर्तमानकालबोधकस्य युज्यत इत्यस्याध्याहारादोष मूलोक्तार्थकत्वेन न मानं
असांप्रतमिति चासमर्थसमास इति प्रायेणोत्तिचिंतनमेवं अत एव ताप्ये परिगणनमित्येवालं
यहानन्समभिव्याहृतेन न च न युज्यत इत्याध्याह्रियत इति न कश्चिद्दोषः अत एवाधिहरीत्यादौ
समासः नहि च न सामर्थ्येन ह्यस्य परिगणनत्वमेव कल्पयितुमुक्तम् ऋषितात्पर्यस्य चर
विकासैव निर्णीतमुचितत्वात् अत एव अत्र सांप्रतस्यादौ सप्तमीसंगच्छते इत्याहुः नचैवं
नास्तीति वक्तुं इति पंचमीति स्यादिति वाच्यं शाब्दशक्तिस्वभावेन सविषयकधात्वर्थनि
रूपितकर्मताद्योतकत्वस्यैवेतो स्वीकारेणादोषादित्याहुः युज्यत इत्यर्थ इति असांप्रतमि
ति समासे विभक्तियपेवान्वयान्यसत्त्वप्रतिबंध एव न युज्यत इत्यर्थात् अव्ययानामनेकार्थ

अव्ययमिति विभ
क्तिसूत्रेणापि
न समासः तस्य
ह्यसामर्थ्यत्वात्
अव्ययासिद्धस्ती
ताति निर्देशः
संगच्छते पाठः

प्रा॰ प्र॰

त्वात्पृष्टे कृतमित्यर्थे व्यसां प्रतं कृतमितिभवत्येव तथाप्युक्तं तथाप्युक्तत्वं च समभिव्याहृतधा
त्वर्थप्रधानव्यापारप्रयोज्यफलाश्रयत्वं रूपं ननु विभागादेरपि पूर्वसूत्रेणासिद्धत्वात् किमर्थमि
दमिति चेन्न पराधीनतया विषं भुञ्जानेन विषस्योद्देश्यत्वाभावादप्राप्तेः एवं चानीप्सितमित्यस्या
नुद्देश्यमित्यर्थः तत्र द्वेष्यमुदासीनं चोभयमपि बोध्यं तत्र प्रत्यासत्तिन्यायेन यद्धात्वर्थजन्य
फलाश्रयत्वेन कर्मत्वं तद्धात्वर्थकर्तुरेवेति बोध्यं तेनाग्रे माणवकं वारयतीत्यादौ अग्न्यादेर्नो।
नेनापि कर्मत्वमिति बोध्यं तृणमिति यथा स्पृश्यमानस्य गंगादेरीप्सितस्य क्रियया योगः तज्ज
न्यसंयोगादिफलाधारत्वात् तथैवानीप्सितस्य तृणादेरपीति भावः तथाप्युक्तमिति किम् वि
षलोष्टं नं भुंक्ते इत्यादौ करणत्वमात्रविवक्षायां विषस्य माभूदिति न हि तद्धात्वर्थफलान्वयि
किं तु तृतीयोपात्तव्यापार एवेति बोध्यं प्रयागात्काशीं गच्छति देवदत्त इत्यत्र प्रयागस्योदासीन
त्वेन कर्मत्वापत्तिः श्रुतिहिशेषेणान्वनास्य प्रकृतधात्वर्थफलाश्रयत्वमिति न दोषः न च कर्तुरी
प्सिततममित्यस्यानुवृत्त्या निर्वाहः अनीप्सितमित्यस्य वाच्यार्थे विरोधेन तदनुवृत्त्यसंभवात्
कश्चित्तु विभागस्येप्सिततमत्वाभावात् कर्तुरीप्सिततममित्यस्य प्रवृत्त्याव वितथाप्युक्तमिति
प्राहुस्तेव क्रियाजन्यफलशालित्वमेव तथाप्युक्तत्वं न तस्य फलस्य प्रकृतधात्वर्थत्वाद्गुरु
हः किंच फलस्य धात्वर्थत्वपर्यन्तमाग्रहे पि न क्षतिः अपादानप्रकरणे विभागस्य धात्वर्थतया
वक्ष्यमाणत्वात् परं तु विषं भुङ्क्ते इत्यादौ सावकाशया अस्याश्चानवकाशायापादानसंज्ञा

वधिकारकर्त्तुरीप्सिततममितिसूत्रविहितकर्मसंज्ञान्वयापादनत्वस्य परत्वाद्बाधिकाऽस्त एव ग्रामं
त्यजतीत्यादौ द्वितीयासिद्धिः एतेनानवकाशापासाकाशायाबाधादिति साधकतमसूत्रस्य
मनोरमायां ग्रन्थो व्याख्यातान्यास्तुरितिदिक् अपादानादिविशेषैरविवक्षितमिति अवधित्वा।
दिरूपेणाविवक्षितमित्यर्थः अकथितशब्दोत्र कीर्तितपर्यायो नाप्रधानपर इति भावः ननु
तंभाष्ये केनाकथितं अपादानादिभिर्विशेषैरकथितमिति तेनापादानत्वादिविवक्षायां पंचम्या
द्येव अन्यथा तद्विवक्षायामपि परत्वादनेन कर्मत्वमेव स्यादिति बोध्यं केन रूपेणातद्विव
क्षेति चेत्संबंधत्वेनेति गृहाण एवं च षष्ठ्यर्थे एतत्कर्मसंज्ञाविहितं द्वितीयेति फलितम् ध्वनि
तं चेदं पूर्वविधिविषयप्रसक्तिपूर्वकतत्तद्विषये पूर्वविधिरप्रसक्तिपूर्वकं तत्तद्विषये एवेतत्र
शक्ति वा प्रकारपूर्वविधावितिभाष्येण संयोगवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वात् कारक
मिति क्रियान्वयीत्यर्थः तेन कारकत्वप्रयुक्तकार्यैकार्यसिद्धिः नन्वेवं नटस्य शृणोतीत्यादा
वतिप्रसंगः स्यात् सर्वेषामत्र तदप्राप्तेः यत्तु नटात्त्रिः संबंधं शब्दं गृह्णातीत्यर्थात्रापादाना
त्वाविवक्षायामेतत्प्रयोग इति तत्र अख्यातोपयोगे इति सूत्रे सर्वपापादनत्वस्यानिष्टत्वाच्चेउ.
पयोगग्रहणेनाख्यातुरीदृशालक्षणयापादानत्वस्यानिष्टत्वाद्वतः परिगणनमाह परिगणनं
नत्वं चास्याख्यातोपयोगे इति सूत्रे भाष्ये स्पष्टं दुह्याचिनिकर्मयुगिति कर्मेनिष्ठधात्वर्थस्यानि
मित्ततयासंबंधीत्यर्थः तेन गां दोग्धि पयः स्थाल्यामित्यादौ स्थाल्यादेरधिकरणत्वाविव

प्रा॰ प्रो॰

त्तायामपि नानेन कर्मत्वं दुहं च पूर्वसूत्राप्रवृत्तौ ग्रहणोऽनुवृत्त्या लभ्यते तस्य केनेत्याकांक्षायामुप +
स्थितं कर्मण एवान्वः आख्यातोपयोगे न च तथा युक्तमित्यनुवृत्तौ त्राविधानपातफलशालित्वं नि
मित्तमिति वाच्यं एवं हि पूर्वसूत्रविहितकर्मत्वाविवक्षायामेव पर्यवसन्नत्वेन भाष्येऽपादानदि
ग्रहणे वैयर्थ्यापत्तेः उपयोगनिमित्तमित्यन्तरास्यार्थस्यात्तु ईप्सितमेवतु यत्स्यात्तस्य भाष्यत्वा।
कथ्यितेनेति सूत्रशेषभाष्ये तु ईप्सिततमत्वाभावमात्रप्रतिपादनपरं ननु ईप्सितत्वप्रतिपादन
परमिति स्पष्टं कैयटादौ किं च प्राकडारसूत्रोक्तरीत्या व्यापारद्वयार्थत्वं धातोराश्रित्योक्तसूत्रा
भ्यां सिद्धे ऽद किमर्थमित्याशंकायां भाष्ये उक्तं ईप्सितमेवेति नानीप्सितं नापीप्सिततमं चेत्य।
र्थः तत्रानीप्सितत्वाभावः स्वरूपत एव द्वेष्योदासीनयोरेव तत्रानीप्सितग्रहणेन ग्रहणात्
नापीप्सिततमत्वं विभागानुकूलव्यापारार्थकत्वे फलाश्रयत्वाभावात् व्यापारद्वयार्थत्वेऽपि
फलाश्रयत्वेनाविवक्षायां संबंधत्वेन विवक्षायामीप्सिततमत्वाभावाच्च वस्तुतः फलाश्रयत्वा
दीप्सिततमत्वमव्याहतमेव एवकारेणास्यार्थस्तत्रानात्पर्याभावाच्चेति तद्भाष्यस्वात्पर्यसत्त्वेन तथा
युक्तग्रहणानुवृत्तौ मानाभावश्चेति दिक् अत्रापानादीत्यादिग्रहणेनापादानसंप्रदानाधिकर
णकर्मण्येव शसोऽलेरूदमेवाभिसंधाय इह हि याचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तम
पूर्वविधौ ब्रुविशासि गुणेन च यत्सचते तदकीर्तितमाचरितं क" विनानीवह्योर्हरते श्चापि ग
त्यर्थानां तथैव च द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चयरति भाष्ये उक्तं उपयोगोमुख्यं क

नदस्य शृणोतीत्यादावति व्याप्तिशंकापरस्य परिगणनेन तत्परिहारपरस्य चाख्यातोपयोग इति सूत्रस्य विरोधाच
ईप्सितमेवतु यत्स्यात्तस्य मविष्यत्यकथितेनेति सूत्रशेषभाष्ये नतदनुवृत्तितात्पर्यकमिति भाष्यप्रदीपोद्योतेऽनिरूपि
ते पाठांतरं

मूलएवोप
योगनिमित्त
मिति भाष्ये उ
क्तं

मेतन्निमित्तं तेन न संबध्यमानं गुणेन कारकेणाकर्मणा यत्तच्च नैतत्कृतधात्वर्थनिमित्तत्वया संबध्य
ते इत्यर्थः अपूर्वविधौ पूर्वोक्तानामपादानादीनां चेह हि विषयो नास्तीत्यर्थः यद्यपि करणमपि
पूर्वेण व्याप्तिकर्मयुक्ताभावान्न तद्ग्रहणं गां पयो दोग्धि हस्तेनेत्यादौ हस्तस्य गोनिष्ठविभागा
नुकूलव्यापारनिमित्तत्वेऽपि पयोनिष्ठविभागत्वनिमित्तत्वे मानाभावात् शास्त्रिगुणेन चेति
चेनत्वपत्यादीनां ग्रहणं नीवस्योद्देवनेश्छेति चेन्न दोषः एषां गत्यर्थानामित्युपलक्षितोन्नवस्र
त्रापान्नानां च हि कर्मकेषु ग्रहणं बोध्यमित्यन्वयुः केचित्तु पूर्वत्वमनन्वोपलक्षणं नेन कर्तुर्व।
प्यपादानादीन्यत्र ग्रहणं बोध्यं न च कर्तुर्ग्रहणे फलाभावः निवृत्तप्रेषणादुहादिभ्यो णिः।
च चित्तुहूसमानार्थत्वेन नन्यादिनियमात्कर्तुरीप्सितममित्याद्यप्राप्तेऽपि पयोऽस्य कर्तुः कर्तृत्वद
विवक्षायां फलस्य सत्त्वात् नेप्पयोऽस्य कर्तृत्वाविवक्षायां कर्तुः पयो गकत्वा नावाप्ति
जनापत्तिरितिवाच्यं अंतरंगत्वात्सर्वैर्णिचि तत्रस्तस्याविवक्षणात् नचाकृतव्यूहपरिभा
षया तदप्राप्तिः तस्या अनित्यत्वात् किंच संकेतविशेषसंबंधेन कर्तृपदवत्त्वं तत्र व्यापारा
श्रयो हि कर्तृपदार्थः तत्र गत्यादिसूत्रारंभसामर्थ्येन कर्तृपदवदित्यं तत्त्यागमात्रं बोध्यते सं
बंधत्वेन विवक्षाया मापिकालत्वव्यापाराश्रयत्वसत्त्वान्न दोषः अत एव ग्रामं गमयतीत्यादि
सिद्धिरित्याहुः तत्रोपलक्षणत्वे प्रमाणं चिंत्यं किंच गत्यादिसूत्रस्य नियमार्थत्वे परत्वेना।
स्यापि तेनवाधस्तिवोध्यं न चैवमपि भाक्ष्यभिक्ष्यग्रहणस्याधिकतत्वेन मूलेन्न्यूनतेतिवाच्यं या

३२७

327

श· शो·

ऽप्यर्थत्वे नैव सिद्धेः नच याचिर्विनयार्थ एव शक्यते इति वाच्यं मानाभावात् अर्थग्रहणं चात्रानु
पदमेव मूलकं ह्रदयतीति दिक् गां दोग्धि पय इति दुहेरत्र स्थितद्रवद्रव्यविभागानुकूलव्यापारानुकूल
व्यापारोऽर्थः तत्र विभागानुकूलव्यापारतदनुकूलव्यापारद्वयोद्देश्यफलाश्रयत्वात्पयसः प्राधा
न्यं उद्देश्यत्वाच्च तद्वैपरीत्याच्च गोर्गौणत्वं स्पष्टमेव विभागानुकूलव्यापारस्य पयोनिष्ठत्वे तु प्र
धानीभूतधात्वर्थव्यापारजन्यफलाश्रयत्वात्पयसः प्राधान्यं बोध्यं तत्र गोः पयस्यन्वय इति गवा
पयस्यापन्नयतीत्यर्थः पयो गां त्यजतीति पयसा गां त्याजयतीत्यर्थः ननु गोरपि कर्तृव्यापारजन्य
फलाश्रयत्वेन तथा युक्तामिति कर्तृ विति वा सिध्यति अत एव वा सो कर्तृलोकर्मत्वस्य न्याय
सिद्धत्वाद्यागमस्यादिहस्तंनियामार्थमिति हेतु मतिप्रेति तत्रे भाष्यकृतः अत एवाकडारसूत्रे
दो ऽपादानमुत्तराणि कारकाणि गौणेऽपि च परत्वात्कर्तरी ति ज्ञानतमं कर्मेति कर्मसंज्ञेति भाष्ये सं
गच्छते ग्रामादायातीत्यादौ संज्ञानराश्रयज्ञावव पादानसंधावया अवकाशः कर्मसंज्ञायास्तु
ग्रामं गच्छतीत्यादौ न चरत्र त धान्यपात्र फलाश्रयत्वरूपकर्मत्वस्य च कृत धान्यपात्र गत्यनावि
ष्टत्वे सति तज्जन्यविभागाश्रयत्वरूपस्यापादानत्वस्य तत्तन्नियता खेदो पाधिविशेषरूपस्या
वाकर्थं परत्वादित्युक्तिरिति वाच्यं पंचक प्रातिपदिकार्थ युगपद्विवक्षायाः कर्तृमशक्यत्वेनोभया
रक्षा प्राप्ते गो शब्देन नेतो भयं प्रतिपाद्यमिति विवक्षायाः सत्त्वेनादोषात् अवधित्वविवक्षायां गोस्तत्र प्रयोगः
पयो विभागानुकूलो व्यापारः तन्निष्ठविभागानुकूलः पयोऽधोवायोव्यापारस्तद्धि पयसि तीव्ररणे त्यथा

शा॰ शे॰ तदेतद्भेदे च विषयेऽस्याकारद्वारादितिसत्त्वाज्ञाज्ञाप्यवलाद्भयोर्द्वितीयैव वोधिकेति वोध्यं एवं चाकथि
तं चेति सूत्रं व्यर्थमिति चेन्न नपयोर्थिनउपायतयागोरपीप्सितत्वेनानीप्सितत्वाभावान्न यथा।
पुरुकमित्यस्याप्रवृत्तेः ईप्सिततमत्वाभावात्तु कर्तुरीप्सिततममित्यस्याप्यप्रवृत्तेः यदि तु शापुत्र
मीप्सिततमत्वं गोरप्यस्त्येव तर्हि कर्मत्वाविवक्षापूर्वकशेषत्वविवक्षायामपि षष्ठीवाधना
र्थमिदं ईप्सिततमत्वाभावश्चेति पादकभाष्यादिकप्रविवक्षतान्यर्थकमेवेति वोध्यपदानुद
वद्वयति द्विविभागानुकूलव्यापारएव दुहेरर्थः तदा गोरपादानत्वाविवक्षायामपि अनेनाद्वि
तीयापादानत्वविवक्षायां तु पंचम्येव गोः पयस्त्वन्यथे षष्ठीत्याहुः वलिं याचतइति याचधा
तोस्वत्वनिवृत्तिस्वत्वोत्पत्त्यनुकूलयत्नजनकव्यापारानुकूलव्यापारोर्थः तत्र स्वत्वनिवृत्ति
जनकव्यापारो वलिनिष्ठः तदनुकूलव्यापारो दीयतामित्याद्यभिलाषरूपो याचकनिष्ठः स्व
त्वनिवृत्त्यनुकूलव्यापारव्यापारमात्रस्य धात्वर्थत्वे विभागाश्रयत्वविवक्षायामपादानत्वमे
व तदविवक्षायां तु शाम्वत्‌ अविनीतमिति अत्र याचतेः स्वीकारानुकूलव्यापारानुकूलव्या न
पारोर्थः स्वीकारश्चेदमवश्यं करिष्यामीति प्रतिज्ञाप्रयोगजनकोज्ञानविशेषः अत्रानुपार्थमा
त्रविवक्षायांअविनीतं वितयेयाचतइति अधिकरणत्वं शाब्दसंप्रदानत्वं वास्त्वविनीतःप्रधानं कर्मगो
व णकर्मेति चेत्सत्तत्पदकर्मणोरस्याकथितं तं तिसूत्रविहितकर्मत्वरूपत्वादितिवोध्यं तुलानिति वि
क्षिप्त्वन्यभयानुकूलव्यापारोधात्वर्थः अत्र एवं तण्डुलानुविक्लेदयन्त्रोदनं निर्वर्तयतीत्यर्थः अ
पाठांतरं योरवलमं दिद्यापयि घनदति कैयटेनास्य विवरणात्‌ अत्र कर्तुर्विप्राप्तकर्मत्वविवक्षायामनेनकर्मत्वं न चात्रापादानत्वप्रसंगः वलेर्गौणति
प्रत्ययतरत्वार्थसमनतोः प्रत्ययात्‌ वलेर्गौ याचनइति पाठांतरं तदभाव योगमात्रकरणाभावात्‌ तदुक्तं भाष्ये नयाचनादपायो भवति याचितोसौ दद्यानी
ति नटाया चेन युज्यते इति एवं विभागस्य याच्य र्थत्वाभावे नैव गापादानत्वमिति तदाशयः कैयटोपि याचमित्तिप्रश्नविषयकर्मसंज्ञावेति

त्रचौदनः प्रधानं उद्देश्यत्वात् इदमेवाभिप्रेत्यार्थेः पचिरिति निकर्तुरिति सूत्रे भाष्यं यदा ह्यर्थत्वेष्व
विक्लित्तेः करणविवक्षा तदा तंडुलानामोदनं पचतीति तंडुलविकारमोदनं विक्लित्त्यानिष्पादयतीत्य
र्थः इदमपि तत्रैव भाष्ये तत्र कर्मत्वाविवक्षायां षष्ठ्यां प्राप्तायामनेन द्वितीया एवं काष्ठं भस्म क
रोतीत्यादौ विकृत्युत्पत्त्युभयानुकूलव्यापारोर्थः तत्र विकृत्याश्रयत्वेन काष्ठस्य कर्मता उत्प
त्त्याश्रयत्वेन भस्मन इति बोध्यं काष्ठं विकुर्वन् भस्मोत्पादयतीत्यर्थः एतदेव काष्ठादि विकार्य
मित्युच्यते तत्र काष्ठादेः कर्मत्वादिना विवक्षायामपि नाकथितत्वेनेति सूत्रविषयता दुहादिगणे ।
नादित्याहुः गर्गानिति स्वसंप्रदानकदानानुकूलव्यापारानुकूलो व्यापारः शासनरूपो दण्डार्थः
शासनेनेति येत्र तो संप्रदानसंज्ञा तु कर्तृसंज्ञया बाधात्र अत्र शतं प्रधानं उद्देश्यत्वात् अतए
व गर्गाः शतं दण्ड्यन्तामिति भाष्यं संगच्छते अर्थिनश्च राजानो हिरण्येन भवंतीति वाक्यशेषाच्च
अत एव केवलनिग्रहार्थो न दण्डिः अत एव ह्यत्र समुदाये वाक्यपरिसमाप्तिः गुणानुरोधेन प्र
धानावृत्तेरयुक्तत्वात् अर्थिन इत्यत्रार्थनमर्थः प्रार्थः प्रार्थनायस्यास्तीत्यर्थी हिरण्येनेतिक
रणे तृतीया कृतनश्वीकरमित्यादावि वभावनायामन्वयः यत्तु धनवाचकादर्थशब्दादिनि
हिरण्येनेति तृतीया अभेद इति तन्न धनवाच्यर्थशब्दादस्त्युपाधाविनिरनोरभावसमत्वयी
यांते भाष्यादौ स्पष्टत्वात् वाक्यशेषस्य दण्डनोपपादकत्वासंगतेश्च स्वस्वत्वोत्पत्त्यनुकूल
शासनरूपव्यापारमात्रार्थकत्वे विभागाश्रयविवक्षायां गर्गाणामपादानत्वे गृह्यमानादृष्टा

पा॰ शे॰ 329

व्यापारमात्रमर्थ इति नदंडिसमानार्थत्वात्तस्य अत एव कृषाभ्यासादिग्रहणं चरितार्थमित्यग्रे वक्ष्यते
एतेन ज्ञग्राहकत्वमेव शाक्त्यमिति प्राचीनोक्तमपास्तं पराक्रमातिशयद्योतनार्थं जहारप्रकृतरूमि
त्यव पाठस्योचितत्वाच्चेत्याहुः अत्र मवकरणं हीति पाठांतरं संयोगोत्तरकालिकविभागासमा।
नाधिकरणसंयोगानुकूलव्यापारोपक्लदनुकूलव्यापारोरूपेऽर्थे त्यप्राप्ते किंचिदधिकरण
कविशेषस्थित्यनुकूलव्यापारानुकूलव्यापारः प्रार्थः अत्रो गां स्थापयति अत्रेण गौः स्थापयती
तिऽर्थस्य अजे गौस्तिष्ठतीति न च तां स्थापयतीत्यर्थस्यवततः संप्रत्ययादिति भाष्ये
कैयटयोः स्पष्टं इत्थं च अनुयोगितासंबंधावच्छिन्नोत्तरदेशसंयोगतदुत्तरकालिकदेशांतर
गतिस्थितिवैपरीत्यभयावच्छिन्नव्यापारोरूपेऽर्थः उदाहृतत्वाहो: प्राधान्यं अनुयोगितासं
बंधावच्छिन्नः स च तन्निष्ठः प्रतियोगितासंबंधावच्छिन्नोत्तरदेशसंयोगाद्यर्थत्वेऽधिकरण
त्वविवक्षायां सप्तमी पंथानं स्थापयतीति प्रश्नविषयार्थज्ञापनानुकूलव्यापारः स्थेरर्थः
स च व्यापारः केन पथा गंतव्यमिति जिज्ञासाबाधितरूपः अत्र ज्ञापनाश्रयत्वेन माणवकस्य
कर्मत्वं ज्ञानविषयत्वेन च पथस्तत्वं बोध्यं पाठांतरं यदा त्विज्ञासाविषयार्थज्ञानानुकू
लो व्यापारोऽर्थः संबंधसामान्येन च व्यापारे माणवकस्यान्वयस्तदा पथेनेन कर्मत्वं पूर्ववि
षयस्य कस्याप्यप्राप्तेः यत्तत्र माणवकत्वमार्गोपदेशं गृह्णातीत्यर्थे पादानत्वं प्राप्तमिति तत्
न्न नश्यादेवापायो भवति पृष्टीमो वञ्चाचष्टे ततोपायेन प्रसक्तनेरिति भाष्योक्तेः तदुक्तार्थ

स्यतनोऽसंप्रत्ययश्च एतेन माणवकाय पटं करोतीति संप्रदानत्वमप्यास्तं कर्मसंबंधवत्वेनेच्छाविष
यत्वाभावान्न दशाप्तेः पूर्वोक्तं भाष्यके यत्र विरोधाश्च उद्देश्यत्वान्यथ्यः प्राधान्यं ज्ञानानुकूलकि
मादिघटितप्रयोगे प्रोक्तरूपव्यापारार्थकत्वमात्रविवक्षायामपादानत्वमेवाहुः वृक्षमव।
चिनोतीति विभागानुकूलव्यापारानुकूलव्यापारश्चिनोतेरर्थः नत्वोद्देश्यत्वात्फलानां प्रा
धान्ये पाठोनरं वृक्षात्फलान्याटत्रेरत्यर्थेत्वपादानत्वं विभागपूर्वकादानेचिनोतिवर्तते रत्वं
ते धर्मवतेरत्यादि प्रतिपत्त्यनुकूलव्यापारानुकूलव्यापारोऽत्रार्थः प्रवृत्तिपर्यवसायि प्रतिपत्ति शब्दप्रयोगत्वे
क जनकव्यापारजनकव्यापारः शासेः सच व्यापारः संध्यां विधेहीत्यादिघटितोपदेशरूपः स्वतएव शा
सेर्बुद्धानसमानार्थत्वम् यदा तु ज्ञानानुकूलउक्तव्यापारो धात्वर्थः विषयतैव च फलतावच्छे
दकः संबंधः न दाव चनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात्तस्य संप्रदानत्वमकेचि
त्तु विषयताधेयतोभयसंबंधावच्छिन्नप्रतिपत्त्यनुकूलव्यापारोऽत्रार्थ इत्याहुः शानं नपती
तिस्म भिभवे ज्ञितये: स्यानुनयग्रहणं तस्याकर्मकत्वात् स्वसंप्रदानकत्वाननुकूलतिरस्कार पर
पर्यायपराभवाख्यव्यापारो ज्ञिधातोरर्थः विभागपूर्वकसत्वोत्पत्त्यनुकूलव्यापारमात्रार्थक।
त्वेऽपादानत्वम् उद्देश्यत्वाधनं प्रधानं मन्यानीति स्वं न गंतसारभागोत्थानानुकूलव्यापार फल
कव्यापारविशेषोऽमेयोरर्थः उत्थानमस्ति घटे शसंयोगः उत्थानानुकूलव्यापारमात्रविवक्षायां
कर्महाराक्रियाश्रयत्वविवक्षणेऽधिकरणत्वं बुद्धिकृतविभागाश्रयत्वविवक्षणेऽपादानत्वम्

शा॰ शे॰

अत्र तत्प्राधान्यं उद्देश्यत्वात् क्षीरनिधिर्गौणं अत एवाम्लनम्बुनिधिर्मंथरत्नु पपद्यत इ
त्याहुः मुष्णातीति पूर्वज्ञानपूर्वं ग्रहणानुकूलव्यापारो मुषेरर्थः परोद्देश्यत्वमप्यादिः यदानुगृह
णानुकूलव्यापारविशेष एवार्थस्तदा देवदत्तस्यापादानत्वं बोध्यं नयतीति उत्तरदेशसंयो
गानुकूलव्यापारानुकूलव्यापारो नेरर्थः संयोगस्य फलतावच्छेदकः संबंधोत्र प्रतियोगिता
तदनुकूलो व्यापारो ग्रामनिष्ठो वहनत्वादिरूपः एवं च व्यापारस्यैतावन्मात्रत्वात्
संज्ञानिष्ठग्रामसंयोगस्योद्देश्यत्वात्तज्ज्ञा प्रधानं यदाप्यनुयोगिनैव फलतावच्छेदकसंबंधः त
दनुकूलव्यापारस्याजानिष्ठत्वदा विप्रधानभूतव्यापारजन्यफलाश्रयत्वादत्रैव प्रधानं न त्व
एवमसिद्धप्राधान्यमिति सावैयधिकरण्यमिति तन्नत्र तत्केचित्तन प्राधान्यात्ययस्तः परामर्श इति मीमांसक
गंध्यास्तूपपयस्यानेदग्ध्या गमनेनार्थं प्राधान्यमादायनेयाः अत एव सत्त्वमुपादानं सार्थके
मित्याहुः स एव स्कंधग्रहणादिपूर्वी वहेरर्थः गत्यनुकूलव्यापारविशेषः कृषेः बलात्पु
हणपूर्वकं देशान्तरप्रापणं कृषतेः कश्चित्तु त्वादिसाहचर्यात् प्रापणार्थ एव न विलेखनार्थ
इत्याहुः ननु भाष्ये दुहियाचिरुधिप्रच्छिभिक्षिचिञ्ञां शासनीवहिहरतीनामेव ग्रहणस्योक्तत्वे
नान्येषां ग्रहणं निर्मूलमिति चेन्न चेनान्येषां ग्रहणमित्यर्थस्य कैयटेनोक्तत्वात् अन्ये च त
यतेः कर्षतेर्मथ्नेर्मुषेर्दण्डयतेः पचेरिति माधवेनोक्ताः अत एव गर्गाः शतं दण्ड्यन्तामिति वृत्ति
सूत्रस्य प्राक्रण्यामाप्रसंगात्यवेति कल्पानामिति सूत्रस्थ भाष्यप्रयोगः संगच्छते एते

नपचेर्योगे न एडलादीनां संबंधत्वेन विवक्षायां कर्मत्वे मानाभावे मात्रत्तस्याप्रामाणिकः पाठ इति
परास्तं अत एव तंडुलानामोदनं पचति तंडुलानोदनं पचतीति प्रयोगद्वयोपपत्तये प्रागुक्तरीत्या मूर्धः
पचिविवक्षणेन द्वितीयप्रयोगमुपपाद्याद्यप्रयोगोपपत्तये विक्लित्तेर्निर्वर्त्तने करणत्वमाश्रित्य विकारयो
गे षष्ठ्याश्रिता भाष्ये अन्यथा क्रियान्वयेपि मातुः मातुः स्मरतीतिवच्छेषत्वविवक्षायां तदुपपाद
नसंभवेन विक्लित्तेः करणत्वाश्रयणपूर्वकं विकारयोगषष्ठीपर्यन्तधावने बीजानापत्तेः यत्तु त्रस्तृत्त्वे
हरदत्तेन पचेर्द्विकर्मकत्वादि घपाठ इत्युक्तं तदेतेन परास्तं यत्तु कर्मवत्कर्मणेति सूत्रस्थ तु हि पच्योर्नैककर्तृ
सकर्मकयोर्विक्लित्तिवाचित्वे कोदाहरणे उदवरः फलं पच्यते स्वयमेवेति कैयटेनोक्तं पचिरत्र विषये हि कर्मक
र्त्रस्य पाकमनेनेति फलपाकासंभवात् वृक्षोकाथितं कर्मेतिस्पेव च यदा कर्तृत्वविवक्षा तदायं
कर्मवद्भाव इति वृक्षस्य पाकमितिवत्तत्र निष्पाकानुकूलव्यापारे विनेत्यर्थः एवं च पचेः फलानु।
कूलव्यापारानुकूलव्यापारोर्थः तत्र फलानुकूलव्यापाराश्रयत्वादुक्तः कर्मेन तदा कालादिः क
र्त्ता विक्लित्त्यनुकूलव्यापारार्थकत्वे विक्लित्त्याश्रयफलरूपकर्मद्वारा व्यापाराश्रयत्वेनाधिकर
णत्वेन त्वेनाविवक्षायां चाकथितं कर्मत्वमिति तदाशय इति तन्न तत्र भाष्यतोऽस्याकथितं चे।
तिसूत्रविषयत्वालाभात् व्यापारद्वयार्थत्वे कर्तुरीप्सिततममिति कर्मणो वृक्षस्य एकव्यापार
परित्यागेन कर्तृत्वाविवक्षापाभिभाष्यस्य सूपपादत्वात् इति तन्न त्रात्रसाधकत्वेनोपन्यासितुं तु।
क्तमित्याहुः वस्तुतः कैयटेकथितपदस्य प्रधानपरं स्वरूपकथनमात्रं न त्वेतत्सूत्रोदाहरण

प्रा. श्री. त्वबोधकमिति बोध्यं ननु माधवेन नाशे ग्रहेर्न्यस्या मोचेर्न्यासाञ्जेर्दीयेश्रु संग्रहः काशिकायां च प्राद्दे ।
न स्तुधाकरमुखैः कृतत्वेनेनान्योपि संगृहीतास्ते किमिति नोक्ता इति चेत् उत्तरसूत्रोपलक्षणभूत
गत्यर्थानां तथैव चेत्यंशस्य चेन तत्समुच्चयस्य स्तुधाकरादिभिर्व्याख्यानत्वात् तन्त्रा णौ कर्तुर्णौ
कर्मत्वाभ्युपगमेन तेषामकथितं चेति सूत्रानुदाहरणत्वात् गतिबुद्धीति सूत्रे एषामुपसंख्यानं का ति
र्यमिति तदाशयः वस्तुतो ग्राहे बोधनार्थस्य गतिबुद्धीत्येव सिद्धं अन्यस्य तु द्विकर्मकत्वं नेष्टमे
व अत एव तमाटीकृतविद्यानामर्थमर्थविदांवरः पश्चात्पार्थिवकन्यानां पाणिमग्राहयत्पितेति
कालिदासश्लोके पूर्वार्धे ग्रहेर्बुध्यर्थत्वेन या गतिबुद्धीति सूत्रेण णौ कर्तुर्णौ कर्मत्वात् तमिति योजना ।
यित्वोत्तरार्धे तेनेति विभक्तिविपरिणामेनान्वयमाहुः अजिग्रहत्तं जनकोधनुस्तद्येनादिर्द
हैत्यपुरपिनाकीति भट्टिश्लोके च तत्र मंगलाकृतान्निग्रहत्नस्ते नेन धनुषा भगवता त्रिपुरदाहः
कृत इति बोधितवानिति व्याख्यानम् किंच ग्राहेर्द्विकर्मकत्वे जाया प्रतिग्राहिता गंधमाल्यमिति सिध्ये
त् तत्र हि एवं तेकर्तुश्च कर्मणः इति प्रयोज्ये यत्तु रूपे कर्मणि क्तः स्यात् तथा च जायया गंधमाल्ये
प्रतिग्राहितायेति विग्रहे व्यधिकरणत्वादन्यपदार्थाभावाच्च बहुव्रीहिर्न स्यात् सिद्धांते तु प्रतिग्रा
हितं गंधमाल्यं यया इति विग्रहः तत्तो जायायाः पदे ननु नीयान्तत्पुरुषः ननु तेन रूपप्रयोज्यकर्मणः
कर्मत्वाविवक्षायां गंधमाल्यरूपकर्मण्येव क्तप्रत्यये इष्टसिद्धिरिति चेन्न णौ तु तत्पर्ये प्रयो
या ज्यकजायायाहेतुसंज्ञावधपकत्वेन हेतोश्च कर्तृप्रयोजकत्वरूपत्वेन प्रयोज्यायाधेनोः कर्तृत्वसं

पादनार्थं ज्ञायमानि हि प्रेरणाविषयीभूतव्यापाराश्रयत्वविवक्षायामाव प्रापकत्वेनेदं प्रकार्थस्यैव चैतत्कर्म।
संज्ञानिमित्तकोटौ प्रवेशोनेदं शेषविषयेकर्मत्वाविवक्षायामुपपादयितुमशक्यत्वात् न च निरुक्तश्रेषण
ग्रतिग्रहधाने णिचि गंधमाल्यकर्मणो वक्तोप्रयोजकस्य सिद्धिः ज्ञायापदेन पंचमीसमासः षष्ठीसमासो
वेति वाच्यं पक्षद्वयेऽपि तदर्थलाभेऽपि ज्ञापनानुपादानस्याप्रसक्तापत्तेः न च गवादिपदानां विग्रहे स्वार्थमात्रपरा
णां समासेऽन्यपदार्थपरत्वमिव विग्रहे प्रतिग्राहितृशब्दस्य धेनुपरत्वेऽपि तन्नोगंधमाल्यपरत्वं भविष्य
तीति वाच्यं अन्यपदार्थाय तत्र्भावे एकार्थीभावस्य स्वत्वप्रयुक्तत्वादिवलेनांगीकारेऽप्यत्रांतर्भावे मानत्वी
कारे मानाभावादित्यन्यत्र विस्तरः तारेदविगत्यर्थत्वान्सिद्धं दृष्टान्तो जेलस्य पोत्तरदेशसंयोगानुकूल
व्यापारार्थकत्वात् दीपयतेश्चाकर्मकत्वादेव सिद्धिः अंतर्भावितण्यर्थे दीपयतिशास्त्रार्थं शिष्यानि
त्यादौ तु बुध्यर्थत्वादेव सिद्धिः क्वचित्तदापीरिति नन्वदं ज्ञापयन्नतु नमिति स्मृतिप्रयोगात् न्यायाजितैः
फलमुक्त्वा नैरित्यादि महाकवि प्रयोगात् स्तुधाकारापकेनैष्वस्य चैवचेतिभाष्यचकारात् तदापि न्याज्जि
मोचीनोगमादिसत्रेउपसंख्यानमेववोध्यं गवापयस्याजयतिकैयटादिप्रयोगात् प्रोरवेणगा।
दिदापविषमतेतिकैयटप्रयोगाच्च उपसंख्यानेभाष्यस्यागमस्याभावाच्च नोपसंख्यानं न्याज्जितैरित्या
दिप्रयोगाश्चायुक्ता एवेति कैयटानुसारिणां पथ्याः कैयटप्रयोगे गवेति करणे तृतीयेति तु न युक्तं गोः
पयस्त्वन्नतिदेवदत्तो गवा पयस्याजयतिसंदर्भोऽसंगतेः यत्तु न्याज्जेरुहि सामान्यार्थत्वं दापयतीचि

समानार्थत्वमितितत्र अंतरस्थितत्ववक्तव्यात्तत्र्योर्भ्यां समानार्थत्वाभावात् अत एव नीहृग्रह।
णं चरितार्थं दंशोदाप्यश्रुतिनुक्तादसंबोध्यं अर्थनिबंधनेति आकारमस्विचोदितइतिपरस्मैपदा
नामितिसूत्रस्य भाष्यप्रयोगोरितिभाव वृद्धिहि एकि पर्यायः एवं च इहि याचिरुधि प्रच्छि सिविचि।
ञामिति भाष्ये याचिपर्यायमित्ति ग्रहणंस्य सूत्रार्थे याचिग्रहणं त्वमुपार्थकस्यापि ग्रहणायावधप
कमिति भावः देशः कालइति व्याख्यानात्र शेषभाष्योदाहरणेषु देशशब्देन कुरूपांचालादिरेव
गृह्यते अत एवाधिशीङ्स्थासामित्यादेशाधिकार्थं अत्र वार्त्तिके कर्मकशब्देनात्यंताविद्यमान
कर्मक एवेतिनाग्रहः संकोचेमानाभावात् एवं च पचादीनामविवक्षितकर्मत्वे मासं पचतीत्यप्रयो
गोमवत्येव गंतव्योध्वेति गंतव्यत्वेन प्रसिद्धे नियमप्रसिमाणः क्रोशादिरित्यर्थः गंतव्य इति किम्
अध्वानं स्वापितीति स्वापितेः स्वपमात्रार्थकत्वेमाभूत् कालशब्देन च लोके कालत्वेन प्रसिद्धमासा
देरेवग्रहणाम् तेन घटमास्ते इत्यादिनत्रत्यमात्रस्य कालत्वात् प्रवृत्तिः वस्तुतो नत्रत्यमात्रस्य कि
यायावाकालत्वं किंतु कालोपाधित्वमेवेति मंजूषायां निरूपितं कर्मसंज्ञकइति अत एव वा स्यते मा
स इति कर्मणित्वादयोपि एतेनैभ्यो द्वितीयेति परं तः परस्ता: इदं वार्त्तिकं शब्दशक्तिस्वभावाद
त्यंतसंयोगविषयेभवति कालाध्वनोरिति सूत्रस्य भाष्यस्वरसः पत्रु द्वितीयकालाध्वनोरिति
सूत्रे आस्यते मासइत्यादौ प्रकृतवार्त्तिके न मासस्य कर्मत्वया कर्मणि लोकालाध्वनोरितिश
प्रद्वितीयाव्याप्तत्वर्थम् प्रवृत्तस्य कालाध्वनोः कर्मवदितिवार्त्तिकस्य प्रत्याख्यानायभाष्ये उक्तं शब्दे

ला

नमेवेदं कर्मेति न स्यादयं भावः आस्यादयस्य आसनादिपूर्वके व्यापने वृत्तेन आसनादीनां च करणत्वे ।
नान्वयः व्याप्तिर्मासादिनिष्ठा फलम् मासमासनेन व्याप्नोतीत्यर्थः न चावकत्वे रीसत्तनम
मित्येककर्मसंज्ञासिद्धेरिति प्रश्नादौ कृतं प्रवृत्तं उत्सर्गसूत्रं तेन बोधितमयमर्थः इयं च कल्पना सक
र्मकधातुविषयापि अत एव तन्मारीत्या सकर्मकाकर्मकसाधारणकालाध्वनेति तन्न हि विषयो न त
हीदानीमिदं वाच्यमिति प्रश्नोयत्र क्रियया संतन संयोगस्तद्व्यमिस्तु तत्रैव संगच्छते एवं च अनया
रीत्या मासमोदनं पचति तंडुलानि निर्त्रिकर्मकोपि प्रयोगो भवत्येव न चात्र कर्म[illegible]कारे मा
सः पच्यते ओदनं तंडुलान् देवदत्तेनेत्यपि स्यादिति वाच्यं उभयविधकर्मसमभि[illegible]हारे तरंगे मुख्ये
च द्रव्यकर्मण एव लादिप्रवृत्तिस्वीकारान्न दोषः स्पष्टं चेदं कालाध्वनोरित्यत्र कैयटे रटमन्वादे ।
प्याद इति सूत्रस्य राज्ञिरप्यधीते इति प्रयोगे द्रव्यकर्मणोऽविवक्षितत्वं बोध्यं इष्टापत्तिरित्यपरे न चे
वमकर्मकयोगे तद्वांव्यापनादिवृत्तेः कयादेरपि कर्मत्वं स्यात् अपि शीङ् इति सूत्रं तु श्वाकार्यं च
रितार्थमिति वाच्यं विवक्षयानियतत्वात् तादृशविवक्षायास्तत्र करणत्वस्य ग्राहकाभावा
त्तु कालाभावाध्वदेशानामेतद्भूतक्रियांतरैः सर्वैरकर्मकैर्योगे कर्मत्वमुपजायत इति हरिणो
केत्वकर्मकपदमवधूत्यानुवादः अत एव न चके चिदपि कालभावाध्वभिरकर्मका इति गत्यादि
सूत्रस्थभाष्यं संगच्छते एवं च प्रकृतेवाप्तिं किं व्यर्थम् न च प्राकृतमेवेत्यस्याकर्मकधातु मिति
त्योपदेशिकमित्यवाच्योस्त्विति वाच्यं अंतर्भूतक्रियांतरैरिति विरोधात् किंचादित्यं पश्यतीति

इष्टं तेन कर्तृकरणेनीत्यादिरिष्टं तेन च भाष्ये समर्थो नान्यकर्तुरीप्सिततममिति सूत्रविषयतालाभादि
ति तत्र पाठान्तरं इष्टापत्तेः मुख्यार्थेन तु तादर्थ्यप्रयोगस्यानभिधानमेवान्यथा मुख्यार्थे मासस्य तेमास
मित्यादौ द्वितीयावारणाय तद्वार्त्तिकस्यापवादकत्वेन तत्सूत्रव्याख्यानस्यापास्तं गतेः इदं तत्तावता
प्रकृतवार्त्तिकप्रत्याख्याने मानाभावात् आसनमात्राद्यर्थे आसनादीनां तन्त्रो मासमास्ते इत्यादिप्रयो
गसाधनार्थं तस्यावश्यकत्वात् अत एव प्रबोध्यमेभाष्ये अकर्मकधातुभिर्योगे इति वार्त्तिकं न प्रत्याख्या
तं यथाचकर्मणस्तत्कारकालाध्वनोरिति द्वितीयापत्र प्राप्तिस्तत्रापवादत्वेनैव वक्तव्ये एतद्वार्त्तिको
दाहरणेषु द्वितीयार्थः संबंध एव अकथितं चेति सूत्रे उपसंख्यानत्वेन तथैव प्रयुक्तत्वात् एवं चाधिकर
णत्वविवक्षायां सप्तम्येव अत एव समासमांविज्ञायत इति सूत्रे समायां समायां विजायत इति विग्र
हकथनपरं भाष्यं संगच्छत इति दिक्. गतिबुद्धि शब्दकर्मकाणामिति शब्दः कर्मकारकं येषामि
त्यर्थः ननु शब्दक्रियकाणामिति तथा हि सति गतिबुद्धिप्रत्यवसान शब्दार्थाकर्मकाणामित्येवा
वक्तव्यत्वे तेन तद्भ्रायपतिकृतं दयत्योर्नेष्यणाविति णिच्यनुवृत्ते इत्यर्थः इदं सूत्रे नियमार्थमिति हेतुमा
न्निचेति सूत्रे भाष्यकृतः णिजर्थेनाप्यमानस्यापरिभवति तर्हि गत्यर्थादीनामेव णिजीतेन याचयत्यादि
योगे न स्यात्तु विध्यर्थमिदं णिजर्थकर्मत्वं चाधिता प्रकृतेरपि धातुत्वेन तदुपात्तव्यापाराश्रय
तया कर्तृत्वमनन्तरंगत्वादुपजीव्यत्वाच्च प्राप्तं हेतुमति णिज् विधाने तकर्तृ प्रयोजकस्य हेतुत्वेन चो
पजीव्यत्वं तस्याः न च प्राप्नोधे प्राप्नप्राधान्यस्यैव मुख्यतया अंतरंगोपजीव्यकर्तृसंज्ञापेक्ष

याऽपि प्रधानानुरोधेन बलवत्वात्कर्मसंज्ञैवोचिता एतेन परत्वात्कर्तृसंज्ञोचितेत्यपास्तं मितिवा
च्यं उद्देश्यत्वलक्षणार्थप्राधान्यस्य प्रयोज्यव्यापारेऽपि सत्वेनांतरंगत्वोपजीव्यत्वयोश्चाधिक्येन
विधेयत्वे तस्यैवोचितत्वात्तु कर्मप्रत्ययसमभिव्याहारे ग्रामं गमयते इत्यादौ फलव्यापारयोर्धात्वा+
र्थावच्छेदकत्वेन संयोगापेक्षया प्रयोजकव्यापारापेक्षया च विशेष्यत्वेन प्रयोज्यव्यापारे प्राद्ध
प्राधान्यस्यापि सत्वाच्च प्रधानाप्रधानन्यायस्य लौकिकदृष्टांतबललभ्यत्वाद्दृष्टांतस्यापि पुरु
षारंभोपनिवर्तकत्वमिति भाष्यरीत्या पुरुषारंभसिद्धस्यासिद्धं बहिरंगत्वस्य विषये प्रवृत्त्यसंभवाच्च
यत्तु कर्मसंज्ञा कर्तृसंज्ञापवाद इति तन्न फलाश्रयो हि कर्म न हि तस्य कर्तृसंज्ञा सर्वत्र प्राप्तेति प्र
धानधात्वर्थानाश्रयत्वादिति ग्रंथे विवेचयिष्याम इत्याहुः तन्न कर्तृग्रहणस्य स्वतंत्रोपलक्ष
णत्वेनोपजीव्यत्वं चिंत्यं किंच इह निर्दिष्टैकशेषलक्षणाविदुहसमानार्थत्वेन प्रयोज्यकर्तुः सं
बंधित्वेन विवक्षायामकथितं चेत्यस्य नियमपक्षे परत्वादनेन बाधो विधित्वे तु नोपपद्यते एतल्ल
लितार्थकथनमेव न चापूर्वविधाविति तस्मादन्यानधीनत्वलक्षणार्थप्राधान्यस्य प्रयोजकव्या
पारेऽपि सत्वेन फलव्यापारयोर्धात्वर्थत्वेऽपि एवं तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्र
यत्वरूपवक्ष्यमाणप्राधान्यस्य प्रयोजकव्यापार एव सत्वेन च प्रयोज्यव्यापारस्य तादृशप्रतीतत्वेन
च लोके प्रधानराजकार्यापेक्षया मंत्र्यादीनामंतरंगस्यापि स्वकार्यस्याकरणदर्शनादंतरंगाद
पि प्रधानकार्यस्य बलवत्वेन चरमश्चायं परस्मिन्निति सूत्रभाष्ये एतन्न्यायस्य फलकथनायाप्रवर्तितानंतरंग+

२२७

334

ग्रा॰ प्रा॰

न्यायस्यदार्ढ्यत्वेन च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थप्राधान्यस्य तत्रैव सत्त्वेन च तदनुरोधिकर्मत्व
मेव बलवदिति भाष्याशयः पाचयत्यादियोगे तु नियमात्कर्मत्वाप्राप्तेः पचधात्वर्थनिष्ठविशेष्य
तानिरूपितप्रकारतानाश्रयत्वरूपं प्राधान्यमादाय कर्तृत्वात्तृतीया सिध्यतीति बोध्यं धातूनि
णिच् प्रकृत्यर्थनिरूपितकर्तृत्वमेवात्र द्वितीयार्थः धात्वनिष्ठस्वर्गकर्मकगमनानुकूलव्यापा
रो यन्निष्ठः स श्रीहरिर्मे गतिरित्यादिक्रमेण बोधः ननु धात्वर्थणाकर्मत्वे कर्तुरीप्सिततमत्वाभावात्स्व
र्गस्य कर्मतानुपपत्तिः न च तथायुक्तमित्यनेन सिद्धः व्यापारद्वयोद्देश्यतया तस्यानीप्सितत्वाभावात्
किं च तत्रापि कर्तुरित्यनुवृत्त्या कर्तुः क्रियया तथायुक्तमित्यस्य सत्त्वादिति चेन्न प्रधानप्रयोजककर्तृ
व्यापारप्रयोज्यसंयोगरूपफलाश्रयत्वेनात्तृतीयः किं च णिजुत्पत्तेः पूर्वमेव स्वर्गादीनां कर्मत्वस्य प्रवृत्तेः
नहि तस्यामवस्थायाम् तस्य न कर्तृत्वम् न केवलमूहपरिभाषया पूर्वमप्यप्राप्तिः तत्रत्यकर्तृग्रहणस्य प्रकृ
तधात्वर्थव्यापाराश्रयत्वमात्रलक्षकत्वात् न तु तत्रैव स्वेकेप्सितस्य तत्रैव कथं लक्षणेति चेत् संज्ञान
तानुपादिते संकेतितस्य तत्र पदितसाधारणेन लक्षणात् वैदितत्प्रयोजको हेतुरिति सूत्रेप्येवमेव अ
त एव णावपि सिद्धिरित्युक्तं गमयति देवदत्तेनेति यत्तदन्तनिष्ठगमनानुकूलदेवदत्तनिष्ठव्यापारानु
कूलो विलक्षणमित्रनिष्ठो व्यापार इति बोधः अत्र देवदत्तस्य न कर्मत्वं नीवह्योर्नेति यद्गणनयोः शा
ब्दणामर्थः गतिस्त्वशापदलेविशेषणेन तथापि विष्णोस्तत्प्रयत एव प्रतिषेधाय यथाकथंचिज्ञत्याद्य
र्थानामपि ग्रहणमाहुः अत एवासीमीति चरितार्थम् अन्यथा णिच् प्रकृतिभूतस्य णपन्तस्यादि

री

कार्थत्वेन गत्यर्थत्वाभावादप्राप्तौ किं तेन वस्तुतस्तु अण्यन्तावस्थायां निरूढप्रेषणप्रकृतिक एवं
नाणि ण्यन्तविषयाद्य एवं तत्कर्तृविकर्मत्ववारणाय वाननु अत्र तत्र च यथा कथंचित् गत्याद्यर्थानां नेय
ग्रहणं अर्थग्रहणेन तु नीवह्योरिति प्रतिषेधोपि न्यायसिद्धार्थकथनमेव अत एव तत्र वेति विभाषेति
सूत्रे उभयत्र विभाषाग्रहणेनावसरे त्वत्कौरव्यतरस्यामिति उभयत्र विभाषेत्युक्त्वा विभाषेत्यप्राप्तेऽभ्यव
हरति सूत्रे उभयत्र विभाषाग्रहणं वृथा । मुदाहृत्याप्राप्ते हरति भारं देवदत्तः इत्युदाहरणमिति दिक् बुधनि
तेचेदं प्राप्तिमत्वा निषेध उक्त इत्यनेन मनोरमायां नियन्तृकर्तृकस्येति नियन्तृकर्तृकत्वापन्नप्रकृ
तिभूतस्येत्यर्थः अनिषेध इति शयोत्पन्नः कर्मेति वक्तव्यमित्यर्थः नियन्ता प्रतोदप्रेरकः न सारथिरेव
तेन वाहयति बलीवर्दान्वा तानि तिसिध्यति अदिखाद्योरिति प्रत्यवसानार्थत्वात्प्राप्तिः प्रत्य
वसानं भक्षणं नन्वेवं न पीयतां नाम चकोरजिह्वया कथंचिदेतन्मुखे चंद्र चंद्रिकाः इमां किमाचा
मवसेन चन्द्रदीधितिं चकोरस्य भवन्मुखस्य प्रीत्यत्र चन्द्रद्युतेः कर्मत्वानुपपत्तिः पूर्वोधानुरोधेना
मतेः पानार्थत्वान्नेति चेन्न पानस्यापि भक्षणविशेषत्वात् पृथक् ग्रहणे शेषस्य विशेषाग्रहण
कृ ज्ञापकत्वे प्रत्यन्तां श्रोतग्रहणे मानाभावाच्च न चैवं निगरणार्थत्वात्परस्मैपदापत्तिः आचामयति
रि लोडं तद्धेदात् किं नाचामयतीत्यर्थः आदयतीत्यर्थः आदयतीति अकर्त्रभिप्राये क्रियाफले
शेषादिति परस्मैपदं अन्यत्र णिचश्चेत्यात्मनेपदमेव तदेवादस्य निगरणचलनार्थेत्यस्याप्राप्तेः
प्रतिषेध इति निषिद्धत्वात् भक्षेरिति ननु भक्षेर्हिंसार्थत्वाद् एवं तत्त्वेनाण्यन्तावस्थायां संभव इति चेन्न स

श्रु

णाविन्यत्र हेतुमत्स्मिन्नेव शब्दात् नेह कोमलस्यैव संभवात् । एवं चाणाविन्यत्र प्रतियोगिको द्वावपि प्रात्या
सन्निन्यायेन तस्यैव णौ ग्रहणमित्यदोषः । इदमपि निषेधवचनं तत्र ज्ञापकं बोध्यं भक्षयति वलीवर्दानि व
ति परकीयसस्यभक्षणे हिंसितो भवतीति तत्स्वामिनोत्रांसाऽदृष्ट्या हिंसा गेभक्षणे च भक्षयतेर्वे हिं
तिर्वोध्यातेत्र स्थानां सस्यानां भक्ष्यमाणानां वा हिंसाऽदृष्ट्या तदवस्थायां तेषां चेतनत्वात् । ज
ल्पतीति अत्र यत्तदन्नमिति विशेषः । ताऽन शब्दैक शब्दोच्चारणे जल्पन्त्यादयो वर्त्तन्ते तेन जल्पति पुत्रं यत्त
दत्तरत्यादौ पुत्रस्य कर्मत्वं एतेनाकर्मत्वादेव सिद्धे इदं व्यर्थमित्यपास्तं स्पष्टं चेदं भाष्यकैयटयोः यदा
नु पुत्रो धर्मं जल्पति तत्तदेव दत्तो जल्पयतीति बोधयतीत्यर्थः यदा वोच्चारणे जल्पतिर्वर्त्तते यदा च श
ब्दोच्चारणमात्रे वर्त्तते तदा तु धात्वर्थेनाक्षेपस्य कर्मणोन्तर्भावादकर्मकत्वादेव सिद्धिरिति बोध्यं तद्धि
शेषाधीनामिति अत्र त एव भाष्ये ज्ञानानामुपलभ्यन्ते शब्दकरणादिना शब्दविषयोपलब्धावेव वृ
त्तिस्तदा शब्दक्रियाणामित्यर्थेऽसिध्योपसंख्यानं कर्त्तव्यमित्युक्तं संगच्छते अन्यथा ज्ञानार्थत्व
सिध्याऽसंगतिः स्पष्टेव स्मारयतीति आध्यानार्थकस्यैव स्मरतेर्ग्रहणादित्वमिति भावः । घटादेस्त्व
णौ रणाविन्यत्र स्मरत्येनं वनगुल्म इति भाष्यप्रयोगात्तद्योगे कर्मत्वं भवत्येवेति तात्पर्यं शब्दापय
तीति शब्दं करोतीत्यर्थे शब्दवैरेत्यादिका डंतादहेतुमति णिच् । अकर्मकत्वात्प्राप्तिरिति स्पष्टं चेदं
कैयटे अत्र च वदन्ति हेतुं स्यधीयां शब्दे चेति अभियुक्तैराचार्यैः शब्द शब्देन हेतुं धात्वर्थे निर्देशा
त्तदर्थक शब्द शब्दात्काडि णिच् यतेरिवास्यैव पुत्रादिरूपकर्मयोग इति शब्दक्रियाणामित्यर्थे

भावकतोप्यकर्मग्रहणेन ग्रहणत्वं एतच्च समानाधिकरणेत्वात्तल्लोपकं शब्दप्रारंभेऽकर्मकपदेनेदृशानामेव ग्रहणमितितेनमास
तरत्वादौ भावेल्लोभवतितदाहदेशकालादिभिन्नमिति समर्थ्यादस्येऽयं पाठो वोध्यः ५

द्वापयानिशाद्दाययामिजंटयतीनां प्रतिषेधोयं न त्वाश्रं त्यर्थकभाष्यसामंजस्येऽन्यादृशाशाद्वायनेरकर्मे
कत्वप्रयुक्तशाब्देर्निर्विधेमानाभावेनचिंत्योयं कैयटस्तु निषेधामिति स्वयं भावः अपिकर्त्तास एव विवेत्ये।
कं सत्वं कृत्वा न तेन गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामिति सकर्मकाणां चेत्यत्र यथा नो मये
ति नियमार्थं व्याख्येयं यद्धा नियमस्य सजातीयापेक्षत्वात्सकर्मकविषय एव नियमो व्याख्येयः ए
वं सिद्धेऽकर्मकग्रहणं सामर्थ्यादसंभाविद्यमानकर्मकाणामेव ग्रहणार्थं तेन च मासादिभिस्तेषा
मपि सकर्मकत्वादत्यन्ताविद्यमानकर्मकाः प्रसिद्धिः निषेधसमर्थकः कर्मग्रहणेन बहिरंगकालादि।
इत्य कर्मणामग्रहणात् पूर्वाह्णिकं कर्मणां संवेधो भवति पश्चाद्विपरिमाणनिर्द्धारणाय कालादिकर्मभिरिति स्पष्टं
भाष्यकैयटयोः तदाह देशकालादिभिन्नमिति नचांतर्भावितण्यर्थमादाय सर्वेषां देशकालादि।
भिन्नकर्मसंभवइति वाच्यं तत्सामर्थ्ये नैवधातुपाठप्रसिद्धेऽर्थेऽत्यन्ताविद्यमानकर्मत्वग्रहणात् इतिदि
क् हृक्रोः नन्वाभ्यवहर्षं स्यह्रतेः भक्षणार्थत्वात् विकाराद्यर्थकत्वेतेस्याकर्मत्वात् गतिबुद्धीत्यनेन
प्राप्तेविधिरयम् अधिशी आधारः तत्रानुवर्त्तनेनैकं दमिति आश्रयात्तद्वितीयार्थः तस्यकर्त्रघटितपरंपरया
क्रियायामन्वयः अभिनिविशश्च तदंतस्याधाप्पत्वेन पंचम्यालुक् अभिश्वविविशतिमध्यमपद।
लोपीसमासोवानेरल्पाल्कस्यापिपरनिपातकरणमीदृशसमुदायविवक्षार्थं अतएवसतेनिविशते
ये तीति भाष्यप्रयोगः संगच्छते तदाह त्येतत्संघातेनेति अभिनिवेशआग्रहः सन्मार्गविषयकाग्रहवा
नित्यर्थः वैयाकरणन्यायमाधारः एतदर्थे अभिनिविष्टानामिति समर्थसूत्रस्थभाष्यप्रयोगादस्यकचि

शा शे॰ दृष्टत्वान्निष्ठान्तादाह क्वचिन्नेति उपात्त लुग्विकरणालुग्विकरणस्येति परिभाषया व शीङ् इत्यस्येव ग्रहणम् न
व सश्राच्छादने इत्यस्येत्याह वसनेरिति शब्दान्तरार्थस्येति इदमप्यन्यतरस्यां ग्रहणानुवृत्त्या व्यवस्थि
तविभाषाश्रयणात्सिद्धमत एव क्वचिदशुद्धार्थयोगे पाठाभावाज्जनीमेकाहृरिदिनमुपोषित इत्यादौ
भवत्येवेत्याहुः कालाध्वनोरिति अनेनात्र द्वितीयेत्यनुवर्त्यभाष्ये तु ग्रामे उपवसति त्र्यहमाह ग्रामे वसन् त्रि
रात्रिमुपवसतीत्यर्थे स्वरूपत्वेदं प्रत्याख्यातं उपपदविभक्तिमाह उभसर्वतसोरिति उभसर्वयोस्तसा वि
ति विग्रहः उभशब्दस्य शब्दपरत्वाद्वृत्तिविषयेपि नायच् उभादि शब्दघटितसमुदायोद्देश्यकत्वं षष्ठ्यर्थः
एतेन नित्यमिति विभक्तायचः स्वार्थिकत्वेनांतरंगत्वाद्वृत्तिविषये पूर्वमेवोत्पन्नो न तन उभयशब्दात्तसे।
र्विहितत्वेपि नो नो भयशब्दाद्विधानमित्युभसर्वतसोरित्यत्र च कमित्यपास्तं यत्तु मनोरमायां सर्वशब्दः
उभशब्देनोभयशब्दोपलक्ष्यते अन्यथा तसोऽसंभवादित्याहुः वस्तुतस्तु वृत्तिविषयेयच् पूर्वत्वाव
पि उभशब्दाद्विहितो यस्तस्तदन्तं न स्यादेवेति यथाश्रुतं साधन्युक्तं न स्यायं भावः प्राचीनैर्हि उभोसा
भ्यासस्येति निर्देशेन वृत्तिघटकीभूतपदे परत एवायजिति व्याख्यातं एवं च तेषां लक्षणाश्रयणं।
व्यर्थमिति यथा वा स्याद्वृत्तिविषयेंतरंगत्वात्पूर्वं प्रवृत्तिस्तथोभशब्देनिरूपितं शब्दकौस्तुभे त्वेनत
सोरिति निर्देशः धिगिति धिक्शब्दयोगे द्वितीया कार्येत्यर्थः प्रकृतिवदनुकरणमित्यति
देशेनाव्ययत्वात्साज्झ्यालुक् यत्तु वार्त्तिके धिगित्यविभक्तिकमिति तन्न धिगुपर्यादिष्वित्यत्राप
दांततया तस्त्वाप्रसंगात् गौणत्वेनायं कस्य च दर्शनि सत्त्वेधकिदित्युदाहरणान् त्रिष्विति उप

र्ध्यधसः सामीप्य इति निर्दिष्टेष्वित्यर्थः आम्रेडितान्तेष्विति कृतद्विर्वचनेष्वित्यर्थः कमस्य विशेष
णं उभयतः कृष्णमिति संबंधोऽत्र द्वितीयार्थः उपपदविभक्तीनां षष्ठ्यपवादत्वात् कृष्णसंबंधिपा
र्श्वद्वयवर्त्तिनो गोपा इत्यर्थः आद्यादित्वात्तसिः तत्संबंधिपार्श्वद्वयाभ्यामागता इत्यर्थेन पंचम्या
स्तसिलित्याहुः धिक्कृष्णेति धिग्योगे निंदा कृष्णाभक्तसंबंधिनीत्यर्थः धिङ्मूर्खमित्यत्र तु
संबोधनस्याश्रावित्वात् क्रियान्वयान्न धिग्योगाभावेन प्रथमैव एवं च मूर्ख संबोध्य कं निषिद्धाचरणा
दिनिंद्यमित्यर्थः यत्तु कारकविभक्तेर्बलीयस्त्वात्प्रथमा संबोधनपदस्य कर्तृकारकत्वाद्वाचित्वादिति
धन तन्न संबोध्यस्य कर्तृकारकत्वाभावात् देव प्रसीदेत्यादौ वस्तुतो देवकर्तृत्वेऽपि न कर्तृकारकविभक्ति
त्वं लभ्यते न च याहि संबोधनप्रथमां नार्थस्याख्यातार्थेन त्वामित्यर्थेन वस्तुतो भेदेऽपि शाब्दतः क्रिया
श्रियत्वस्योपपादयितुमशक्यत्वात् तया कर्तृत्वं दुर्लभं वाक्यार्थक्रियाश्रियत्वमादाय कर्तृत्वे तु व
हूपप्लवप्रसंगः धिग्देवदत्तं विष्णुमित्रः प्रविशतीत्यादौ कर्तृकारकत्वस्योक्तिसंभवोऽभावाच्चेति
दिक् उपर्युपरि लोकमिति उपर्यादीनां समीपोर्ध्वदेशादिवृत्तित्वमर्थः उपर्युपरि वृद्धानामित्यापि वृ म
द्धानामिनामिष्टानामिति द्वितीयान्तमेव बोध्यम् यद्वा उपरि वृद्धीनामुत्तानवृद्धीनामुपरि चरंतीत्यर्थः
न एवं चाम्रेडितान्त्वाभावान्न द्वितीया यद्वा लक्षणे इति पदोक्तपरिभाषयोपर्यध्यधस इति सूत्रे विहित
द्वित्ववतामेव ग्रहणं नचौरसि द्वित्ववतां ग्रंतत एव सर्वेषामयमम्नानमुपर्युपरि वृद्धेन तरन्त्यादौ न द्वि

११०

साहचर्याद्वसाहचर्य तत्पुरुषं तस्यायाः समासोऽद्वितीये नार्थ इति गौरवानीय
तेनाग्रत्र वानगदेभद्रतिरष्टां तत्परभाष्ये साहचर्यानामेव प्रयोगे सहार्थत्व
त्वर्थस्य प्रतिपादनात्

सर्वतः इत्यर्थे अभितः तु उभयतः इत्यर्थे इति
पर्युपरिभ्यां तेन च भाष्ये इति पाठः

शा०प्र० 331 तीयाश्च तत्सु पर्युपरीत्यस्याभिसयोर्योगे न सामीप्यम् अन्यत्र्यपीत्यस्यार्थमाह अभितः इति पर्य
भिभ्यां चेति तसिल् उपत्याभिमुख्ये तस्य त्वेडमेवाभितः इति सूत्रे श्रुति पदोक्तत्वात्तेन तसिलं तमि
ति तत्र परितः शब्दः साहचर्येण तसिलं तस्यापि ग्रहात् अभितः परितः इत्यनयोः सर्वावच्छेदेन
त्यर्थः तदेकदेशाद्यपेक्षया सर्वस्मिन्नद्वितीयार्थस्यान्वयः कस्य संबंधि सर्वावच्छेदेनेत्यर्थः हायितः
कासीत्यत्र हा इत्यस्य माभिनिवेशः अहह शोचय इत्यर्थः ईश पितृवियोगात् पितरि इति नु कासीत्य
नेनैवान्वितमित्याह बुभुक्षितमिति एवं प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गो न कर्मप्रवच
नीय इति तेन न गतार्थता अंतरान्तरेण अंतरेणत्यस्यार्थं तत्साहचर्यादंतरेत्यस्यार्थं तमेव अंतरे
त्यत्र तीयां तत्साहचर्यादंतरेणेत्यत्र तीयां तमेव तेन किमनयोरंतरेण ज्ञातेनेति सिद्धम् अंत
रेणाविशेषेणेत्यर्थः एवं चांतरा शब्दः अंतरेण शब्दश्च आधेयप्रधानौ अधिकरण शक्तिश्च या
नोवाच्यमेव स्थले दृतिवार्थं तदर्थे विशेषणत्वान्वयार्थबाधक द्वितीयेत्यर्थः षष्ठ्यपवाद
त्वात् अंतरात्वामिति अंतराशब्दो मध्यार्थः अवधित्वरूपः संबंधो द्वितीयार्थः स च मध्यत्वेनान्वे
ति एतत्संबंधार्थः कत्वं एवं द्वितीयान्तवमम च मध्ये इत्यर्थः पदान्तेनराविशमानपदार्थसंबं
धमात्रं विवक्षाते तदा षष्ठ्येव यथा त्वम मचान्तराकमण्डलुरिति त्वन्मत्संबंधी कमण्डलुर्मध्ये इ
ति हितदर्थः स्पष्टं चेदं हल्लोतं तरा इति सूत्रे कैयटे अन्तरेणाधेयवाचकसहचर्यादिशब्दात् द्वितीया

किंवांतरंगत्वात्तत्र प्रथमैव न च प्रयुक्ता ग्रहणसामर्थ्याद्यथाकथंचिद्योगेऽपि द्वितीयाद्युदाहरेत्तिवाच्यं
लटआवेंनरांतरेण शब्दाभ्यामेव द्वितीयोत्पत्त्यात्रेः लुकापिसप्तमीयाः प्रथमायाश्चत्वादिनिरुत्पाद्धि
तीयाविधानस्य चारितार्थ्यात् प्रत्यक्षविनानाभिरितिवक्तनीयां नपाठेत्वाघवभावात्त्रितिदिक्
प्रयिकत्वेनिरीक्षवान्पाणिनिबंधं महासंज्ञाकरणंत्वन्वर्थत्वायकर्म प्रादेनक्रियानिरूपितः
संबंधउच्यते सप्रोच्यतेयुक्तक्रियतेविप्राविद्यवस्थाप्यतेनेनतिकरणीयदित्याहुःकर्मक्रियां
प्रोक्तवंत्तःकर्मप्रवचनीयायुक्ताः बाहुलकात्कान्वर्दनीयरसस्य भूतेनेनसंप्रतिक्रियांनयोनयंती
तिलक्ष्ये इत्यादौ एवं चकर्मप्रवचनीययुक्तविभक्तिंतस्यप्रायःक्रियाया मन्त्वयरूनिवेष्यंनदु
क्तंक्रियाया द्योतकोनायंसंबंधस्यनवाचकः नापिक्रियावदातेपीसंबंधस्यनुभेदकइतिज्ञ
गमन्वित्यादौवनुनानुभूयतेसुखमित्यादावपि नक्रियाविशेषद्योतनेश्च नोनेः क्रियागत
विशेषस्यत्वर्थकक्रियायाश्चनुपलक्षणेसमभिव्याहृतपदार्थसंबंधिनोनकस्यापिद्योतक इ
य तिबोध्यं नापिषष्ठीवत्संबंधबोधकः द्वितीयवनस्योक्तत्वात् नापिप्रादेशविलिखतीत्यत्रवि
मायलिखतीति विमानक्रियेवक्रियांतरमाक्षिप्यतेकारकविभक्तिप्रसंगात् किंतु जपमनुप्रावि।
स्यादेद्वितीययासंबंधत्वेननेन तेनवारूपेणोपस्थितसंबंधानांलक्ष्यलक्षणभावएवेतिविशे
षवस्थापनंक्रियते कश्चित्संबंधभेदकःप्रवचनसामर्थ्यात्तांद्योतयत्याक्रियागतविशेषद्यो
तकसोः सप्तम्यामितिप्रत्याख्यानिरर्थकोऽधिपयोः निपातसंज्ञायासमासप्रकारः प्रायो

स्वरात्तिस्तद्वेन निरूपितः योगत्वद्वृत्ति अनुमितिकर्तृपदसमभिव्याहार्यं तत्त्वमिति भावप्रधानमूल
त्वादेतत्संबंधयोगत्कोनुविल्यर्थः अपवाद इति एकशेषस्य द्वंद्वापवादकस्य त्वदादिति भावः इ
त्यादुः क्रियानिरूपितत्संबंधपदविवक्षेदत्वान्वेन तस्य संबंधस्य क्रियान्वयात्क्रियायोग इत्येनत
योः प्रातिपदिकार्थत्वेन त्रयमनूतिं चनीन्यादोषान्वेन प्रकृते ऽनोगनिर्गतादिति निषिद्धानोन न
यमनूविनिहितीयार्थः संबंधो हेतुत्वम् स च संबंधो लत्त्वपलक्षणभाव इत्यनुनाद्योऽन्येत्वन्त।
ए त्वं च ज्ञानजन्यज्ञानविषयत्वं मुख्यज्ञानेन द्वितीयार्थः प्रथमे यद्यपि द्वितीयाविषयतैव न तथा
न तथापि कालविशेषविशिष्टतया ज्ञातैवमुन एव कदाचिद्दृष्टो देवदत्त इति प्रत्ययः इदमुत्तर संगच्छते
एवं च ज्ञानजन्यज्ञानविषयत्वं फलितं एवं च जयामित्र हेतु ज्ञानजन्यज्ञानविषयोऽयं पर्वत
इति बोधः तत्फलितमाह हेतुभूतज्ञानयोनिके चिन्तुन यस्य हेतुभूतव्यापकस्य वावहितोत्तर।
कालवृत्तिसंबंधेनान्वयः ननु कर्मप्रवचनीयसंज्ञायामवकाशः हेतुत्वादिविवक्षायां हेतावि
ति सप्तम्यास्तस्य तृतीयावाच्यत्वबोधनात् अत एव केवलस्य न कारकत्वमिति निवर्त्तके षष्ठीप्रयोगः
संगच्छते हेतुतृतीयाया अवकाशाभावेन कुतमिति प्रच्छेते च हेतु हेतुत्वविवक्षायां पारत्वात्
तृतीयाशनो तीत्यत आह परापीति पुनः संज्ञेति लक्षणे क्यं भूते त्यवसितहेत्वनः संज्ञाकर
णवैधित पुनर्द्वितीया विधानसामर्थ्यादित्यर्थः एतेन संज्ञया विज्ञानीयत्वाद्विभक्तिबाधः
कर्त्तुमशक्यत्वेन परास्तं स्पष्टं चेदं भाष्ये जपनद्याः प्रमाणपादेव चेत् न द्वितीये लक्षीतीयायाहेतु

पर्थ त्वमोऽस्त्यवसीयते उक्तं च हरिणा हेतुहेतुमतोर्योगपरिच्छेदे तु नाकृते आरंभाद्बाध्यते प्राप्तस्तृतीया
हेतुलक्षणोऽपि हेतुत्वे हेतुमत्ताभ्यां विवक्षितयोर्योगः संबंधस्तस्य परिच्छेदे लक्षणभावरूपे।
विशेषव्यवस्थापने तु नाकृते इत्यर्थः नचैवं तृतीयार्थे हेतुत्वे नैव देगतार्थमिति वाच्यं तस्य पुरस्ता य
दपवादन्यायात् उपपदविभक्तित्वेन सजातीयत्वाच्च सहहेतोः इत्येतन्मात्रबाधकत्वात् अत्रोदाहरणे
लक्षणलक्षणभावप्रतीत्यनापत्तेः इति दिक् तृतीयार्थे तृतीयाशब्देन तन्निमित्तः प्रत्ययो लक्ष्यते।
स चानन्तरं सोऽपि न्यायात्सहयुक्त इति सूत्रेणोपात्तः सह शब्द एव एवं च तदर्थे साहित्ये योग इत्य
र्थः एतेन तु सूत्रेण सहेत्यादौ सहशब्देनैव साहित्योपस्थितेः सत्त्वेन तस्य तृतीयावाच्य[illegible]त्वा।
भावात् तृतीयार्थे इति सूत्रं न घटते इत्यर्थः साहित्यरूपः संबंधोऽनुनाद्योत्यत इति ग्रंथाशयः पुत्रा
इति परास्तम् तत्र तृतीयायाः प्रतियोगित्ववद्दर्शनात् षष्ठ्यपवादकत्वाद्धि तृतीयापि तत्रैव तदी
ना मिति हि तीयार्थः साहित्यरूपः संबंध इत्यनुद्योत्यते नेतदाह तथेति तत्र इति करोतीति भावः
अनुहरिमिति अपकर्षात्महीनत्वसंबंधो हि तीयार्थे इत्यनुनाद्योत्यते हरिप्रतियोगिका
पकर्षरूपसंबंधवत्त्व इति बोधः तदाह इति एतेनोपहरिमिति व्याख्यातं उपाधिके तु सी
ने इत्यपकृष्यते सप्तमीति यस्मादधिकमिति जेनेति भावः उपखार्यां द्रोण इत्युदाहरणे[illegible]ये खा
पलाधिकत्व द्रोणे इत्यर्थः तेनोभयमनर्थकमिति फलति लक्षणेत्थंभूतः कंचित्प्रकारं प्राप्तः
सन्नाख्यायतेनेन निरूप्यतेनेनेति इत्थंभूताख्याने प्रकारविशेषनिरूपके अत्र लक्षणेत्थंभू विषयवेति

धा॰ प्रो॰

नाख्यानसाहचर्येणभागेपिप्रर्शस्याद्यतच्चेतेनभागप्रतियोगीभागशब्देनोच्यते सर्वत्रभावप्रधानो
निर्देशः वीप्सायां द्विर्वचनविशिष्टवृक्षशब्दबोध्यत्वादाह विषयभूतेष्विति वृक्षं प्रतीतिलक्षणल
क्षणभावः संबंधो द्वितीयार्थः वृक्षप्रकाशेन विद्युद्द्योतनज्ञानाद्वृक्षस्यलक्षणत्वं एवंच वृक्ष
ज्ञानेनतज्ज्ञानविषयो विद्युद्द्योत इति बोधः भक्तो विष्णुमिति विषयत्वाख्यसंबंधो द्वितीयार्थः
तस्यच भक्तपदार्थैकदेशभक्तावन्वयः विष्णुविषयकभक्त्याश्रय इति बोधः लक्ष्मीर्हरिमिति प्रति
योगित्वाख्यसंबंधो द्वितीयार्थः स्वत्ववांनशो भागः हरिप्रतियोगिकस्वत्ववती लक्ष्मीरिति बोधः वृक्षं
वृक्षमिति अत्र वीप्सा द्विर्वचनद्योत्या वीप्सापदेन बोधयितुमिच्छा विषयं व्याप्यत्वं वृद्धिस्थयावत्त्व
वृक्षार्थनिष्ठम्च्यते व्याप्यत्वविशिष्टवृक्षादीनांच स्वत्वेनाग्निनिरूपकत्वेन सेचनाद्यन्वयः
स्तत्रप्रत्याद्युपस्थाप्यत्वं प्राहकाः कर्मप्रवचनीयतया संबंधावच्छेदकत्वस्य युक्तत्वात् एतदपि वृक्षं वृक्षं
सिंचतीत्यादौ प्रतिविनापि मानांतर गृहीततत्तात्पर्यवशात्तेनैवसंबंधेनान्वयस्य व्याप्तिस्तत्त्वेऽपि तन्निर्णा
यकत्वेनावश्यंनैव संबंधपरिच्छेदकत्वं तत्र वृक्षादीनां सेचनेकर्मत्वेपि तत्त्वेनाऽविवक्षायामनेन द्वितीयाऽत्र
न एव प्रत्यर्थे शाब्दनिवेशात्त्यादौ अर्थस्य विवेशनक्रियानिरूपिताधिकरणत्वेपि प्ररोमर्थे प्रतीत्येव
विग्रहो भाष्यादौ दर्शितः" एतेनोपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायात्कर्मण्येवात्र द्वितीये
त्यपास्तं वृक्षविषये तु प्रतिरेव वीप्सायामपि द्योतकः एतेनात्र कर्मण्येव द्वितीया पर्यादयस्तु क्रिया
विशेषकाएवात्रेतिहरदत्ताद्युक्तमपास्तं क्रियाविशेषकत्वेऽन्वर्थतया कर्मप्रवचनीयसंज्ञाया

हरिलक्ष्म्योः स्वस्वामिभावः संबंध इति

उपपदविभक्तेः कारकविभक्तिर्बलीयसीति वचनात्

एवानापत्तेः अत्रायं विभक्तीति स्पष्टेहरदत्तेन संबंधपरिच्छेदकत्वस्यैवोक्तत्वात् अनएव भाष्ये किमर्थं पु
नरिदमुच्यते न चोपसर्गादिसंज्ञाबाधार्थं क्रियायोगाभावादित्युक्ता द्वितीयार्थमिति सिद्धान्तिनं वक्तं व
क्तं शनि सिंचतीत्याद्युदाहरणे क्वचित् क्रियान्वयेकर्मत्वादेव सिद्धेति प्रश्नः अधिकरणादौ तत्वेनाविव
क्षायां द्वितीयार्थं अकर्मकेऽर्थे चावश्यकमित्युत्तरमिति मम प्रतिभाति यदानुशृणोति क्रियाविशेषकएवची।
स्याच्च द्विवचनयोस्तेवनदात्कर्मत्वाविवक्षायां चप्रयोगेवनद्वितीयाकर्मप्रवचनीययुक्तत्वाभावादित्याहुः पं
चम्या पाठ परिभिरिति न्नून वर्जनार्थायस्याहरेरयान्नुहरदत्तसीन्याह अत्रोपसर्गत्वाभावादिति यदत्रम
तेति यक्षहोत्रावृद्धिस्थलेन भागवाधकः मृत्संबंधिपदाग्राकर्त्रेका संभाव्यमानाएनद्विकरणिका
सत्तानत्वकर्मके परणाविषयोपादानमित्यर्थः अत्र कर्मप्रवचनीयत्वाभावादुपसर्गत्वेन षत्वम् कु
तोधीति कुतस्त्यपादाने पंचमी कर्मप्रवचनीययुक्ते द्वितीयेति तु न कर्मप्रवचनीययोगात्संबंधप्रतियो।
गित्वादिरूपवक्ष्यमाणकर्मप्रवचनीययुक्तत्वाभावादित्याहुः गतिसंज्ञाबाधादिति ननु यो रनर्थकत्वे
न प्रजयत्यादिवत् क्रियाविशेषकत्वाभावात् क्रियायोगाभावेन कथं गतिसंज्ञाप्राप्तिरिति चेत्तत्र विशेषद्यो
तकत्वाभावेपि धात्वर्थमात्रद्योतकत्वेन क्रियायोगसत्त्वात् विशेषद्योतकत्वाभावेनपरमनर्थकत्वव्यव त्व
हारः न च धातुनैव तदर्थस्योक्तत्वेन द्योतकोपादानवैयर्थ्यम् द्योतकासत्त्वेपि न वदुपपत्तेरिति दिक्
सुसिक्तमिति सक्रियागतपूज्यत्वद्योतकः सुः पूज्यसेचनकर्मेत्यर्थः सुषितं किमिति क्रियापूज्यत्व
कीर्तनतत्क्रियाकर्तुः पूज्यत्वे गम्यपदैवास्संज्ञानचात्रत्वेति भावः कथं तर्हि स्तुतिरिति शाबास्य

340

प्रा. शे.

मात्रं विवक्षितं न पूज्ञा प्रशंसानुमते पूज्ञा इत्यत्र कुत्सुरवपुस्तविनिकोशादित्यादुः अतिक्रमणमुचितादधिका
नुष्ठानम् चातिपूज्ञायामित्यनुकृष्यते अतिदेवानिति अधिकानुष्ठानत्वसंबंधः देवकर्तृकपूज्ञाविषय
त्वं वा संबध्यत इति नाद्यो न्यतेन चात्र पूज्ञार्थत्वे तेः कुगतिप्रादय इति समासेन नित्यसमासापत्तिः स्वती।
पूज्ञायामिति नत्र वार्त्तिकपाठादिति वाच्यं अनभिधानेन समासाभावादित्यादिवक्ष्यते समासे अपि
पदार्थः पदस्याप्रयुज्यमानस्य पदान्तरस्य अर्थः प्राकरः स पदार्थः न तु पदस्यार्थ इत्यर्थः अभि
चारात् नद्योतकतायामुदाहरति सर्पिषोपीति अत्र हि बिंदु इत्यादेः पदस्याप्रयुज्यमानस्य यः प्रा।
कोर्थः सोपि नाद्यो न तेन समभिव्याहृतस्यान्यदलत्वापत्तिविपर्यीक्रियत इति बोध्यं संभावनायां लिङिति
संभावनेलमिति चेत्सिद्धाप्रयोग इत्यनेन न त्र हि संभावने इति योगो विभज्यते उत्तरसूत्रे तु सिद्धाप्रयो
ग एवेति नियमार्थं यथान्यासे तु प्रोद्देशभावादत्र न स्यादिति बोध्यं धातिनेचेदं तदस्यतदस्मिन्नस्यादि
ति सूत्रे आकरे प्रार्थनायां लिङित्यनन्तत्र एवं हि सर्पिषोपि स्यादित्यत्रः सर्पिदौर्लभ्यप्रतीत्यनापत्तेः
प्रार्थ्यमानस्यासिद्धतया बाहुल्यस्यैव प्रतीत्यापत्तेश्चैवंत्व माणरीत्या दौर्लभ्यविशिष्टसत्तायां प्रार्थ्यमान
त्वान्वया कर्मप्रवचनीयपृक्तं नादः प्रयुज्यते विंदु इति निभाष्याविरोधात् कर्मप्रवचनीयोगः अनद्यात्वं संबंधे
नान्वय एव नान्यो निरूपयितुमशाकत्वात् संबंधोप्यन्यो निरूपयितुमशाक एवेत्यापूर्त्तं वेति पाठः
"अपि प्राप्तार्थमाहतस्याप्येवेति संभावनाया एवेत्यर्थः विषयभूत इति धात्वर्थ इत्यर्थः कर्त्रिति क
र्तृदौर्लभ्यमिति षष्ठीतत्पुरुषः क्रियाया दौर्लभ्यं च कारकदौर्लभ्यप्रयुक्तमेव न त्र प्रकृते धातोस्सक
र्मकत्वात् कारकान्तरस्य चानुपादानात् कर्त्तृशक्तिस्वभावाच्च कर्तृदौर्लभ्यप्रयुक्तत्वमेवास्त एव

क्रियासंयोग
नाध्यवसायो

प्र=२

सर्पिषोप्याद्याभेनेत्यादौ कर्मदौर्लभ्यप्रयुक्तदौर्लभ्यमानेपि न क्षतिः कर्तृपदस्य प्रकृतत्वाभिप्रायकत्वा
त् कर्तृपदेन च सामर्थ्यात्कर्तृविशेषो बिंदुरूपो गृह्यते नत्वकर्त्तापि बिंदुपदार्थः दौर्लभ्यप्रयुक्तदौर्ल
भ्यं तु क्रियायां नस्यैव संबंधः यद्यपि कर्तृबाधुयत्वासंबंधेनान्वयः सर्वत्र व्युत्पन्नस्तथापि प्रकृत
ईदृशसंबंधेनाप्यन्वयस्तत्रापि देवतान्तर्यं ग्राह्यकः नचैवं मपि शाब्दः सर्पिष एव स्यादयव बिंदुदौ
र्लभ्यप्रयुक्तदौर्लभ्यसंबंधेन क्रियान्वये तात्पर्यं ग्राहकोस्तु किं बिंदोस्यादित्यत्र लक्षणयेति वाच्यं । दृ= ५
परपदार्थयोन्वयकतायाश्च प्राणपि शाब्दस्य शाक्तिस्वभावसिद्धत्वात्तु भाष्यसंमतत्वाच्च सर्पिषो द्वितीयापत्ते
श्च संबंधत्व इति स्यादित्यद वाच्या क्रियया सहापि शाब्दयोग्यत्वं बिंदोस्तद्योग्य संबंधेनान्वयादितिभावः एक
पदार्थयोरपि परस्परान्वयांगीकारात् तदेवाह अपिशब्दबलेन गम्यमानस्येति स्यादित्यदलत्यसे
वृत्ति त्यर्थः इयमेवेति बिंदुलक्षकतेवत्यर्थः अत एव बिंदु रुनोक्ते मात्राविंदुस्तोकमित्यस्यार्थेपि शब्दोवर्त
ते इति यद्वा दौर्लभ्यमेवापिशब्देन द्योत्यते सर्पिषो दौर्लभ्यं ह्येवं सति भवति यदि तस्य बिंदुरपिस्यात्
अतो बिंदुरपि आक्षिप्यते शाब्दत्वं त्वनुपस्थापकस्यापि शब्दव्यापारप्रयोज्यस्य शाब्दबोधविषयत्वां
गीकारात् तदेवुक्तमपि शब्दबलेन गम्यमानस्येति इयमेवेति च एवं च सर्पिषोपिस्यादित्यस्य सर्पि
व षः बिंदुदौर्लभ्यप्रयुक्तदौर्लभ्यवतीनदभिन्नैककर्तृका संभावनाविषया सत्तेति वाक्यार्थः नत्वे
वं कर्मप्रवचनीययोर्न ... र्थे सर्पिषोऽन्वयेन तस्य कर्मप्रवचनीययुक्तत्वाद्द्वितीया स्यादित्यत आह द्वितीया
तु नेहेति नत्वपि नेति बिंदुनायोगेपि अपि द्योत्यसंबंधेनानन्वय इत्यर्थः अयं भावः कर्मप्रवचनीययु

शा॰ शे॰ क्तेः द्वितीयेति तन्नकर्मप्रवचनीयद्योत्यसंबंधप्रतियोगित्वादिरूपवत्त्वमात्रेण कर्मप्रवचनीययुक्तत्वा
भावादित्याहुः गतिसंज्ञाबाधादिति नन्वयोरनर्थकत्वेन प्रत्ययत्यादिवत् क्रियाविशेषकत्वाभावात्क्रि
यायोगाभावेन कथं गतिप्राप्तिरिति चेन्न विशेषद्योतकत्वाभावेपि धात्वर्थमात्रद्योतकत्वेन क्रियायो
गसत्त्वात् विशेषद्योतकत्वाभावेन परमनर्थकत्वव्यवहारः नच धातुनैव तदर्थस्योक्तत्वेन द्योतको
पादानवैयर्थ्यम् द्योतकास्तुणपि वृत्तिवद्रूपत्रेरिति दिक्। क्तेरित्यस्य हि कर्मप्रवचनीयद्योत्यसंबंधप्रयो।
गिनि द्वितीयेत्यर्थः महासंज्ञाबलेन तथैव लाभात् प्रकृते च दोर्लभ्यरूपसंबंधस्यापि द्योत्यस्य विंदुः
प्रतियोगी न सर्पिरिति तथा च भाष्यं यद्वा यदत्र कर्मप्रवचनीययुक्तं नादः प्रयुज्यते विंदुरिति यस्य ननु वि
कर्मप्रवचनीयद्योत्यसंबंधप्रतियोगित्वमित्यर्थः ध्वनितं चैतत्कैयटे ननु यदास्य सृप्तानि पञ्चम्येऽपि
नाद्योतितस्यापि विंदोः प्रयोगस्तदा द्वितीया प्राप्नोति पाठांतरं भागादिशब्दोक्तौ तस्य प्रकृतिवाच्य
त्वेपि द्योतकदावादि प्रयोगवत् तस्य तद्द्योतकत्ववत्त्वविंदुशब्दप्रयोगेप्ययेः प्रयोगस्य तद्द्योतकता।
या असंभवादिति चेन्न अंतरंगत्वात्प्रथमोत्पन्नेरिति केचित् तन्न एवं हि सर्वत्रोपपदविभक्तिविषयेंतरंग
त्वात्प्रथमापत्तौ तत्र कारकवैयर्थ्यापत्तेः तस्मादुपपदविभक्तेरिति न्यायात्प्रथमेति बोध्यं कारकविभ
क्तित्वं च क्रियाजनकार्थकत्वमेव कर्त्रादिषट्कान्यतमार्थत्वं वा अनभिहितकर्त्रत्ववदर्थकत्वमस्या
अत्यस्तैव अभिहिते प्रथमेति सूत्रस्य नास्या अपि तदर्थकत्वात् द्वितीयात्तु कर्मप्रवचनीयद्योत्यसं
बंधार्थिकैवस्यादिति न कारकविभक्तिः उपपदविभक्तेरित्यादिवाचनकमेवेति बोध्यं इत्यंतं इति चेन्न।

न्तरंगत्वात्प्रथमोऽस्त्विति चेन्न न च तत्र बिंदोः प्रादेशोपात्तत्वेन लक्षणया माहेयेवा मानाभावादपि शब्दस्य
पदार्थद्योतकत्वाभावेनाकर्मप्रवचनीयत्वा[illegible]न्न द्वितीया न भविष्यति एवं च स्यादिति वाच्यं पदार्थ
ग्रहणस्योपलक्षणत्वात् यत्पदप्रयोगं विना तदर्थोऽपि शब्देनावगम्यते तादृशार्थः कर्मप्र
वचनीयत्वमित्यर्थान्न दोषः ध्वनितं चेदं भाष्यकैयटयोः द्वद्वत्तस्य पदांतरप्रयोगे सत्यपि प्रयुज्यमा
नं तदर्थकं किंचिद्विशेषमाधत्ते यथा नीलशब्द उत्पलेन तु नास्मिन्नेवान्यूनानतिरिक्तैवर्त्तेन तथा सति पर्या
यत्वप्रसंगेनाप्रयोगार्हत्वं स्यात् अतः पदांतरस्याप्रयोग एव तदर्थे प्रवृत्तिरेवं च प्रत्यंभवत्येवेति स्याह
न चैवं कर्मप्रवचनीयसंज्ञानिष्फलेत्यत आह अनुपसर्गत्वान्न षत्वमिति इदमुपलक्षणम् उदकस्या
प्याचामेदित्यादौ गतिर्गतावितिनिघातनाभावोऽपि प्रयोजनं क्रियागतस्य विदुकर्तृकत्वरूपविशेष
स्य द्योतनादुपसर्गत्वप्राप्तिरिति वाच्यं अपि स्तुयादिति संभावनेलमिति लिङ् अपेः विषयं शक्यत्वा क्रिया
दिना संभावनं द्योत्यं तदाह संभावनमिति अस्ति हि प्रकृतेऽवाङ्मनसगोचरं विष्णुमपि स्तुया
दिति शक्त्युत्कर्षाविष्करणं अत्युक्तिरसंभाव्यार्थसंभावनं संभावनेपदस्य प्रकृत्यार्थकत्वे च व्याख्या
नमेव प्रमाणम् एवं च विष्णुकर्मिके तत्कर्तृका शक्यत्वेन संभाव्यमाना स्तुतिरिति बोधः विष्णुवि
षयायाः शक्यत्वसंभावनेनान्यविषयानिः शक्येन शक्याकर्तृमिति फलति एतेनापि वेदांतपार
गमित्यादावपि योगस्यार्थेन तात्पर्यमिति धर्मे शास्त्रग्रंथाव्याख्याताः ईदृशेषु संभावनाविषयत
योचितत्वं द्योत्यं संभावितोचितत्वस्य चानुष्ठानमयुक्तमिति स्यार्थे तात्पर्याभावो बोध्यः कामचार

१५४२

तोर्

प्रा॰ शे॰ इकयाप्रवृत्तिः स्यादिति भावाय ये हंकुर्विन्तियावत् पैषानि सर्गेति लिङः अपि स्तुयाद्वृषलमि।
ति संभावनायां लिङ् क्रियागतं गर्हत्वमपि द्योत्यं वृषलपदसमभिव्याहारात् स्तुतेर्गर्हात्वेनन
कर्तुरपि गर्हत्वं फलतीति तद्वधिरेषु वदन्नमित्यादिना तु ध्वनेरनिवार्यं अपिसिंच अपिस्तुहीति अपिद्व
येनमिलितेन समुच्चयद्योतनान् नैकसंज्ञादावुभयत्रापि सत्वाभावः अन्येतु उदाहरणद्वयं समुच्चेय
पदार्थप्रकाशनायोदाहरणद्वयोपन्यास इत्याहुः कालाध्वनोरत्यन्तसंयोगे निरंतरसंबंधो व्याप्तिरि
तियावत् सच गुणक्रियाद्रव्यैरितिवृत्तिकृत् गुणशब्देनात्र क्रियाद्रव्यातिरिक्तं पदार्थमात्रं तेन मासं
भोजनाभावइत्यादेः संग्रहः गुणक्रियाद्रव्यैः कालाध्वनोरत्यन्तसंयोगेऽप्रन्यासन्या कालाध्वव
त्तिभ्यामेव द्वितीये हि सूत्रार्थः कालाध्वनोरितिनस्वरूपग्रहणम् व्याख्यानात् तद्वाच्याभ्यामत्यंत
संयोगस्य कस्मिन्नपि पदार्थेऽसंभवात् अत्यंतविरामम् अतिक्रान्तो त्यंतः संयोगो निरंतरसंनिकर्ष इत्यर्थः
मासमधीत इतियावदवयवसंबंधरूपाभिव्याप्तिर्द्वितीयार्थः एकादशवर्षात् भुंजीतेत्यादौ अधिकरण
त्वविवक्षणात् द्वितीया कालाध्वनोर्विरत्यस्य चांतरांतरेणेत्यादि साहचर्यात् संबंधत्वप्रकारकबो
धविवक्षायामेव प्रवृत्तेः अधिकरणस्य भुजिक्रियामन्वयेन तेनात्यंतसंयोगाभावेनाप्राप्तेरभो।
जनाभावेनत्वत्यंतसंयोगेन तु भोजनेनेतिस्पष्टमेव नन्वेवं तर्हि षष्ठ्येवास्त्वादि पूर्वकं तत्तद्वाच्येर्थे
लक्षणयाकर्त्रीप्सिततममित्यनेन कर्मत्वाद्द्वितीयासिद्धौ वैयर्थ्यमाशंक्य यत्राक्रिययात्यंतसंयोग
स्तदर्थमितिभाष्ये उक्तत्वेन कथं क्रियायोगस्य प्रवृत्तिरितिचेन्न संबंधसामान्यविवक्षायां षष्ठीबाधना

र्थत्वात्क्रियायोगार्थमप्यस्यावश्यकत्वेन क्रियाकारकभावेनान्वयं विनायन्नात्यंतसंयोगस्त
दर्थमिति तद्भाष्यव्याख्यायामुचितत्वात् न च रात्रिरप्यधीते इत्यादौ कर्मत्वप्रत्ययेप्यनेन द्वितीया
दुर्वारा परत्वादंतरंगत्वाच्च प्रथमा प्रवृत्तेः पाठांतरे न चैवं व्याप्याद् पूर्वेकेधातोर्लक्षणयाक
र्मत्वे भावलोनस्यात् इत्येतेन चैवं भावलोनस्यात् अकर्मकत्वं तन्निषेधसमर्थकर्मपदेन
बहिरंगमासादीनामग्रहणेनाकर्मकतायाअपि सत्त्वात् बहिरंगत्वं चैषां बहिर्भूतधात्व
र्थनिमित्तत्वात् वार्त्तिकारंभेऽपि प्रागुक्तविशेषनिमित्तकत्वेन बहिरंगत्वं वाच्यं स्पष्टं चेदमत्रै
व भाष्ये कर्मणः शेषत्वेन विवक्षायां अकर्मकत्वात् भावत्वेनेन द्वितीयायां सिद्धस्य
नन्वेवं परत्वाद्भाव एव स्यात् न कर्मणीति चेन्न कार्यकालपक्षेऽपि तत्कर्मसंज्ञायां लः कर्म
णीति द्वयोरुपस्थितिसामर्थ्यात् कर्मण्येव प्रवृत्तेः मासं पचतीत्यादौ अत्यंतसंयोगविवक्षा
यां मुख्यार्थे मासः पच्यत इति कर्मणि लोन मासस्याकर्मत्वाभावात् इत्याहुः मासस्येति
कृत्वोऽर्थे इति षष्ठीतस्य कृत्व्यादिरीत्या समासनिवृत्तिमात्रफलकत्वेप्यन्यत्र षष्ठ्याबाध
काभावात् वस्तुतोंऽतरंगत्वाच्छेषषष्ठीत इत्याद्यं विशेषविहितत्वेन्य चाशिताद्यर्थसत्त्वे
व ष्यान्नकर्मिति हलंतनिष्ठिसकेश्पेचिते इति द्वितीयास्यतंत्रः कारकाधिकारात् क्रि
यान्वयीत्यंतंत्रः कत्रैति वाक्यार्थः तत्रकारकत्वं तत्र इत्यादिस्त्वाद्यानुपस्थित क्रियामेव
त्वाशयेनाह क्रियायां त्वात इत्यादि क्रियानिरूपितत्वात अंचैत्यवाचैधात्वर्थनिष्ठ

गतिबुद्धीति सूत्रस्याकर्मकग्रहणसामर्थ्यात्पाठे।

जनकत्वे ति

क

त्व

का=२ क=१ यार

343

वा॰ शे॰ विशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थाश्रयत्वं स्ववाचकधात्वर्थे त्वत्र धात्वर्थस्त्वता
न्वये ग्राहकानपेक्षधातुशक्य एव ग्राह्यः तेन णिचो द्योतकत्वेपि देवदत्तेन यज्ञदत्तः पा
चयतीत्यादौ पचधात्वर्थे प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः यद्वा कर्तृप्रत्यय।
समभिव्याहारे तात्पर्यग्राहकानपेक्षधात्वर्थमुख्यविशेष्याश्रयत्वरूपं स्वातंत्र्यं बोध्यं
तेन पच्यते तण्डुलो देवदत्तेनेत्यत्र फलस्य विशेष्यत्वेपि देवदत्तस्य कर्तृत्वसिद्धिः एतद्धि
हि तन्तनीयापाश्चात्र यमात्रमर्थः धात्वर्थस्य धातुनैव लाभादिति दिक् ॥ प्रकृष्टेति
यद्व्यापारादनन्तरं क्रियानिष्पत्तिस्तत्प्रकृष्टं अनेन तरप्प्रयोगे दूरान्तिकार्थैरिति सूत्रेण
पंचमी अत्रेदं बोध्यं कारकत्वं कर्तृत्वादिकं च विशेषणविशेष्यभाववद्व्यवस्थितमेव।
ननु गोत्वादिवद्वस्तुविशेषनियतं स्यात् एवं पचेः प्रत्ययस्य शेषे षष्ठ्यन्तकरणत्वं डतकामितिमा। =प्रथमतत्रुटि २२॥
या हासंज्ञा च साधकत्वेन हेतुसाधकग्रहणमेव साधकतमार्थं भविष्यतीति प्रश्नः शाब्दवैय
र्थ्यापादनपूर्वकसामर्थ्यागम्यः प्रकर्षो नाश्रीयत इति ज्ञापनार्थमित्युत्तरं संभवति हि अ
धिकरणमित्यधिकरणल्युडन्तमहासंज्ञयैवाश्रयस्य लाभस्याधारग्रहणं मुख्याधारला
भार्थमिति स्पष्टं चेदमत्र सूत्रे भाष्ये तु न्यायह्नुः गौणमुख्यन्यायोपन्याससत्वसंगत एव वि
शिष्टरूपोपादानमेव तत्स्वरूपं तेः ॥ दामभेणेति रामनिष्ठव्यापारजन्यो यो वाणाश्रयफकवा
पारात्यवहितोत्तरक्रियाकाण्डवियोगस्तदाश्रयो वालीति बोधः यद्यपि कारककाणां क्रिया

यां गुणत्वं दृष्टं तथापि स्फुटं तद्विशेष्यत्वमेव सत्त्वप्रधानानि नामानि युक्तेः फलव्यापारयोश्च कर्म
प्रत्ययसमभिव्याहारे व्यत्यासो बोध्यः + तदर्थः घटत्वादिपदानां च तदवच्छिन्ने शक्तियोगिता।
लाक्षणिककर्तृत्वज्ञानं इत्यस्य चाध्याहार एवं चेद्वेति + अनभिहितेत्विमु हृदि: कर्तरि तृतीया
तेनेति जीवनः करणे ल्युट् प्रकृत्यादिभ्य उपसंख्यानादिति शाहः प्रकारेः तेन नाम्ना सूत्री लक्ष्मीरितेन।
दोतः घटत्वेनाभावः पटत्वेन विषयतेत्यादि सिद्धं इदं च षष्ठ्या अपवादः तेनैव द्वितीयार्थे तृतीयायाः
संबंधोऽर्थः प्रकृत्या चारु इति स्वभाव संबंधि चारुत्ववानित्यर्थः यद्यपि स्वभावेनायं चारु
तः चारुर्नीलं कारादिनेति करणत्वेनैव सिद्धं तथापि तदविवक्षायामिदं प्रायेणेति प्राय
शब्दो बहुार्थः बहुलोपायाः शिकार इत्यर्थः यद्वा प्रायेण चार वाहुल्येनायं याज्ञिक इति ज्ञात इ
त्यर्थः यद्वा प्रायेण वाहुल्येन यज्ञमधीते इति तद्धितार्थाध्ययने करणमा वाहुल्यस्य पर्य
यात्रकरणत्वेन सिद्धं तथापि तदविवक्षार्थमेतत् केचित् प्रायेण प्राहुर्निपातानामनेक
र्थवत्त्वात् इत्याहुः गोत्रेणेति गोत्रसंबंधि गार्ग्यत्ववानित्यर्थः सामान्यविशेषभावः संबंधः
गोत्रेणाहं गार्ग्य इति लापेरन्यथा वा समर्थ इत्यर्थः अत्र द्वितीया प्राप्ता करणत्वस्यापि संभ
वेन तदविवक्षायां षष्ठी वा प्राप्ता द्विद्रोणेनेति पाठादित्वात् स्त्रीत्वाभावः द्रोणद्वयपरिच्छे
द्यं द्रोणद्वयपरिमितामितं वेत्यर्थः इह षष्ठी द्वितीया वा प्राप्ता यद्विद्रोणपरिमितत्री
ह्यादिमूल्येन द्विद्रोणेन शाह्लालाहनणिकरुत्तदाकरणत्वाविवक्षार्थमिदं तन्मूल्येन हि द्विद्रो।

षष्ठीप्राप्तिमत्वे
दमास्तुं वाक्रि
वृत्तनाभावश्चं
नानुपपन्नस्याम्
नभिधानमा
श्रित्यप्रत्या
ख्यानमेव वे
ति

पा॰ शे॰ 345

णएवक्रीयंनइतिनार्थभेदः एवंपंचकेनपशून्क्रीणातीत्यत्रपंचसंख्यापरिच्छेद्यसंघाभिन्नप
शूनित्यर्थः द्वितीयाब्राह्मणेतिद्विकृदिवः कर्मच चादिनितेनसमावेशाद्युतिभावः पर्यायस्यसाध
कत्वमशाद्यानुवृत्त्यापरिक्रियणेइतिसूत्रादनंतरस्याग्रहणापकर्षणेवसिद्धेःतेनमनसादेव।
इत्यत्रमनसादीव्यतीतिविग्रहेकर्मत्वणकरणेतृतीयाचेत्युभयंसिध्यतिमनसःसंज्ञायामि
त्यलुगितिहरदत्तः नत्वयंप्रयोगोऽसंगतः कुयोगलक्षणषष्ठीप्राप्तेः नचकर्तृसाहचर्यात्त
त्रधात्वर्थाश्रयस्यैवकर्मणोग्रहणंस्यनएवस्तोकंपाकइत्यादौषष्ठीनेतिवाच्यं धात्वर्थभेदेनान्य
पिकर्मग्रहणेनैवतदुपपत्त्यावश्यापवृत्तौमानाभावात् धनितंचेदमाकडारसूत्रेकैयटइतिचेदेवं
तर्हिंश्यहेतैर्दीव्यतेयहृदत्तेनेत्याश्रसकर्मकत्वादणिकर्तृणिकर्मत्वंनेतिफलंबोध्यं करणत्वा
चेत्तृतीयेतिसमावेशफलं + नचवैकल्पिकत्वेपस्यात्वंतविद्यमानकर्मकत्वाभावःसिद्धइति
वाच्यंतत्रात्यंतनाविद्यमानकर्मकाणामेवग्रहणेमानाभावस्यपूर्वंनिरूपितत्वात्तुवेति +ननु
संज्ञयोर्वैकल्पिकत्वेपियत्रकर्मयोगस्यसत्त्वेनात्यंतनाविद्यमानकर्मकत्वाभावात्कर्मत्वंनभवि
ष्यतिनचास्मिन्प्रयोगेऽत्यंतनाविद्यमानकत्वमस्तीतिवाच्यंग्रविवक्षितेनकर्मणाणपचादावपिदो
षापत्तेः नचतस्मिन्नेवार्थेकर्मयोगोस्तिइतिनदोषः प्रकृतेपिदोषाभावात् इतिचेन्नहिंस्रणा
वकर्मकादित्तिपरस्मैपदाभावः फलं नचात्यंतनाविद्यमानकर्मकाणामेवग्रहणमित्यत्रमाना
भावात् किंचदीव्यतेऽक्षैर्देवदत्तेनेतिभावेलकाराभावोपिफलंकर्मणिलकारेतुकर्मशंकेर

।धिश्रयणादिपरत्वेदेवदत्तः कर्त्तास्वत्वनन्तान्यर्थकत्वेएधाः कर्त्तारः विक्लित्यनुकूलावयवविभा
गादिपरत्वेऽराटिकादौलवदनुकूलावयवमेलनादिपरत्वेतंडुलादयः कर्त्तारः तंडुलाः पच्यन्तेस्व
प[redacted]सेवेत्यादिरीत्योह्यंतंडुलग्रहणस्यापाकसमाप्तिधारणारूपव्यापारपरत्वेस्थाल्याःकर्त्तृत्वे
संप्रदानापादानयोस्तुनकर्त्तृत्वविवक्षाशब्दशक्तिस्वाभाव्यान्नव्यापारेधातोरवृत्तेरितिदिक्
यत्तुज्ञानस्यस्वरूपस्यात्मनः स्वरूपज्ञानविषयत्वरूपस्वप्रकाशत्वेकर्त्तृकर्मविरोधः अभेदेआ
धाराधेयभावस्यविषयविषयिभावस्यवाभावादितिउत्तरमीमांसाग्रंथेकर्त्तृकर्मशास्त्रः प्रयु
क्तः सोप्ययुक्तः शब्दविशेषोपाधिकस्यकर्त्तृत्वादेः घटमात्रादावुक्तिसंभवाभावात् यदि
कर्त्तृकर्मशब्दयोगाश्रयविषयत्वलक्षणंतत्वंयदिवास्वप्रकाशत्वेऽन्यस्यस्वप्रकाशपदव्यव
हार्यत्वेऽन्यर्थः स्वंप्रकाशयतीतिस्वप्रकाशशब्दव्युत्पत्तिस्तदासमगेव वाणेनहन्तरित्या
दौकरणत्वतृतीयायाआश्रयोर्थः नस्यस्वनिष्ठव्यापारजन्यत्वसंबंधेनक्रियान्वयः कारका
णांचक्रमात्कन्यार्थेक्रियायामन्वयः अतएवकर्त्तृकरणत्वोक्तेत्यादौनांचारितार्थ्यं एतेनका
ष्ठैः पाकइतिस्यादितिमीमांसकोक्तिपरास्ताइष्टापत्तेः यत्तुभवतिक्रियायांप्राथमिकान्वये
नत्वत्रहिभक्तोयं[प श्रा]स्थान्कटंतेनपार्ष्टिकान्वयांगीकारात्कर्त्तृकरणेइत्यादेश्चारितार्थ्यमिति
नचकाष्ठैः पाकइत्यस्यापिदुर्वारत्वात् हरिणाचानइत्यादौदोषात्तभवतिक्रियायांकर्त्तृत्वेना
न्वयेकर्त्तृत्वान्तृतीयानापत्तिः करणत्वेनान्वयेकर्त्तृतृतीयातेनचसमासविधायकासंग।

श्र॰शे॰

त्वापत्तिरिति यत्किंचिदेतत्तन्तमपग्रहणं किमिति संसिध्यर्थकसाधधात्वनिष्पन्नसाधकशब्दे
नैव यद्व्यापारानंतरमव्यवधानेन फलोत्पादकत्वमित्यर्थलाभः सिद्ध इति प्रश्नः गंगायामि।
ति अत्रास्तीत्यध्याहारः अयं भावः आधारोधिकरणमित्यसित्यस्याहि आश्रियंते अस्मिन्नित्या
धार इत्युत्पत्त्या क्रिया[illegible]श्रयोः कर्तृकर्मणोर्धारणक्रियां प्रतियआधारः सोधिकरणमित्यर्थः
स्यात् एवं चेदं सूत्रकटे आसेरित्यादावेव प्रवर्तेत कटोद्यासनक्रियाकर्तुर्धारणक्रियां प्रतिभवत्वा
श्रयः नैहि गंगानद्यास्तीरधर्मस्य घोषधारणाश्रयत्वस्य प्रवाहे बाधात् तथा च तमपग्रहं अव्यवहाव
कं कारकप्रकरणे प्राप्तशक्तिगम्यस्यैवार्थस्य नाश्रयणं किं त्वधिकस्यापीति तस्मात्सूरि तत्प्र।
तितयागोणाधारस्यापि ग्रहणं वाच्यं एवं च तीरधर्मस्य तस्य प्रवाहे उपचारात्सिद्धिरिति अयं पक्षः
सूरितेनाधिकार इति सूत्रे भाष्ये तत्र सूरितेनाधिकं कार्यमित्यर्थेनाधिकरणसंज्ञाया गोणप्र
वृत्त्या गंगायां घोष इत्यादिसिद्धिरुक्ता गंगाशब्देन घामेव वर्त्तेते न यास्तु समीपाद्गौणमाध
रत्वमिति केयटः एवं च तमपोऽभावव्यवधानेन फलोत्पादकस्यापि करणत्वोपचारेण तृती।
यां तत्र यागापत्तिः सिद्धांते तु तमपग्रहणेन करणत्वोपचारेण नादृशप्रयोगस्यासाधुत्वबोध
नादि बोध्यं यदा गंगाशब्दस्तीरे लाक्षणिकस्तदा नेदं प्रयोजनं तीरघोषयोराधारणाधिकरण
त्वस्य सत्वात् अत्र पदे तमपग्रहणं चिंत्यप्रयोजनमिति केचित् केचित्तु एतत्सूत्रभाष्यात्सर्वे
त्र प्रत्ययस्यैव लक्षणानंतु प्रकृतेस्तयासाधकत्वं द्रोणंव्रीहिरित्यादावपि आरोपितं द्रोणत्वं वा
नु प्रत्ययार्थः प्रकृतिस्तु तत्र साधुत्वार्थैव आरोपवीजं च परिच्छेद्यतापत्रत्वं प्रकृतेरपि लक्षणा

भिहितत्वेन करणस्याप्यभिहितत्वाद्दीव्यं तेक्षानित्येवेत्याह-ः अक्षैरक्षानवेति ननु देवनाक्षानादीव्यं
तेऽक्षानित्यादौ करणत्वं तु कर्मलटोः साधनेन संदृत्यो क्षुरि तार्थत्वात्परत्वात्तृतीयेव स्यान्न द्विती
येति चेन्न कार्ये काल परे कर्मणि द्वितीयेत्यत्र पदस्यापस्थानं तस्यानवकाशत्वं द्वितीयायाश्च पु
पपन्नेः प यो रक्षेपि कर्मणि द्वितीयेत्यादीनामात्मसंस्कारायात्र संनिधाने एकेन सर्वसंस्कारस्य कर्त्तु
म शक्यत्वाल्लक्षलोप ज्ञव कर्मणि द्वितीयेत्येतद्विषय कोपज्ञव मामर्थ्येन द्वितीयास्य प्रापादेत्याह-ः
प्रकारद्वयमपीदं क्विन्ति चेत्यत्र भाष्यके घरयोः स्पष्टं ननु दीव्यं तेऽक्षानित्यत्र कर्मणोऽभिधानेपि
करणस्यानभिधानात्तृतीया दुर्वारा एवं देवनाक्षानित्यत्र ल्युटा करणस्याभिधानेपि कर्मणो
नभिधानाद्वितीया षष्ठी वा स्यादिति चेन्न दिवु धात्वर्थे निवृत्ति साधकतमस्यैवात्रोभयत्रापि त्वे
नान्यतरत्राप्यभिहितत्वेऽपि उभयस्याप्युक्तत्वादित्याह-ः अपवर्गे एष्वपवर्गे शाक्यस्य लोकप्रसि
ध्या फलत्वप्राप्ति पूर्वक क्रियासमाप्तिरर्थे क्त प्रत्ययापि क्रियाया धातुनाभिधानात्समाप्तेरपि क्तादिनोक्त
त्वात्तृतीयाद्योत्य फल प्राप्त्यंशप्राबल्येनाप्रायेणाह अपवर्गः फलप्राप्तिरिति तस्यां च सत्यां प्र
योजनाभावादेव न क्रियाप्रवृत्तिरितिभावः नायातइति अनेन हि फलाप्राप्तिः सूच्यते सहयु
क्ते गुणक्रियादृश्योर्गुणप्रधानभावेन द्वयोः संबंधे सहित्यवाचि सह शब्दप्रयोगो भवति त
त्राप्राधान्यं नाम शब्दगुणाध्यन्तत्वपित्याभावः अस्मिन्हिशिष्येण महोपाध्यायः स्थलःशि
ष्येण सहागतः शिष्येण सह दृष्टः शिष्येण महोपाध्यायस्य गौरित्यादौ स्थूलादि निरूपा +
शि

शा॰ शे॰

पाध्यायस्य षाष्ठः संबंधः शिष्यस्य तु सहार्थवर्त्तिदार्थः तथाहि शिष्यस्याहितस्य वा नागमन इति बोधः
शिष्यसंबंध्यन्वयित्वरूपलक्षणमनियतं वा न स्यात् च शिष्यागमनसंबंधे एव संभव इति तत्त्वलादेव षष्ठ्या
न्नस्यापि मानमस्त्वन्वय इति षाष्ठत्वं च विवक्षामात्रनिबंधनं एवं चैषु षाष्ठत्वरूपविशेषणा
भावस्तु नो विशिष्टाभावः सहैव पुत्रैर्द्विप्रागिभीरं वहन्ति गर्दभीत्यादौ विद्यमानतावाचि सहश
ब्दयोगे क्रियाद्यन्वयित्वरूपविशेषणाभावस्तु नापि विशिष्टाभावः दशासंख्याकपुत्राणां विद्य
मानत्वेऽपि प्रतीत्यर्थः यत्र विद्यमानत्वविशिष्टधर्मी तत्र सहशब्दार्थ इति तत्र पुत्रैरिति तृतीयाया
उपपदविभक्तित्वेन षष्ठ्यपवादकत्वात् संबंधमात्रार्थकतया सहार्थेनान्वयापत्तेः तद्धोविरः
इति दद्रूपत्वे रत्रापीति कश्चित् प्रकृते च सहशब्दः सर्वोपरिष्टयते विनिगमनाविरहात्
यत्र त्वशक्तिस्तावत्स्वत्वेऽप्रमत्वेऽप्रधानत्वं यद्द्वदात् तस्मिन्नगरे प्रधानं पुरुषस्तदृक्षाद्याज्यव।
हारात्तदभावरूपं चाप्रधानत्वं न च तृतीयावाच्यमन एवाप्रधानग्रहणं चरितार्थम् न च प्र।
धानतृतीयाव्यावृत्त्यर्थं सहयोगस्य विशेषणतया सहान्वयित्वरूपस्यैवांतरंगत्वेन त्वादा
विवग्रहेऽलं नादोषादिवेति प्रातिपदिकार्थमात्रेऽन्तरंगत्वात् प्रथमोत्पन्नेः शिष्येण सहोपाध्या
यस्य गौरित्यादौ षष्ठ्यप्यन्त एव उपाध्यायस्य साक्षात् गवा संबंधेनांतरंगत्वात्तन्निबंधनषष्ठ्या
एव प्राप्तेः सहार्थेन तु न द्वारा योग इति तस्य बहिरंगत्वं शिष्येण सहोपाध्यायस्यागमनमि
त्यादौ कारकविभक्तित्वेन षष्ठ्याः प्राबल्याच्च सहार्थेन योगे जायमानत्वेनोपपादविभक्तिरपा

घटस्य पक्वादत्वात्षष्ठीवत्सहार्थे विधानबलादेव प्राप्नोतीति नन्वत्र राज्ञा सह सेना गच्छतीत्यादाव
नापत्तेः सहयुक्ते प्रधानवचनमनर्थकं कारकविभक्तेर्बलीयस्त्वात्प्राप्नोति यदि कार्थ्येकमात्र
त्रनिमित्तत्वेनान्तरंगत्वाच्च प्रथमा भविष्यतीत्यप्रधानग्रहणं प्रत्याख्यानपरभाष्यविरोधा
त्तैवं कश्चित्तु सहार्थे प्रतियोगिनस्त्वार्थे प्राधान्यमपि प्रतीयते अत एव समकक्षतयोर्मध्येऽन्यतर
स्याप्रेरणात्सहार्थं तद्यामित्युक्ते दुःखेदस्य पितापुत्रेण सहेति सहशब्दार्थः सौहित्यं पितुराय
न्नपि पुत्रसाहित्यवान्पिता स्यागतवाधः तत्र समभिव्याहृतक्रियासमानकालिकक्रि
यावत्त्वादिसमनियतो खण्डोपाधिः कश्चित्समानदेशत्वसमनियतमपि अत एवामाष
वायोस्तरं नस्मिन्नेव देवत्ते त्रैति लवापत्तिर्व्वेः माषानुत्पत्तीतिभवति स्पष्टं चेदमत्रैव भाष्ये प
स्य विनानानाभिरिति वस्सहनेति वक्तव्ये युक्तग्रहणं प्रातु विशेषादेरणार्थ्ययोगे भव+ ना
तीत्येतदर्थं तदुक्तं महार्थेनेति अत एव कश्चित्क वृयोगं विनापि भवति तदाह विनापी
ति न्यायसिद्धे र्थे लिंगमप्याह वृद्ध इति येनांग नन्वंग प्रातु स्यावयवे प्रसिद्धत्वात्तेन ॥ गु
ण न काणत्वादिनावयवस्य विकारो लक्ष्यते तत्रतन्नेये निस्तत्वार्थेऽक्षिकाणमस्येत्यादा
वेव प्रसक्त्वादन्तरंगत्वात्प्राप्नामपि प्रथमां बाधित्वा गुणवचनात्काणशब्दादेव स्यात् स्वत
एकाणत्वस्यादो त्वत शब्दान्न षष्ठ्येव स्यात् इति चेन्न अर्शआद्यजन्नांग शब्दाद्यण नस्या

षा॰ शे॰ 346

वयवविपरत्वात् अत एवांगग्रहणं चरितार्थं येनेति सर्वनाम्ना च प्रकृत्यर्थभूतोवयव एव गृह्यते
व्याख्यानात् स चार्थाद्विकृत एव न ह्यविकृतेनांगेनावयवविकारो लक्षयितुं शक्यते तदाह
येनांगेनेत्यादिना अक्ष्णा काण इति यद्यप्यक्ष्ण एव काणत्वं तथाप्यवयवधर्मस्य समुदाये आ-
रोपाच्छरीरेपि व्यवहारो निरूढ इति ध्येयं चक्षुर्नाशवान् स च लक्ष्यः काणपदार्थः अक्षिप-
दार्थो गोलकं विकारश्च पृक्तत्वरूपः संबंधस्तृतीयार्थः एवं च गोलकविकारप्रयुक्तचक्षु- वि
र्नाशवान् स च लक्ष्य इति बोधः अक्षिशब्दो यानिकप्रकरणस्य भाष्यात् सर्वथा दृष्टिहीनः
काण इति लभ्यते ननु काणशब्दस्याहिलिंगनाविकारमात्रप्रवृत्तिनिमित्तकत्वेनास्ति श-
ब्दप्रयोगो व्यर्थ इति चेन्न सामान्योपक्रमे वाक्ये लक्षणे तु तेभवत्याकांक्षा पश्यति काणेन
वेति तत्र पश्यत्यादिनिवृत्त्यर्थं काणशब्दप्रयोगे दोषाभावात् यथा यद्वा वानयकोह्यविज्ञा-
वितिरिति शरीरस्य शब्दानां साधुत्वे चेदमेव मानम् षष्ठ्यपवादोयं तदाह अक्षिसंबंधीति अं-
गविकारः किमिति अंगग्रहणं इति प्रश्नः अक्षिकाणमिति अंगसत्यंगग्रहणे परत्वात् आंगं
प्रथमं संबंधित्वाच्चैव स्यात् मुख्यो ह्यत्र विकारः उदाहरणं त्वारोपित इति दिक् इत्थंभूतलक्ष-
णमस्य सूत्रस्यायं न इत्थंशब्दः प्रकृत्यर्थं विहाय प्रकारमात्रे लाक्षणिकः शास्यार्थकभूधा-
तोः कर्तरि क्तं कर्मविभक्तं तेनेत्थंशब्देन भूतशब्दस्य समासः लक्षणशब्दः करणसा-
धनः तस्य कर्मषष्ठ्यंतेनेत्थंभूतशब्देन समासस्तदाह कंचिदित्यादि एवं च स हेतुत्रे

रित्यादौ विद्यमानवाचि समहणाद्योगे इत्थंभूतलक्षणे इति तृतीयेति केचिदुक्तिश्चिंत्येति भावः
लक्षणे इति तत्र वर्त्तमानादिति शेषः जटाभिरिति ज्ञाप्यज्ञापकरूपः संबंधस्तृतीयार्थः तदाह
जटाज्ञाप्येति यत्तु जटाभिस्तापसो ज्ञानस्य यो ज्ञानक्रियायां जटादीनां करणत्वादेव
तृतीयासिद्धेरिदं व्यर्थमिति तन्न यदा प्रमाता प्रमितिदशायामेवात्मनः श्वतीति विषयावि
षयं प्रतिपादयितुं वाक्यं प्रयुंक्ते तदा ज्ञानक्रियाया अप्रतिभासात् प्रतिपाद्यत्वाच्च सूत्रस्याव।
श्यकत्वात् करणत्वाविवक्षायां षष्ठीबाधनार्थं चावश्यकत्वाच्च एतेन हेतुतृतीयेयं सि
द्धमित्यपास्तं लक्ष्यलक्षणभावस्यैव विवक्षितत्वादित्यलं संज्ञो ज्ञनीप्रादुर्भाव इत्यस्य
सानुनग्रहणं नस्यात्कर्मत्वाच्च तदाह आनीते इति आश्रयोत्र तृतीयार्थः संजानीते।
इति संप्रतिभ्यामनाध्याने इति तङ् कर्तृगामि तु परत्वात्स्य षष्ठीपितः संज्ञातेति यत्तु आध्या
नेपरत्वाद्धीगर्थेति षष्ठी मातुः संज्ञानातीति हरदत्तः तत्र शेषाधिकारात् हेतौ कारणमिह
हेतुः ननु शास्त्रीय एव तस्यान्त्यप्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञाविधानात् कर्तृकरण
योरिति एव सिद्धेः ननु लौकिकहेतोरपि करणत्वादेव तृतीयासिद्धिरत आह द्रव्यादीति
आदिना गुणक्रिययोः संग्रहः साधारणमिति तत्राप्यन्वयीत्यर्थः करणं तु क्रियामात्रान्व
यीति भावः नन्वेवं क्रियायाश्चिनिकरणत्वेनैव सिद्धौ तत्र तृतीयाविधानं व्यर्थमत आह नि
र्व्यापारेति करणं तु व्यापारवन्मात्र इतीति भावः एवं च शास्त्रबोधनेन त्वप्रयोजककरणेन तृती
ण

श्रा॰ शे॰

यावधानमिति तत्त्वं यागस्य ... इत्यर्थः ध्यः श्राणे वियोग इति करणे बोधः पुण्यमित्र हेतु
त्वं दर्शनमिति चात्र स्फुटं प्रतिपन्नये करणे चेलन्त्वा एव माह करणत्वं विनिर्दिष्टेनेति हेतु
त्वतीयार्थः प्रकृतिप्रत्ययार्थयोरभेदः संबंधः प्रत्ययार्थस्य च तन्त्यता संबंधेन तत्रा
न्वयः अत्र व्यापारसत्त्वेपि क्रियान्वयित्वाभावान्न कर्तृत्वं पुण्येनेति अत्र क्रियान्वयित्वे
पि निर्व्यापारत्वान्न करणत्वम् एवं सव्यापारं व्यवधानेन फलोत्पादकं क्रियान्वयि हेतुरेवे
ति बोध्यं फलमपीह हेतु इहैव तस्य त्रोदाहरणे क्वचित् फलमपि हेतुत्वेन विवक्षित इत्यर्थः
तस्यापि स्वज्ञानद्वारा निमित्तत्वादिति भावः एतच्च शत्रयस्तदर्थे विकृते धान्तारेकाच इ
त्यादिसूत्रेषु कैयटे स्पष्टं अध्ययनेनेति अध्ययनाभिन्न हेतुको वास इति बोधः हेतुत्वं
च स्वज्ञानद्वारा बोध्यं अपरे तु इह सूत्रे फलमपि हेतुशब्देन गृह्यत इत्यर्थः तृतीयार्थ
श्च फलत्वेन फलम् तत्र प्रकृत्यर्थस्याभेदेनान्वयः तस्य च वासे जनकतया एवं चाध्ययना
भिन्न फलजनको वास इति बोध इत्याहुः तादर्थ्यविवक्षायां चतुर्थ्यपि अध्ययनाय वसति च
तुर्थ्यर्थ उपकारकत्वम् तत्र प्रकृत्यर्थस्य निरूपकतयान्वयः अध्ययननिरूपितोपकार
कता वान्वास इति बोधः फलवाचकाद्विवक्षाभेदेन विभक्तिद्वयमित्येतावता प्राचामेत
द्विषये चतुर्थीतृतीययोर्विकल्पव्यवहार इति बोध्यं ननु लं श्रमेणेत्यादौ क्रियां विना
पि करणे तृतीयादर्शनेन करणं क्रियाजनकत्वात् क्रियामात्रान्वयीत्यनुपपन्नमत आह

गम्यमानापीति ननु श्रूयमाणो ऽवेत्याङ्गृह इति भावः अलमिति अलंशब्दो निषेधार्थकस्तदाह सा
धनं नास्तीति ननु साध्यमित्यस्याध्याहारे ऽपि तस्य नामत्वेन द्रव्यवाचित्वेन क्रियावाचित्वमत आह
इहेति साध्यमित्यत्र प्रकृतिभागस्यार्थे वृत्तिरित्यर्थः मा चापलायेति गत्यन्यत्वेनैषीदित्यत्रत्य
तद्ध्यमिति शेषः अशिष्टव्यवहार इति अशिष्टानां संकीर्णाचाराणां यो व्यवहारः क्रियातद्वाच
कप्रयोगे प्रवृत्तसन्निन्यायेन यत्संबंधेन व्यवहारस्य संकीर्णाचारत्वं तद्वाचकात् तु चतुर्थ्यर्थे तृतीयेत्य
र्थः इदं च दाणश्च सा चेच्चतुर्थ्यर्थे इति सूत्रभाष्यस्पष्टं तेनैव चायमर्थो ज्ञाप्यते चतुर्थ्यर्थे विहिता
तृतीयायुक्ताद्दाणश्चात्मनेपदमिति तदर्थः सा चेदित्यनेन तस्याः कार्यकत्वं ज्ञाप्यते तेनाशि
ष्टव्यवहार इत्ययमपि भाष्योक्तो ऽर्थः सिद्ध इत्याहुः दास्येति दास्युद्देश्यकं दानमित्यर्थः
उद्देश्यस्तृतीयार्थः इति तृतीया कर्मणाय दानस्येति दाधात्वर्थस्येत्यर्थः इदमुपलक्षणं
क्रियामात्रस्येत्याहुः अत एव क्रियाग्रहणं कर्तव्यमित्यस्य गत्यर्थकर्मणीत्यस्य च प्रत्याख्यान
परं भाष्यं संगच्छते प्रत्याख्यानप्रकारश्च गत्यर्थेति सूत्रे उपपादयिष्यते यत्तु वृत्त्यादिषु अन्वर्थ
संज्ञाबलेनाह दानस्येति तेनाज्ञानयतीत्यादौ नातिप्रसंगः दानं चात्र परस्वत्वापत्तिर्यं प्रति
व्यापारः तेन रजकस्य वस्त्रं ददातीत्यादौ नातिप्रसंगः न च हि ददाति भोक्तुं इत्युक्तं तद्भाष्यविरो
धादुपेक्ष्यं अत एव वैदिकोपाध्यायस्तस्मै चपेटां ददातीति वृद्धिसूत्रस्थभाष्यप्रयोगः संगच्छते
रजकस्य ददातीति तु शेषत्वविवक्षायां बोध्यं अज्ञानयतीत्यादि त्वग्रे परिहरिष्यते कर्मणेति

१५८

348

प्रा० शे० तद्वंधुमिति शेषः अभिप्रैतीत्यर्थः कर्मणा संबंधस्य कर्मनिष्ठफलनिरूपकत्वं एवं च दाधात्व
कर्मनिष्ठफलनिरूपकतयेच्छाविषयो यः संप्रदानमिति फलितं अयमेव चोद्देश्यपदं नन्वत्र ते शेषी
ति च एवं च कर्मकारकान्वितक्रियोद्देश्यः संप्रदानमिति फलितं विप्रायेति दाधात्वर्थश्च स्वत्वत्व
स्वत्वनिरूपकत्वभयानुकूलो व्यापारः तदेकदेशे स्वत्वे चतुर्थ्यर्थस्योद्देश्यस्य निरूपकतयान्वयः एवं
च विप्राभिन्नेच्छाविषयनिरूपितस्वत्वनिरूपकत्वभयानुकूलो व्यापार इति बोधः उद्देश्यत्वे धात्वर्थः
उद्देश्यत्वं चावच्छेदकोपाधिः अवच्छेद्यमुद्देश्यत्वं वा अशक्यतावच्छेदकानामननुगमकं बोध्यं ननु कर्मग्र
हणं किमर्थं यमभिप्रैतीत्येतावतैवोद्देश्यत्वलाभात् क्रियाग्रहणं कर्त्रेऽव्याप्तमिति वा किंचन कार्य
मित्यपरं लाघवमिति चेन्न गौरवोद्देश्यतयांतरंगत्वाद्गमनादौ संतानाभावादित्येतदर्थं तत्सत्वात्
न च कर्मसंज्ञानवकाशसामर्थ्यात्पर्यायापत्तेः कारकप्रकरणे च सामर्थ्यगम्यः प्रकर्षो नाश्रीयते
नांतरंगबहिरंगभावो वाधीति भाष्यकैयटादयः अन्ये तु कर्मणश्चतुर्थीनिमित्तत्वप्रदर्शनेन कर्मशु
स्तवनार्थे त्यपेक्षया च चतुर्थीस्त्वकेनैवेत्यलं वचनबोधनार्थं कर्मणेति अत एव प्रयोजकलक्षणप्रासनवन्मैत्रा
वेति वरुणाय दण्डप्रदानमित्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति दण्डप्रदानं न प्रति
पत्तिः किंतु द्वितीयापेक्षया बलीयस्याश्चतुर्थ्याः सोमे मैत्रावरुणसंस्कारकमिति मीमांसकाः
कर्मणा यमभिप्रैतीत्यत्र कर्माहिपमिति निर्दिष्टस्य प्रधानत्वलक्षणं शेषित्वं कर्मणेति निर्दिष्टस्य
चाप्रधानत्वलक्षणं शेषत्वं प्रतीयते कर्मणा करणभूतेन यमभिप्रैतीति नदर्थ्यान्तं गोर्हि विप्रवि

षष्ठेकां प्रतिकरणं गां दास्यामीति हि विप्रमिच्छति एवं च कर्मकारकान्विता क्रियोद्देश्यः संप्रदानमि
ति फलितम् + ननु अजांयामित्यत्र परत्वात् कर्तुरीप्सितकर्मसंज्ञया बाधात् नहि मीमांसकोक्तं तल्लवनं
परत्वादिबाधकं ग्रामस्याजानयनोद्देश्यत्वाभावात् अजा ग्रामसंबद्धा भवत्विति मीच्छया हि न
यनं न तु ग्रामो अजासंबन्धो भवत्विति तीच्छया यद्धि कर्म यदर्थं तेन कर्मणाभिप्रेयमाणस्यैव संप्र।
दानत्वात् इति पाठः + एतेन अजां ग्रामं नयतीत्यादौ ग्रामस्य संप्रदानत्वं स्यादिति परास्तं ग्राम
स्याजाकर्मकनयनोद्देश्यत्वाभावात् नहि ग्रामो अजासंबद्धो भवत्विति इच्छा नेतुः किं तु अजा
ग्रामसंबद्धा भवत्विति अजायां तु न चतुर्थी परत्वात् कर्मसंज्ञया बाधात् यदि तु ग्रामो अजा।
संबद्धो भवत्विति तीच्छया नयनं नयतेश्च संयोगानुकूलव्यापारमात्रमर्थः फलतावच्छेदकसं
बंधो अजामात्रनिष्ठः तदा भवत्येवाजानां ग्रामाय नयनीति इत्याहुः यं स ग्रहणं किमर्थं
तदभावेप्यभिप्रयत एव स्यात् प्रत्युत पदार्थसंबंधेनैव निराकांक्षत्वे अध्याहारे मानाभावात् कर्तृ
संज्ञात्वकर्मकधातुविषये सावकाशा तत्र उपाध्यायाय शिष्येण गोर्दीयत इत्यत्र शिष्या
योपाध्यायस्य गोर्दीयत इति स्यात् न च शिष्यस्य कर्तृत्वाभावे कथं गोः कर्मत्वं कर्मसंज्ञा
यां कर्तृग्रहणस्य स्वतंत्रोपलक्षणत्वादित्याहुः दानीय इति बाहुलकात्संप्रदाने नीयः
कर्मणायमभिप्रैतीत्युक्ते कर्मकक्रियोद्देश्यस्य संप्रदानत्वं न स्यादत आह क्रिययायमिति
कर्मरहितक्रियोद्देश्योपि संप्रदानमित्यर्थः तच्चकेचित् अन्यायात् अकर्मकेषु सावकाशा

349

पा॰ प्रो॰

याश्च स्युः सकर्मकेषु धात्वर्थव्यापिकरणफलाश्रयः कर्मसंज्ञया वा धात्वाकर्मका एवास्योदाहर-
णं तदाह पत्ये शेत इति पत्युद्देश्यकं शयनमिति बोधः नचैवं दानादीनां तदर्थत्वात्तादर्थ्ये चतुर्थ्ये-
व सिद्धे किमनया संप्रदानसंज्ञयेति वाच्यं विप्रोद्देश्यकं दानमित्यर्थबोधनार्थमावश्यकत्वात्
चतुर्थीसमासे कारकपूर्वपदकार्यार्थमावश्यकत्वाच्चेति हेलाराजादयः पशुनेति फलाश्र-
यत्वं तृतीयार्थः उद्देश्यो द्वितीयार्थः तदाह पशुमित्यादि एतच्चदानार्थकयजधातुमात्रविष-
यम् सूत्रार्थत्वेन पशोः करणत्वं न्याय्यसिद्धमित्याहुः कैयटस्तु छांदसमेतत् छंदसि च सर्वे
विधीनां वैकल्पिकत्वात् पशुं रुद्राय यजत इत्यपि भवत्येवेत्याह रुच्यर्थानां अन्यकर्तृक इति
अभिलषतिकर्त्रपेक्षयान्यत् अभिलषतिकर्म तत्कर्तृक इत्यर्थः विषयतासंबंधावच्छिन्नप्री-
त्यनुकूलव्यापाराश्रयो ह्यभिलषतिकर्ता हरिर्भक्तिमभिलषतीति संप्रत्ययात् आश्रयतासंबं-
धावच्छिन्न तदनुकूलः प्रीतिव्याप्तिकरणे यो व्यापारस्तदाश्रयो रोचतेः कर्तेति भावः एवं चाभि-
लषतेरुच्यर्थत्वाभावान्न तद्योगे संप्रदानत्वं तद्ध्वनयन्नाह हरिनिष्ठेति कर्त्रीति तदनुकूलव्यापा-
राश्रय इत्यर्थः प्रीञ् तर्पण इति क्र्यादेश्चुरादेर्वा शाङ्-गनायिति देवादिकस्य सकर्मकत्वेन तस्मा-
द्धा प्रीयमाण इत्यत्र कर्मणि लटः शानच् प्रीयमान इति साहचर्याच्च हरये रोचते इत्यस्य हरिं
प्रीणयतीत्यर्थः कर्मसंज्ञायां च प्राप्तायामिदं नच प्रीधातोरपि रुच्यर्थत्वेन प्रीयमाणश्च इति क-
र्मणि शानज् नुपपन्न इति वाच्यं अनेनैव निर्देशेन प्रीधातुपात्र प्रीत्याश्रयस्य न संप्रदानस्य व

मितिज्ञापनादन्वितेः अत एव हरिं प्रीणयतीत्यादि प्रयोगाः संगच्छंते नह्यत्र हरिणा हेतुत्वे कर्म।
संज्ञायां शेषत्वेनापि कारकं कृत्यार्थादि सूत्रेण संप्रदानात्वमनुच्यत इति दिक् हेतुत्व षष्ठीश
ङ्कायां विषयत्वस्यैव वक्ष्यामः यथीति कर्मसंज्ञाविवाधिकरणेमाभूदित्यर्थः अत एवादित्यो रोचत इति
टीकायां संज्ञानेत्याहुः आधन्न श्रूयमान पदेन यद्विषयक ज्ञानानुकूल व्यापारानुकूल व्या
पारः स इह श्रूयते न त्वं के प्रथमोपस्थितत्वान्मुख्यत्वेनार्थकर्मेत्याशयं नस्यापि ज्ञापनविषये कावि
षयत्वाच्च नन्वप वृत्तिरिति नद्भावं ज्ञापनं च श्लाघादिधात्वर्थः कर्मत्वं च तत्त्वेनार्थः श्लाघतेः स्तु
तिः पूर्विका बोधनार्थः स्तुतिश्च गुणवत्वप्रतिपादनं स्मरादिति हेतौ पंचमी एवं च स्तुत्याकृतं
अन्यस्य बोधयतीत्यर्थः ह्नुङ इति सपत्नीभ्यः कृष्णं ह्नुवानानुकूलिति न्याय्यार्थविशिष्टं कृष्णमन्यं
बोधयतीत्यर्थः अत्रापि ह्नुतिपूर्विकाबोधनान्नेति रर्थः एवं तिष्ठते शापते त्वन्नयोरपि स्थित्या
शापथेन च कृष्णमन्यं बोधयतीत्यर्थः प्रकाशनस्थेयाख्ययोः शापउपलंभने इति तङ्
कृष्णं स्तौतीत्यर्थः इति मनोरमायां स्तोत्रेन बोधनपर्यंतलक्षणेत्याहुः अन्ये तु श्रूयमान
पदेन एतदर्थक कर्मण एव ग्रहणं प्रधानभूत एतदर्थकर्मण एव ग्रहीतुमुचितत्वात् अत एव श्ला
घायात्मानं परं वा श्लाघ्यं कथयतीत्यर्थः ह्नुतेरनुपादाय यस्य कस्यचित् ह्नुतिमित्यर्थमिति
प्राचः अत्र वाक्ये कर्मणा यमभिप्रैतीति संप्रदानत्वं तदविवक्षा एवं कशापविवक्षायां षष्ठ्यां ३
श्लाघायामिदं वचनं तिष्ठते शतेः इत्यादेश्च स्थित्या शापथेन च स्याभिप्रायं बोधयतीत्यर्थः ॥

[illegible]

२५॰ 962

पू॰ पा॰ 150

स्तुतिमात्रार्थत्वे कृत्स्नं कृष्णं ज्ञापयते इत्येवेत्याहुः ध्वनिते चेदं मतं द्वयं ज्ञापउपलंभन इति वार्त्तिके कैयटेन
ज्ञीप्स्यमाने विवदंते यस्मा आख्यायते सः संप्रदानमिति यस्मै प्रयसमाख्या आख्यायते इति केचिदिति ग्रंथेन प्र
कृत्यर्थकर्मण एव ग्रहणमिति आधायशयः एवं चैककर्मण एव ज्ञीप्स्यमानपदेन ग्रहणमिति तन्मतेशयः न
त्वाद्यं मतं पुत्रं श्रंमेत्यादि ज्ञाप्यमान इत्येव सिद्धे सनुपादानवैयर्थ्यापत्तेः एवं तेकर्तृत्वाकर्मण इत्युक्त्याख्या
प्यमानपदेन तस्यैव ग्रहणं सिद्धं सत्यमस्यैतस्यापि ज्ञीप्स्यमानपदेन ग्रहणमिति विवहवाज्ञी
प्स्यमान इति ज्ञापनवचनात् एवं तात् तत्त्वेः सनेतात् कर्मणि प्राप्त नचेत्याहुः षष्ठीति कर्मण एव ष
ष्ठी स्यात् अधिकरणादेर्माभूदिति भावः नच ज्ञीप्स्यमानपदाभावे सत्त्वस्यषष्ठी षत्वविवक्षायां सं
प्रदानसंज्ञाविषये चारितार्थेन परत्वात्संज्ञाभिर्बाधः सिद्धेः कृष्यमलदिति वाच्यं अधिकर
णत्वाविवक्षायां तदभावार्थमावश्यकत्वात् सत्त्वमस्य ग्रहणेहि ज्ञीप्स्यमानत्वाभावबोधना
यस्मरादिति हेतुत्वाथ तथ्र्थ चारितार्थ्याच्च कर्मत्वकारकबोधार्थं तस्यावश्यकत्वाच्चेति दिक् धारे
रुत्तमर्णः । उत्तमर्ण इति एवं तस्य ग्रहणं धारेरिति षष्ठ्याप्राज्ञायां वचनं धारयतेः प्रयोग इति तदर्थान्
पि तत्त्वार्थः भक्ताय धारयतीति ध्रियमाणस्य रूपणाविनिष्ठमानं मोक्षहरिः प्रयुक्तेत्यर्थः न
चोत्तमर्णे भक्तादेर्वयितदवस्थापनरूपाधमर्णव्यापारप्रयोजकत्वात्तत्प्रयोजकहेतुस्तत्रेति परत्वा
त् हेतुश्चकर्त्तृसंज्ञापत्तिरिति वाच्यं कारकाधिकारात् धात्वर्थव्यापारेन नकस्यैव तत्संज्ञाप्रवृत्त्या
उत्तमर्णेः नहि सव्यापारात्र धात्वर्थ इति दिक् ननु सत्ताज्ञातीय इत्यन्तरदानमंगीकृत्याशुभीजन २४

कपरदत्तपरकीयद्रव्यादानं करणं एवं च मोक्षस्यानङ्गरूपत्वभावेन कथं भक्तस्योत्तमर्णत्वमिति चेन्नम
वस्वप्रदेयत्वेन तत्रापि करणव्यवहारात् धत्तृधारणं इति एवं तस्य तु न ग्रहणं अन्यासन्निन्यायेनोत्तम
र्णे पटघटकरणोत्तिन्नाधमर्णो निष्करणविषयकप्ररणाप्रतिपादकस्यैव धारे ग्रहणादि
त्याहुः ग्रामे इति ननूत्तमर्णो ग्रहणं व्यर्थं ग्रामे इत्यादौ परैरधिकरणत्वादिभिरेव तद्बाधात् ए
तेन तदभावे धर्मिणो दोषः स्यादस्तम् परतया कर्तृत्वेन बाधात् चेन्न चोत्तमर्णपिण्डेहन्तु संहतया प
त्वाबाधेन स्वत्वे वैयर्थ्यं यथावस्थिति कर्तृणां मोक्षादीनां हृषीपाद्यधमर्णाः प्रयोजकास्तथा ते।
षामनुत्तमर्णा भक्तादयः प्रयोजका इति वाच्यं हेतुत्वाविवक्षायां चारितार्थ्यात् ननु कर्मा
करे पदस्य प्राप्ताया मिदं वचनमिति चेन्न अधिकरणत्वाद्यविवक्षायां ग्रामादिष्वप्रवृत्त्य
र्थे मुत्तमर्णग्रहणस्याप्याव श्यकत्वादित्याहुः यदात्वदेवदत्तस्य स्वत्वसंबंधेन शतेन्वय।
स्तदा देवदत्तस्य शतं धारयतीत्येव प्रकर्षविवक्षायां त्विति फलाश्रयत्वेन विवक्षायामि
त्यर्थः परत्वादिति इदं सूत्रं शेषत्वविवक्षायां चरितार्थमिति भावः उदाहरणे च न
त्वर्थः संबंधः स्पृहिविकार्थः प्रष्टसंबंधीकेत्यर्थः अत एव स्पृहणीयशोभमित्यादौ क
र्मण्यानीयरकुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति चेत्यत्र विभक्तिविपरिणामेन कान्ताय।
स्पृहयन्तीति वा भोगायेत्यध्याहृत्य वा व्याख्येयमित्याहुः ईप्सितग्रहणं तु अधिकरणत्वा
द्यविवक्षायां ग्रामादौ व्याप्तस्यार्थबोध्यं यत्नेनैवं सति क्रियया यमभिप्रैतीत्यनेन न सिद्धेरिदं।

व्याख्यानत्वे
चेति

प्रा॰ शे॰

सूत्रं कार्यमिति तत्र तदविवक्षायां चारितार्थ्यात् तस्यासार्वत्रिकत्वाच्च व्यापारव्यधिकरण।
फलवाचकधात्वयोग एव तत्प्रवृत्तेश्च सुन एव कटं करोतीत्यादौ दोषो न यत्तु हेलाराजेन क
र्मसंज्ञायाः शेषषष्ठ्याश्च बाधकेयमित्युक्तं तन्न शेषत्वविवक्षायां चारितार्थ्येन कर्मसंज्ञाबा
धकत्वायोगात् अपरे तु ईप्सितपदेन फलाश्रयत्वेनैवोपस्थितेः कर्मसंज्ञापवाद एवा
यं + किंच कारकाधिकारकत्वेन विवक्षायामेवैतत्प्रवृत्तिः। चिता कारकत्वविवक्षा च क्रि
याजनकत्वविवक्षैव क्रियासंबंधित्वमात्रविवक्षैव च षष्ठीविषयः यत्र तु धारेरित्यादौ।
अकथितं चेत्यादौ च तत्वासंभवः तत्र यथा कथंचित्कारकत्वं द्रष्टव्यम् + पुष्पाणि स्पृह
यतीत्यादौ त्वप्रधानाहता इत्यादि क्रियानिरूपितं कर्मत्वं बोध्यं अत एव हरदत्तेन शेषत्व
विवक्षायां षष्ठ्यपीत्युक्तं एवं च कान्तस्य स्पृहयतीति यथा अन्नमेव साधु ईप्सितं चारिता
र्थ्येन कर्मसंज्ञाबाधकत्वायोगात् अपरे तु ईप्सितपदेन फलाश्रयत्वेनैवोपस्थितेः कर्मसं।
ज्ञापवाद एवायं पुष्पाणि स्पृहयतीति यथा श्रुतमेव साधु स्पृहणीयं पुष्पमित्यादौ तु +
बाहुलकात् संप्रदानत्वानीरित्याहुः यत्तु ईप्सितमात्रे इयं संज्ञा प्रकर्षविवक्षायां तु परत्वात्
कर्मत्वं एवं चेप्सितमात्रे ईप्सिततमे वा शेषत्वेन विवक्षिते तु षष्ठ्येवेति तन्न शेषत्वविवक्षितत्वा
न्निरिक्तईप्सितमात्रस्य दुर्वचत्वात् प्रकृतं परत्वपर्य प्रधानीभूतव्यापारजन्यफलाश्रयत्वस्ये
वातस्तत्त्वेन वारयितुमशक्यत्वात् क्रुधद्रुह एषामर्थानां यं प्रति कोपः तत्र क्रुधद्रुहो

विरोधधर्मे[...]नुकूलव्यापारगुणवद्विषयदोषारोपानुकूलव्यापारार्थौ

वकर्मकत्वेन योगे शेषषष्ठ्यपवादोऽयं वाक्चक्षुरादिविकारानुमेयप्रहृष्टकोपनूपक्रोधजन्यस्याप्य।
कारविषयकोपत्रापद्रोहजन्यस्य फलस्यैवदन्नादौ नद्विषयककर्मसंज्ञाविधानात्वरावश्यत्वानुधात्वर्थे।
नोपसंग्रहात्वग्रेन्त्योत्कर्षविषयद्वेषगुणविषयदोषाविष्करणार्थोऽस्तु एवेनद्विषयककर्मसंज्ञा
पांप्राप्तायां वचनमित्याहुः अपरे तु एतद्योगेपि कर्मणः शेषत्वविवक्षायां सूत्रस्य चारितार्थ्येन
कर्मसंज्ञाबाधकत्वेमानाभावः यं प्रतीति पृष्ठस्यार्थस्यानतर्थेवत्वाभादित्याहुः भार्यामीर्ष्यती-
ति नात्र भार्यां प्रति कोपः किंतु परैर्दृश्यमानां तां न सहत इत्येवेति भावः कोपप्रभवा एवेति उ
सदाहरणेन कोपजन्येर्ष्या किं त्वन्यपुरुषदर्शनजन्येति भावः क्रुधियोगे तु नेदं प्रवर्तते नह्य
कुपितः क्रुध्यतीति भाष्येण प्रत्यूहकोपस्यैव क्रुधधर्थेनाबाधनेन कुप्येतदर्थत्वाभावान्न क्रुध्य
ति कस्मैचिदित्यत्र तु क्रियया यमभिप्रैतीति संप्रदानत्वं न चैवं क्रुधद्रुहोर्ग्रहणं व्यर्थं उद्देश्य।
त्वाविवक्षायां चारितार्थ्यादित्याहुः चित्तदोषार्थानामिति तुनोक्तं द्विषादावतिप्रसंगात् यादृशान्त
र क्रोधादयश्चेतनविषया एव द्वेषत्वं च तेन विषयापि ओषधं द्वेष्टीति प्रयोगानुचितत्वाद्विशेष
द्वेषानुकूलव्यापारस्तदर्थः अनूत्यंत अस्मान् द्वेष्टीत्यादिवचनमिनंदनं द्विषरर्थः अतएवाचेतने
ऽपि प्रयुज्यते ओषधं द्वेष्टीति पथ्या क्रुधद्रुहोः उपसृष्टपदं सोपसर्गत्वपार्थे वैयाकरणनिका
यप्रसिद्धं तदाह सोपसर्गयोरिति पूर्वसूत्रापवादोयम् यदीयश्चेति पष्ठभाष्यभस्संबंधीत्यर्थः
तत्संबंधिपश्च भाश्च भश्च श्चएव तत्त्वश्च इति व्यवह्रियते इति भावः राधीक्ष्योः प्रश्नविषयपर्यालोच

जन्यत्वेन मासमास्ते इत्यादिवज्ज्ञानस्यानयोः
ज्ञानविषयत्वाभावेन च पाठांतरं

प्रा॰प्रो॰ नमर्थः कर्मणः प्रश्नविषयस्य धात्वर्थेनोपसंग्रहादकर्मकावेनोक्त एव पृच्छत् याधोकर्मकादेवेति
गणसूत्रात् धात्वर्थैकदेशे प्रश्नविषये कुत्सस्यान्वयात् कारकत्वं अत्र संबंधस्यानुपपत्तेः अत एव।
वृक्षं प्राप्तायामिदं वचनम् न तु प्रश्नविषयवृक्षफलाश्रयत्वया कर्मत्वे प्राप्ते द्वितीयेत्यत्र युक्तं तस्य सा।
क्षात्वरं परयावाप्रधानीभूतप्रकृतधात्वर्थव्यापारानुद्देश्यत्वेन धात्वर्थाजन्यत्वेन च तदप्राप्तेः तदे
तत्फलितमाह पृष्टो गर्ग इत्यादि पृच्छतीत्यनुवर्त्यैव सिद्धे पृच्छतीति चिन्त्यप्रयोजनमिति हृदयं तादयः
पृच्छ्याङ्भ्यामिति द्विवचननिर्देशेन प्रत्येकमुपसर्गसंबंधरत्वात् पृच्छ्यवानुपहृत्यनिगां प्रतिशृणो
तीति प्रतिपूर्वस्याङ्पूर्वस्य श्रुधातुः प्रवर्त्तनापूर्वकाभ्युपगमो वर्त्तते न तत्र विप्रस्य कर्तृप्रयोजक
त्वेनेहेतुत्वे प्राप्ते वचनम् चतुर्थ्यर्थस्याश्रयत्वम् प्रवर्त्तनायाश्चेतज्जन्यत्वसंबंधेनाभ्युपगमे
न्वयः केचित्तु अभ्युपगम एव धात्वर्थस्तन्निष्ठव्यापारजन्यत्वसंबंधेन च विप्रस्य तत्रान्वयः
न तु हेतुत्वात्तत्करणत्वाद्वा तृतीयायां प्राप्तायां वचनमित्याहुः तत्फलितार्थमाह विप्रेणम
ह्यमिति अनुप्रति अनुगृणाति भ्यां गृणः तस्येति विग्रहः पद्यानुगृणातीति भिन्नं पदं पंचम्यंतं प्रत्य
भिवदनुकरणमित्यतिदेशेनाव्ययत्वात्सुब्लुक् गृणः इतिशब्दानानुकरणात्षष्ठी पूर्वसाहचर्या
दिहापि प्रत्येकमुपसर्गसंबंधरत्वात् प्रत्येनोदाहरति अनुगृणातीति शंसितुः शंसनविषयह
र्षानुकूलव्यापारलक्षणं प्रोत्साहनं अनुप्रतिगृणात्योरर्थः तत्र पूर्वो व्यापारः शंसनमेव गृह्यते
उपस्थितत्वात् शंसितुश्च प्रोत्साहनेकर्मतयान्वयः होतुश्च शंसितृत्वभेदान्वयः एवं च कर्मसा।

मानाधिकरण्यात्कर्मत्वे प्राप्त इदं वचनं तदेतत्फलितमाह होतारमृग्यमिति प्रोक्ताह यजतीति
डोयामेत्यादि शब्दैरिति शेषः परिक्रयणं संक्रयो धनादिना नात्यन्तकस्वीकरणं तस्य समीपय
तिराचष्टे तत्र नियतकालं ततो न्यूनत्वादित्याशयेनाह नियतेति भृतिर्वेतनं शतायेति करण
तृतीयासमानार्थेयं शतव्यापारस्त्वत्रैवानुरूप एवेति बोध्यं तादर्थ्येति तस्मै कार्याय देत
दर्थे करणं तस्य भावः तादर्थ्यं उपकार्योपकारकत्वरूपः संबंधः तत्र चतुर्थी सा च षष्ठीवद्विशेषण
देव प्रकृत्यर्थस्य प्रत्ययार्थे साक्षात्परंपरया वान्वयः मुक्तये हरिं भजतीत्यत्र स्थानिष्ठजन्यतानिरूपित
त्वरूपसाक्षात्संबंधेन ब्राह्मणाय दधीत्यादौ स्वकर्तृकभोजननिष्ठजन्यतानिरूपितत्वरूप
परंपरयेति बोध्यं स्वर्गाय यज्ञेनेमित्यादावप्येवमेव चतुर्थी बोध्या यत्र यज्ञेनादि शब्दाभावे तु
तृतीया न हेतुहेतुमद्भावस्य चतुर्थ्यैव बाधनात् हेतुतृतीयायाश्च विषयापवादतया विशे
षणोद्देश्यविधेयत्वमित्याहुः यदा तादर्थ्यस्य संबंधत्वेन भानं तदा षष्ठीति मत्र भाष्ये स्पष्टं क्लृपी।
ति क्लृपेः सप्तमीयं क्लृपीति चार्थग्रहणं व्याख्यानात् संपद्यमाने इति भूततद्भावरूपोत्पत्तिः तदय
मर्थः क्लृप्यर्थकधातुयोगे उत्पद्यमानेऽर्थे वर्तमानात्कर्तुश्चतुर्थीति इदं च प्रकृतिविकृति
भावश्च उपपदविभक्तित्वात्संबंधोर्थः तत्र चतुर्थ्यर्थः कारणत्वविवक्षायां तु ज्ञानात्मना परि
णमत इत्यादि प्रकृतिविकृत्योरभेदविवक्षायामनेन विकृतिवाचकाच्चतुर्थी अभेदविवक्षा
यां तु कर्तृत्वात्प्रथमैव परत्वात् भक्तिर्ज्ञानं कल्पत इत्यादीन्याहुः न चैवमभेदविवक्षायां त।

साचउपपद
विभक्तित्वा
द्धि पाठांतरं

353

प्रा॰ प्रो॰

दर्थे चतुर्थ्येवमिदं ज्ञाप्यर्थे संबंधसामान्येनान्वये साधकत्वार्थेन स्यावश्यकत्वात् इत्याहुः
कश्चित्तु अभेदविवक्षायामपि अनेन चतुर्थीत्याह तच्चिंत्यं यदा तु जनिकर्तुरित्यपादानविव
क्षा तदा पंचमी भवत्येतीनं कल्पते ज्ञानस्याभिहितकर्तृत्वात्ततः प्रथमैव उत्पत्तिश्च तदा तु पर
त्येः अत्रेदं तत्त्वं कल्पत इत्यादेः परिणमत इत्यर्थः परिणामश्च रूपांतरप्राप्तिः तदेकदेश रू
पांतरे ज्ञानादेर्विकारस्याभेदेनान्वयात् द्वितीयायां व्याख्यायामनेन चतुर्थी विधीयते एवं चा
त्र चरितार्थी प्रकृतिविकृत्योरभेदविवक्षायां भवत्यर्थककल्प्ययोगे परत्वात् प्रथमया बा
धा तेय वा सूत्रं भवतीत्यर्थः अत एव तत्र तयोरभेदान्वयः सुलभः एवं कल्प्यादीनामन्य
त्रिमात्रार्थत्वे जनिकर्तुरिति पंचम्या विकृतिवाचकात्परतास्य प्रथमैव ज्ञानात्मना परिणमा
त इत्यादौ तु आत्मशब्दस्य स्वरूपार्थत्वमिति धर्मपरः ज्ञानत्वेन परिणमत इत्यर्थः । एवं च तस्य विकृति
वाचकत्वाभावान्न चतुर्थी किं तु प्रकृत्यादित्वात्तृतीया ज्ञानत्वविशिष्टरूपांतरप्राप्तिर्भक्ति
कर्तृकेत्यर्थः वातायेति ज्ञाप्यमानत्वरूपसंबंधश्चतुर्थ्यर्थः प्राणिनां शुभाशुभस्य सूचकोभूतवि
कारत्वात् तेन ज्ञापितेर्थे वर्तमानाच्चतुर्थीत्यर्थः हितयोगे चेति संबंधोत्र चतुर्थ्यर्थः
तस्मै हितमिति निर्देशात् ज्ञापकात् सिद्धमेतदिति कैयटः यत्तु हरदत्तः चतुर्थी चाशिषीति स
त्र विहिताशीरर्थे चतुर्थी निर्वाहात् सिद्धमेतदिति तन्न तज्ज्ञापकमिति तत्र आशीरर्थे स्वत
न्त्रोनुपपादत्वात् आशीरर्थे योगे ह्याशीर्विषयस्य विधेयत्वं तदाश्रयस्योद्देश्यत्वं च प्रतीयते

नहिस्वत्वावृत्तेष्ठविधेयभावेनान्वयोव्युत्पत्तिसिद्धः एतेन चतुर्थीतदर्थयोर्निरूपितस्तत्त्वयोगे समा
मासविधानं तद्योगे चतुर्थीज्ञापकमिति ग्रन्थव्याख्याताः एवं तुमुन्योगेपि वाच्यमिति दिक्
क्रियार्थोपपदस्य क्रियाशब्दार्थः फलं यस्यास्तत्क्रियार्थं तेन स्ववाचकं लक्ष्यते तेन क्रियाफल
कार्थवाचकमुपपदमित्यर्थः क्रियाफलकाश्च धन्यात्स्वात्तुमुन्ण्वुलौ क्रियायामिति सू
त्रमहिम्नाच क्रियारूपएव गृह्यते स्थानिशब्दश्चाप्रयुज्यमानत्वरूपार्थे वैयाकरणनिका
यप्रसिद्धः क्रियार्थक्रियोपपदत्वं च तुमुन्ण्वुलोरेव संगच्छते नार्थेत्तु तयोरेवान्यपदार्थ
त्वं नदाह [redacted] क्रियार्थेति तुमुन्इति ण्वुलापुष्पेभ्यः फलेभ्यो यातीत्यस्य फलान्या
हारकत्वस्यापि विवरणसंभवात् कर्मणीति तथा च तुमुन् प्रकृत्यर्थे फलाश्रयत्वं तदर्थ
र्थः द्वितीयापवादश्चायमिति भावः ननु पदजन्यपदार्थोपस्थितेः शाब्दबोधांगत्वात्फ
लेभ्यो यातीत्यादौ चतुर्थ्यर्थान्वययोग्यस्याहरणस्य तत्त्वोपस्थितेरभावात्कथं बोधः न
चाहर्तुं पदाध्याहारेण बोधः अध्याहारश्चानुमानमुपनीभानं वेत्यपक्षयोस्त्वेव प्रयोगशब्द गौ
स्याहरणार्थत्वादिति वाच्यं स्पष्टे हि दीक्षितनत्यादेशिवयुष्मद्युपपदे इत्यस्याप्युच्चारितप
देऽध्याहृतपदे च प्रवृत्तिप्रसक्तौ स्थानिन्यपीत्यस्य वैयर्थ्यापत्तेः तस्मात्स्थानिपदे मज्ञा
यमानार्थकं एवं च पदाध्याहारेऽप्यर्थमात्राध्याहारे मध्यमार्थे तत्सार्थकत्वम्
अन्यथा निमित्तकनयात्रनस्याद्दिति चेतन स्थानिग्रहणसामर्थ्यादेव पदजन्यो।

३५४

धा॰ धु॰

पस्थित्यभावेऽपि शाब्दबोधविषयत्वांगीकारात् तस्य चेदमनुगुणं तत्रैकोक्तत्वमेवस्य हेरी
क्षितत्वस्यादौ तु पदाध्याहार एव अर्थाध्याहारः पदाध्याहारयोरत्र लक्षणानुरोधेन स्व +
स्या एवं च फलेभ्यो यातीत्यादौ फलकर्मकाहरणफलकेयानमिति बोधः यत्तु फलशाब्द
स्य फलकर्मकाहरणलक्षणा च तुमर्थस्य फले यद्वा क्रियामात्रं च तुमर्थार्थः कर्मत्वेऽन्वयो
ज्ञकत्वे पूर्वयोः संसर्गे विति तन्न तत्र कर्मणीत्यस्योक्तत्वेन दृशार्थे साधुत्वे मानाभावा
त् फलान्याहारको यातीत्यर्थेऽन्वयदुरुक्तत्वप्रकारासंभवाच्च फलकर्मणीत्यस्योक्तत्वेन
नेदृशार्थे स्य कर्मविधावाहरणकर्तृकं कर्तृकं तद्दूरदेशकं च यानमिति तत्र बोधः उपपाद
यिष्यते चेदं कुटं तेन तु नादर्थोऽन्वयश्चेदं सिद्धं ब्राह्मणाय ददातीत्यादौ तु स्य कर्तृकभोजन
निष्ठजन्यतानिरूपकसंसर्गेण प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वय एव तु अत्रापि स्य कर्मका
हरणनिष्ठजन्यतानिरूपकत्वसंबंधेनान्वयस्य वक्तुं शक्यत्वात् न चाप्रयुज्यमान।
स्यैव यथास्यात् न प्रयुज्यमानस्येति नियमार्थमिदमिति वाच्यं उपपदविभक्तेः कारक
विभक्तिर्बलीयसीति न्यायादेतदंगत्वाव्याहरणक्रियानिरूपितकर्मत्वमादाय तत्र
द्वितीयाया एव प्राप्तेरिति चेन्न कर्मकत्वप्रकारकबोधे साधुत्वार्थमेतस्यावश्यकत्वा
त् ध्वनितं चेदं पदमंजर्यां नमस्कुर्मो नृसिंहायेति न च नमः स्वस्तीत्यनेनैवात्र सिद्धिः
उपपदविभक्तेरिति वक्ष्यमाणन्यायेन द्वितीयाप्राप्तेरिति द्विक क्रियार्थोपपदस्येति किम्

प्रविशपिण्डीम् अत्र प्रयुज्यमानभक्षणक्रियाकर्मणोपि पिण्ड्यां चतुर्थ्यापत्तेः यद्यपि श्वे
षु न क्रियाभक्षणार्थाभवमिति तथापि परिभाषकमनुपपदत्वं नास्तीति बोध्यं तुमर्थाच्च
तुमन्ताद्भूतन्तु मर्थो लक्ष्यते सम्मर्थो यस्येत्यर्थः तुमुनो भाव एव विधानेन तदर्थकस्य भा
वार्थकत्वाव्यभिचारात् भाववचनाच्चेत्यनेन सूत्रविशेषपरिग्रहार्थमित्याह इति सू
त्रेणेति भावे ये प्रत्यया वक्ष्यन्ते ते क्रियार्थायां क्रियायामुपपदे भविष्यति स्युरिति तदर्थः
न च तादर्थ्ये चतुर्थ्येदं सिद्धं भाववचनग्रहणादेनैव तादर्थ्यस्योक्तत्वेन तदप्राप्तेस्तेषां तु
च मुन एवार्थतया तुमुन्समानार्थत्वात् एवं च प्रातिपदिकार्थमात्रे प्रथमायां प्राप्तायामिदं
वचनम् द्वितीयोविधानाय विधानुमित्युक्ते ऽन्यत्र विधानायेति तादर्थ्ये चतुर्थी विधानार्थे।
यद्विधानं तदर्थमित्युक्तम इत्यर्थः एतेन विधानुमिति तुमन्नैव तादर्थ्यस्योक्तत्वेन कथं चतु।
र्थीत्यपास्तं उत्तरक्रियायोगस्तस्य योगेनापि पूर्वक्रियायोगस्तद्योगेन नानुपपत्याहुः यागायेति भवि
ष्यद्यागफलकं यानमिति बोधः उपपदविभक्तेरिति धात्वर्थस्य प्रधानत्वेन नामार्थस्य चा
प्रधानत्वेन प्रधानाप्रधानयोश्च प्रधाननिमित्तकार्यस्यैवोचित्यादिति भावः नमस्करोति देवा
निति उक्तं हि निषेधः स्वनिष्ठापकर्षत्वबोधानुकूलव्यापाररूपनमस्कारफलस्याता
दृशबोधस्याश्रयत्वेन पादेवानां कर्मत्वं बोध्यं स्वविषयापकर्षनिरूपितावधित्वसमाना
धिकरणसमवायस्य फलतावच्छेदकसंबंधत्वान्न प्रतिज्ञादेः कर्मकत्वं श्रयस्य च साक्षात्

शा॰शो॰ भूत्तिषु पाठेन निपातत्वाद्द्योतकत्वं बोध्यं अत एव नमस्त्वं हरये नमः इत्यादौ तु स्वरादिपठितः अ
त एव कर्मत्वाविवक्षायां नमस्करोति देवानित्यस्य सिद्धिः एतेनैकस्यैवोपपदविभक्तित्वेका
रकविभक्तित्वे चायं न्यायः इति स्वरादिपठितनमःशब्दयोगे एव चतुर्थीति च मंदोक्तम् अपास्तं किंच एकस्या एवोभयोगी। कारे२
नमस्यति देवानित्यत्र परिभाषोपन्यासपरभाष्यविरोधात् सहयुक्ते इत्यादिसूत्रस्थभाष्य
विरोधाच्च विनिगमकाभावाच्च निपातशब्देऽपि चतुर्थीप्रवृत्तिरित्यधिकं तु वर्ध्यवादे द्रष्टव्यं
पर्याप्त्यर्थेति पर्याप्तिः सामर्थ्यमलमित्यर्थग्रहणं व्याख्येयमिति भावः भूषणवारणनि
षेधार्थकस्य क्रियासमभिव्याहारावश्यकत्वेन तत्र क्रियानिमित्तकारकविभक्तिभिर्बाधात् पर्या
प्त्यर्थे इति न्यायसिद्धमिति हरटन्नादयः वस्तुतः कारकस्य शेषत्वाविवक्षायां तत्र चतुर्थी वा
ता रणार्थे व्याख्यानादेव पर्याप्त्यर्थग्रहणमूलनिवेदं भाष्येऽर्थे परतया व्याख्याने बीजमाह
तस्मै इति आशीर्विवक्षायामिति स्वस्त्यर्थस्याशीर्विषयत्वविवक्षायामित्यर्थः स्वस्त्यर्थः
कुशलं मंगलं वा परामर्षीति स्वस्तियोगे चतुर्थ्या अवकाशः स्वस्तिरात्मना यास्तीति तत्त्व
कथनं कुशलार्थैराशिषीत्यस्यावकाशः स्वस्तिभिन्नाः कुशलार्थाः चतुर्थ्येवेति स्वस्तिशब्दा
र्थान्वय इति शेषः मन्यकर्मणि तिरस्कार इति अनादरशब्देन नादराभावमात्रम् अपि तु त
जघधमादिवत्त्वनिपातवाचित्वात्तिरस्कारार्थत्वमिति भावः नत्वानादर इति मन्यकर्मविशेष।
णं अनादरद्योतकं मन्यकर्मेत्यर्थः तेन युष्मच्छब्दाच्चतुर्थी न अनादरश्च हि धा उत्कृष्टस्यापक

ष्टस्योपमानात्तुल्यार्थादियोगेनापकृष्टनिरूपितोपमेयत्वाभावस्योपमेयेनिकृष्टत्वबोधनाय प्रतिपा
दनाद्वा आद्येत्वत्तृणमिवमन्ये इत्यर्थः अंत्येत्वत्तृणंतुल्यमपिनमन्ये इत्यर्थः नत्वत्रकुत्सन इति वक्तव्ये अ
तिशायितानादरप्रतिपत्त्यर्थोनादरग्रहणेनोत्वेवास्यप्रवृत्तिः ध्वनितं चेदं प्रकृष्टकुत्सन
ग्रहणं कर्त्तव्यमित्यादिना भाष्ये यद्वानिश्चतुर्थीननोपि यदि कुत्सानन्तु साम्यमात्रं तदा चतुर्थी
तिनदर्थः एवं च तृणायमत्वा रघुनंदनोपि वाणेन रक्षः प्रधनान्निरास्थदित्यादिप्रयोगाश्चिंत्याए
वमन्यस्य प्राहारो वा नध्वनयनुदाहरंति नत्वांतृणमिति द्वितीयासमानार्था चतुर्थी श्यने
तिपका निर्देशस्तु नशुनमिति इत्यधिकारात् सकलधातुसंग्रहार्थस्त्वेदिमनः कर्मणीत्य
ववदेदितिभावः श्वनपिदेवादिवोपलक्षणं तेन न त्वां तृणाय मन्ये इत्यादि सिद्धमित्याहुः
अपनीयेति स्पष्टं चेदं भाष्ये नौकाकेति ननु भाष्ये नावादिष्विति वक्ष्यामि न त्वां नावं मन्य इ
त्युदाहृत्यात्र येष्वप्राणिष्विति न्यते तेनावादयो भविष्यंतीत्युक्तं ननु परिगणने कथमेतदुच्या
ते यदि तदुदाहरणप्रामाण्येनोदाहृता एव नावादयः तर्हि शृगालोक्तिरसंगता नाहि तदुदाहृ
रणं भाष्ये दत्तमिति चेन्न भाष्ये येष्विति बहुवचनेन वृत्त्यादिप्रामाण्येन च एषां वा निर्दिष्टेनेणो
यादित्याहुः गत्यर्थकर्मणि ग्रामं ग्रामाय पतति फलाश्रयस्य तदर्थोर्थः गत्यर्थेति किम् ओदनं पच
तिकर्मणीति किम् अश्वेन गच्छति चेष्टायां किमिति धात्वर्थस्य क्रियारूपत्वात्प्रश्नः शारीर
परिस्पंदरूपक्रियार्थस्यैव ग्रहणमित्युत्तरम् पंथानमिति अनध्वनीत्यत्राध्वशब्दोर्थपरः

श्वा॰ प्रो॰ कर्मणीत्यनेन सामानाधिकरण्यानुरोधार्थस्यैव तन्त्रत्वाविधेरिति भावः एतदभिप्रायेणैवाध्वन्य
र्थग्रहणमिति वार्त्तिकं अधिष्ठितवति शब्दप्रयोगसमकालिकगन्तव्यापादजन्यफलाश्रय
उत्पथास्थिते इत्यर्थः आक्रमितुमिष्यत इति तन्वाक्रान्त इत्यर्थः उत्पथेनेति करणे तृतीया आस्थितप्र भावप्रधान
तं संतन्यत्यर्थे तिषेध इति वार्त्तिके नायमर्थो बोधितः आस्थितं गन्त्राधिष्ठित इत्यर्थः अत्रायमाशयः अध्वप
देन गन्त्राधिष्ठितः संप्राप्तो य उपलक्ष्यते तद्धि तत्रचार्यं विधिः तेन प्रागुदाहृते गन्ता संबद्धः स्त्रिया
वा अन्नायां स्त्रियं गच्छत्यजां नयतीत्यादौ न चतुर्थी ध्वनितेति तेनेदं भाष्ये सूत्रगत्यर्थकर्मणि।
चतुर्थी वा इति मन्यते कर्मणेनादरे इत्युत्तरं गत्यर्थानां चेष्टायामनध्वनीति वाकृतान इतिन
मित्तिचिन्त्यम् यत्तु चतुर्थीवत्साप्रसिद्धे द्वितीयाग्रहणमपवादविषयेऽपि द्वितीयार्थं तेन ग्रा
मं गतेति कृद्योगे षष्ठी नेति वक्तुं तत्रागम्यादेः स्यात्स्योपसर्जनकसंदर्शनप्रार्थनादिपर
त्वायोधनचर्यस्य कृत्रिमकर्मतया संप्रदानत्वेन चतुर्थी गतिमात्रपरत्वे द्वितीयायाः सिद्धि
मास्त्रिव्यपरव्याख्यानपरभाष्यविरोधात् अतिप्रसंगस्तु नमिधाने नैव वारणीयः एवं क्रियाग्र
हणं कर्त्तव्यमिति संप्रदानसूत्रस्य वार्त्तिकमपि प्रत्याख्यानं न च प्रत्याख्यानारंभयोः समफलत्वे माना
भावः आरंभेणानयोगस्य प्रत्याख्यानं समभवेदिति द्विरितिग्रयस्यैव मानत्वात् अर्थकृतविशेषस्तु
न दोषावहः शाब्दशास्त्रे शब्दकृतविशेषस्यैव मुख्यत्वात् एवं च सूत्रभाष्ययोः समफलत्वाच्च प्र
कत्वे भाष्यनयेऽपि ष्टाभावे उपायाभावेन सूत्रमते षष्ठीस्वीकारस्यैवोचितत्वं स्पष्टं चेदं संप्रदान

संज्ञासूत्रे केयं घटं हरदत्तं कौस्तुभादौ संदर्शनादिपरत्वे देवदत्तादेः कर्तृत्वं तु संदर्शनाद्याश्रयत्वेनैव
वाच्यं न च संदर्शनादिपरत्वेऽपि ग्रामस्योत्तरदेशसंयोगरूपफलाश्रयत्वसत्त्वात् परत्वात्कर्मसंज्ञाप
त्तिः न च तस्य धात्वर्थे प्रधानसंदर्शनजन्यत्वाभावान्न तदाश्रयस्य कर्मत्वम् तत्र योज्यत्वसत्त्वेनातिने
शिति वाच्यम् वस्तुगत्या फलाश्रयत्वेऽपि तत्त्वेन तस्याविवक्षणाद् दृष्टत्वेनैव च विवक्षणाददोषः
न च घटं करोतीत्यादावप्येवं विवक्षायां चतुर्थ्यापत्तिः लक्ष्यानुरोधेनैव विवक्षायाः सत्त्वेनादोषात्
तदुक्तं हरिणा भेदाभेदविवक्षा च स्वभावेन व्यवस्थिता इत्यलं विस्तरेण इति चतुर्थी ध्रुवमपायेऽपा
गति स्थैर्ययोरित्यतः कुटादेः पचाद्यच् ध्रुव स्थैर्ये इति पाठे इगुपधत्वात्कः ध्रुवं स्थिरं अपायो।
विश्लेषः विभागः स च न वास्तवसंबंधपूर्वक एव किं तु बुद्धिपरिकल्पितसंबंधपूर्वकोऽपि एव
मभावोऽपि बोध्यः तज्जनकोगतिविशेषोऽप्यत्रापायशब्देनोच्यते गतिर्विनात्ववधिना नापा
य इति कथ्यत इति हरिस्वरसात् एवं गतेरप्यपायशब्दवाच्यतोक्तेः अवध्यन्वययोग्यविभाग
जनकत्वं विना सामान्यापायशब्दवाच्यत्वेति तदर्थः विभागस्य बुद्धिकल्पितसंबंधपूर्वकस्यापि ग्रह+
णात् तु वेति अत एव वृक्षाद् गुरुस्मादि पूर्वक विश्लेषजनक निवृत्तिलक्षकता मात्रित्यनुगुणाविरामस्या
दिप्रत्याख्यानभाष्योक्तं यतश्च निर्धारणमिति सूत्रप्रयोगः यतो यतो विरज्येतेत्यादिप्रयोगश्च सं
गच्छते अपाये इति चावर्तते तत्रैकस्य विश्लेषोऽर्थः अपरस्य तज्जनकोगतिविशेषः एवं च द्वा
तियोगतया विश्लेषवैशिष्ट्यसत्ति यदपायध्रुवं गतिरूपापायानाश्रयः व्यापारतावच्छेदकसं
बंधेन प्रकृतधात्वाच्यक्रियारहितं तदपादानमित्यर्थः कर्तृव्यावृत्तये विशेष्यदलं परमाकर्त्रे

प्रा॰ प्रो॰

संशावायेनतदनुवादरूपंतत् एवंचव्यापारतावच्छेदकसंबंधेनतत्रविभागजनकचलनतथात्वपात्र
तत्क्रियानाश्रयत्वेसतिप्रतियोगितासंबंधेनतदुत्पात्रविशेषणाश्रयइतिफलितम् कर्तृत्वावारणाय
सत्यंतं धावतोश्वात्पततिकुड्यात्पाततोश्वात्पतत्यादिसंग्रहायप्रकृतेतिपरस्परस्मात्मेषावपस
रत इत्यादिसंग्रहायतत्तविभागजनकतततत्क्रियेत्यर्थकंविशेषणदलेक्रियापदंतदुक्तंअपाये
यदुदासीनंचलंवायदिवाचलंध्रुवमेवातदावेशात्तदपादानमुच्यते ततोध्रुवएवाश्रयस्मात्पा
तत्यसौ तस्याध्यश्वस्यपतनेकुड्यादिध्रुवमिष्यतेमेषांतरक्रियापेक्षमवधित्वंपृथक्पृथक्
मेषयोः स्वक्रियापेक्षंकर्तृत्वंचपृथक्पृथक्इति अतदावेशात्धात्वर्थपात्रगत्यनावेशादित्यर्थः
तदावेशादितिपाठेतदनमात्रावेशात्इत्यर्थः धात्वर्थपात्रविभागस्यैवावेशोनततदुपात्तक्रिया
याइतिभावः पृथक्पृथगितिश्रपसरतइति स्थलेतुनागानिद्वयस्याप्युपादानात् एकनि
ष्ठांगतिंप्रतिइतरस्यापादानत्वमविरुद्धमितिभावः परेतुपटोपात्रयोरेवक्रियाश्रयत्वम् पटस्वरूपा र
दोपात्रयोर्विभागाश्रयत्वमेवेतिपतत्पटोपात्रस्यावधित्वंतस्यनकदापिक्रियाश्रयत्वम् अतएवदेवद
त्तश्चात्मानंहंतीत्यादौश्वात्मपटोपात्रस्यकर्मत्वंस्थलेतुनाऽपायद्वयस्यापिनिवृत्तभेदस्यैवोपा
दानात् विभागजनककक्रियाश्रयत्वस्यैवप्रतीत्यातत्त्वेनाप्रतीत्याचास्याएवगतेरुचितत्वा
त् श्वात्मानमात्मनेत्यादौशब्दकृतभेदस्याभावात् अंतःकरणाद्युपाधिकृतभेदोपादानंभग
वताकृतं इतरोपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाग्रहणमानानां नत्वत्राश्वस्याप्य
श्रयणाच्च शब्दालिंगितार्थेनातस्यैवाश्वस्यात्मनेत्याच्चेत्याहुः निवर्ततेततइत्यादौप्रवृत्त

भावरूपस्य धात्वर्थस्य स्वप्रतियोगिविषयतासंबंधेनानिरूपितत्वविशेषणत्वे विषयतयाविधेयस्य
त्वान्नत्रातिव्याप्तिवारणाय संबंधविशेषणनिवेशः नत्र चाश्रयताया एव समवायस्यैव वा व्यापार
तावच्छेदकसंबंधत्वान्न दोषः उदासीनेतिव्याप्तिवारणाय विशेष्यदलम् घटं पटादिविभज्य
ते देवदत्ते इत्यत्र घटे तदभावाय प्रतियोगित्वसंबंधेति प्रकृते तत्त्वं च न शब्दोपात्तत्वं किंतु विव
क्षितत्वमात्रं अत एव धनुषा विध्यतीत्यत्रापादानसंज्ञां बाधित्वा करणसंज्ञेति भाष्यसंग
च्छते शरनिःसरणं प्रत्यवधिभावोपगमेनैव व्यधने करणताभ्युपगमे नोभयोरपि बुधा
रोहादिति ध्येयं सं चार्थादवधिरेव तदाह साध्यध्रुवं अवधिभूतमिति साधेरित्यनेन न वि
श्लेषादेर्धात्वर्थत्वं सूचयति अवधित्वं च पूर्वोक्तविश्लेषाश्रयत्वसमानाधिकरणं पदार्थो
तरमित्यत्र पदेतत् वृक्षात्भूमिं पततीत्यत्र भूमिनिष्ठसंयोगपर्णनिष्ठविश्लेषोभयानुकू
लो व्यापारः पतत्यर्थः एवमायातीत्यादावपि न त्र विश्लेषस्य धात्वनुपलभ्यत्वादवधिः पंचम्यर्थः
वृक्षाद्विभजते इत्यादौ तस्यैव विभजत्यर्थतायाः सकलसंमतत्वाच्च न च वृक्षस्य विश्लेषाश्र
यत्वेन कर्मत्वापत्तिः फलतावच्छेदकसंबंधेन तस्य तदाश्रयत्वाभावात् कर्त्रनिष्ठविभा
गीयअनुयोगितासंबंधस्यैव तत्वात् वृक्षं त्यजतीत्यादौ तु व्यापारव्यधिकरणविभागस्यैव
धात्वर्थत्वेन भवत्येव कर्मत्वं एवं च कर्मत्वेनापादानत्वस्य बाधान्न वृक्षात्त्यजतीत्यस्यापत्तिः
अत एवाभिप्रेते राश्रयो वधिरुद्देश्य इत्यादिनावधेरेव पंचम्यर्थत्वमुक्तं न विभागादेः अत एव

जनकत्वसंबंधेनेतिवेति

शा॰ श्री॰ वध्रुवग्रहणं चरितार्थम् अवध्युपलक्षणार्थत्वात् नहि वृक्षस्य संबंधसामान्येन पतनक्रि
यान्वये ऽपादानत्वमाकांक्ष्यं तदभावेपि अपाये विश्लेषे कारके तद्रूपक्रियायामन्वयप्रपादा
नमित्यर्थः स्यात् स्पष्टं चेदमत्र भाष्येन च ध्रुवग्रहणाभावे कर्तुः पर्णस्याप्यपादानपत्तिः
तस्य तदनुकूले व्यापारेन्वयेपि विभागान्वयाभावात् पतनत्वात्कर्तृत्वे संज्ञयाबाधाच्च तस्माद्ध्रुव
ग्रहणमवधित्वप्रकारकशाब्दबोधे पंचम्याः साधुत्वार्थमिति तत्त्वम् एवं च पंचम्यर्थोवधाव
भेदेन प्रकृत्यर्थो विशेषणं प्रत्ययार्थस्तु प्रतियोगितया क्रियायामेवं च वृक्षादवधिकवि
भागानुकूलो भूमिनिष्ठसंयोगानुकूलो व्यापारः पर्णवृत्तिरिति बोधः न चैवमपि विभागा
नुकूलस्य धात्वर्थत्वे वृक्षात्स्पंदते इति स्यादिति वाच्यं आसनात् चलित इतिवदिष्टाप
त्तेः अत एव स्पंदेः क्रियामात्रार्थत्वे वृक्षात्स्पंदत इत्येव भवति सार्थाद्धीयते इत्यत्र सार्था
द्धीन इत्यत्र च धात्वुपात्तव्यापाराश्रयत्वं सार्थस्यास्ति उत्तेन नाद्यः अपादानमुत्तराणीति शंक्यं।
व्यापत्तेः नान्त्यः देवदत्तस्य कर्तृत्वापत्तौ तत्र कर्मणि यगाद्यनापत्तेः वृक्षेत्यजतीत्यादौ वृक्षादीना
मिव सार्थस्य कर्मतापत्तौ सार्थाद्धीयते देवदत्तेन त्यस्यापत्तिश्चेति चेदत्राहुः सार्थस्य व्यापारा
श्रयत्वेन कर्तृत्वे प्राप्तेपि अपादानेचाहीयरुहादिरिति सूत्रेपादानत्वस्य ज्ञापितत्वान्न दोषः न
त्त्वकर्मप्रत्ययांतहीधातुविषयकमेव हीयतेति निर्देशात् अत एवादेवदत्तः सार्थं जहातिदेवदत्तं
सार्थो जहातीत्यादौ च न स्वर्गाद्धीयते इत्यत्रापि स्वर्गस्य धात्वुपात्तव्यापाराश्रयत्वं बोध्यं कर्म

संज्ञायां च कर्तृपदं धातूपात्तव्यापाराश्रयेत्याह लौकिकमिति देवदत्तस्य कर्मत्वं बोध्यं सं
प्रदानसंज्ञासूत्रे कैयटस्वरसोप्येवमेव केचित्तु कर्मकर्तरि लकारः अपगमनानुकूलने
त्यर्थः स्तुदुपघातादिना स्वयमेवापगमनेन च कर्मकर्तृत्वमित्याहुः धावतश्चेति इहाश्वक्रिया
विशिष्टस्याश्वस्यापायकृत्वं धातूपात्तगत्यनाविष्टत्वेन न तु तदपादानत्वं बोध्यं जुगुप्सावि
रामेति जुगुप्सादीनां पश्चाद्विषयकत्वेन विवक्षातस्तदपादानम् + न स्यैव विषयस्यक्रि।
यालनकत्वरूपकारकत्वेनाविवक्षायां संबन्धित्वेन च विवक्षायां पापस्य जुगुप्सत इति षष्ठी
भवत्येव एवमुत्तरसूत्रेपि बोध्यं नन्वेवमपां धातूनामिति चेत्तिः + यद्यप्येषां धातूनां स्वार्थे इ
ष्टविश्लेषजनकनिवृत्तिलक्षणायां सत्त्वेनैवापादानत्वं सिद्धं एवमुपाध्यायादधीत इत्यत्रा
पि निःसरणपूर्वकं ग्रहणमर्थः निःसरणं गृहान्निर्गत्यर्थो न ज्ञापनं इत्यत्रापि तन्नो
पि कामतीति लोकप्रसिद्ध्याश्रयोपायः लोके हि यद्यस्माज्ज्ञापते तत्तो निर्गच्छतीत्युच्या
ते प्रभवनेरपि भवनपूर्वकं निःसरणमर्थः इति ध्रुवमपाये इत्येव सिद्धेः सूत्रजालमपि व्यर्थां।
नव्याप्तिमुक्त्वार्थे प्राप्तषष्ठीबाधनद्वारा पंचमीबाधनार्थमिदमिति सूत्रवार्त्तिकहृदयं केचि
त्तु नार्थे ज्ञार्थे व्यवधित्वाविवक्षायां षष्ठीबाधनार्थं चेदमिति सूत्रवार्त्तिकहृदयं मनभिधान
श्रमान्त्रेण प्रत्याख्यानं तु न चमत्कारकमिति स्पष्टं सनविधायकसूत्रस्थभाष्ये तत्र हि रयेना
नावदगतिका गतिर्येहुच्यते तेनभिधानदिति स्पष्टमित्याहुः भीत्रार्थयंभी त्राणं च त्रास्तदा

मितिचेत्तत्र भाष्ये
प्रत्याख्यानमेवं
ष्टापत्तेः पाठोपि
समाधानं

श्रा॰ शे॰

हृभयार्थानामिति हेतुः एवमग्रेर्थः हेतुत्वमीयापवादोयं अरस्ये इति न चात्र परत्वादधिकरणत्वं
भविष्यतीति वाच्यं न्यायसिद्धबाध्यबाधकभावस्यैवानुवादेनादोषादिति संप्रदायः एवमग्रेपि
बोध्यं कदाचन अधिकरणत्वाद्यविवक्षायां व्याख्यार्थं तत्सत्त्वात् एवं च तदा नटस्य शृणोतीति
वत्सच्छोवेत्याहुः एतेन कस्य विभक्तिर्देवाश्च ज्ञातरोपस्य युग इति शामायणव्याख्यातं क्रियाज
न कत्वेन विवक्षणात्संबन्धित्वेन विवक्षणाद्वा नदोषकस्यस युग इत्यन्वयो वा पराजेः सोढ
इति फलाश्रयोपलक्षणं तद्भिन्नस्येत्यर्थः एवं च पराजेः कर्मकत्वे उदाहरणत्वं तध्यनयन्नाह ग्लायती
त्यर्थे इति तत्र चाध्ययनस्य संबंध सामान्येन्वयः शत्रूनिति अत्र तिरस्कारानुकूलो व्यापारो धा
त्वर्थस्तदाहाभिभवतीत्यर्थे इति यद्यप्यत्र परत्वात्कर्मसंज्ञा प्राप्नोति तथापि तत्त्वाविवक्षाया
मपूर्वत्वर्थेस्मिन्निति बोध्यं फलाश्रयाभिन्नत्वे इत्यर्थात् एवं च शत्रून्पराभवते ग्रामे इत्यादौ ग्राम
स्याधिकरणत्वापायामिदं प्रवर्तते वारणार्थानामीप्सित इति विधान इति भक्षणसंयोगादि जनकव्यापारा
भावानुकूलो व्यापार इत्यर्थः ईप्सित इति वारणार्थे धात्वर्थतावच्छेदकफलाश्रयत्वेन काववि
षय इत्यर्थः उदाहरणे च धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वेन गवं ईप्सितत्वाद्यवानाम
पादानत्वं ईप्सित इत्यनेन कर्तृमात्रस्यावेपादिति भावः स्पष्टं चेदं यष्ट्येवास्यान्यत्रापभ्रूपतई
प्सा एवं रूपेपीति भाष्यव्याख्यानेके यदे कर्तुरीप्सिततममित्यत्र तत्र मग्रहणसामर्थ्यात् प्रक्व
तधात्वर्थप्रधानीभूतव्यापारं प्रयोज्यफलाश्रयस्य ग्रहणमिति तदाशयः हेतेन्द्र इति न च पर

असोढो ग्लानिविषयः असहनं ग्लानिः

स्यात् तद्रूपवत्त्वं च परस्परस्व
नैकदर्शनाभावमिच्छति त
द्यादानमित्यर्थे स्यात्त्वति
तमाह पाठोन्तर

त्वादधिकरणसंज्ञाबाधिकाभविष्यति अधिकरणत्वाविवक्षायां तद्वारणार्थं तस्यावश्यकत्वा
त् अंतर्द्धौ अंतर्धिरन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशगमनरूपो व्यापा
रविशेषस्तदाह व्यवधाने सतीति न च येनेत्यत्र कर्तृकर्मणोरिति षष्ठीप्रसंगः कर्मपदाध्या
हारेणामयशब्दावित्तिनियमेनादोषात् तत एव निर्देशादनित्यमिदमित्यन्ये अनित्यत्वात्
अत्र चेदमेव ज्ञापकमित्याहुः प्रत्यासत्तिन्यायलभ्यार्थमाह आत्मन इति मातुर्निलीयते
इत्यादौ आत्मोपलम्भकाभावाय मातुर्निलीयते कृष्णमित्यादावपि अत्रकृत्यर्थमादाय
पंचमी भवत्येवेति वाच्यं पंचम्यर्थो वृत्तित्वं धात्वर्थैकदेशादर्शने निलीनचोरान्निलीते चोरकर्मकद
र्शनेच्छाभाव इति शाब्दबोधः स च चोरकर्तृकस्वकर्मकदर्शनाभावायेति शाब्दः इच्छामा
त्रस्यात्मोपलम्भत्व इव विशिष्टस्यात्मोपलम्भत्वेपि स्यादिति भावः अंतर्द्धाविति विशेषणेन तु अ
कृते तदभावान्न दोषः ननु येनादर्शनमित्युक्तेः प्रत्यासत्यात् तत्तद्धात्वर्थदर्शनव्यापारान्वयि
त्वेव पंचमी चोराद्धि तदर्थकलान्वयिनो व्यापारान्वयिन इति व्यर्थमंतर्द्धाविति चेदत्राहुः
अंतर्भाविततण्यर्थोत्र दृशिः चोरान्न दिदर्शयिषतीत्यर्थः न चैवमपि परत्वात्कर्मसंज्ञैव स्या
दिति वाच्यम् तदविवक्षायां व्यापारत्वपर्यत्वात् नन्वेतदंतर्द्धावित्येवास्तु किं येनेत्यादिना अंतर्द्धौ
येकस्य कारकमपादानमिति सूत्रार्थ इति चेन्न अधिकरणादेरपि तत्त्वाविवक्षायामपादान
त्वापत्तेः न चैवमपि येनेति व्यर्थं तथा सति अंतर्द्धौ सति स्वकर्मकदर्शनाभावं य इच्छति सोपा

१।४।२७ दानमित्यर्थेकर्तुरेव स्यात् न च परत्वात्कर्तृत्वमस्त्वत्र स्याच्चरितार्थत्वात् प्रकृतिग्रहणं किमिति
यस्माच्चिन्त्रिव्यापारजन्यस्वकर्मकदर्शनाभावानुकूलदेशविशेषस्थितिरूपां तर्धि घटको
पलब्धेर्तकस्यदर्शनस्याभावः सोपादानमिति सूत्रार्थ इति भावः सत्यपीति अदर्शने कयान
१।४।२८ दनुतदनुकूलव्यापारकरणेदेवदर्शने सत्यपीत्यर्थः अन्यथा हि यत्र दर्शनाभाव एव तत्रैव स्या
दितिभावः नियमेति उपयोगशब्दस्य तत्रैव वृत्तेरितिभावः नियमो ब्रह्मचर्यादिः नटस्येति न
टसंबंधिश्रवणमिति वोधान्वाकारकत्वेन प्रसंगः नियमपूर्वकविद्यावक्तृत्वाभावात्तेस्तूत्तरम् जनि
निवर्त्तः जननं जनिः रुत्पत्तिर्जनिरुत्पत्तिरुद्भवः इत्यमरः जनिघसिभ्यामिण् इञ् जनादि भवः इति
इत्थं जनिवधोश्चेतिवृद्धिप्रतिषेधः तस्याः कर्त्ता तिशब्दः षष्ठीसमासः तेन तदर्थकयोगेपि
भवति शृंगाद्गगात्संभवतीति पद्यातदाह जायमानस्येति पत्ने नेकानिर्देश उपधालोपप्रसंग।
गोजन्धान्तूत्पन्नत्वनुकूलव्यापाराश्रयत्वत्वपर्य्यवस्थाया संगतिः समासासंगतिश्चेति परास्तं हेत्तुरि।
ति उपादानकारणमित्यर्थः प्रकृतिशब्दस्य तत्रैव प्रसिद्धेः शशृंग प्रत्याख्यान परभाष्यादिसम
तत्वाच्च अतएव ब्रह्मणो जगदुपादानत्वे यतो वा इमानि भूतानि जायन्त इति पंचमीमुपष्टंभिका
माहुः पुत्रात्प्रमोद इत्यादौ उपादानत्वारोपेण विभाषेति योगविभागाद्वा पंचमीत्याहुः एतेन
प्रकृतिग्रहणं हेतुमात्रपरं पुत्रात्प्रमोदो जायत इत्यस्य प्युदाहरणमिति वृत्तिः पराम्रस्ता किंच
कारकांत्याधिकृतस्य कारणस्य सामान्यवाचिनो निर्धारणसप्तम्यंतस्यान्वयासंभवीन

कारकाणां मध्ये उपादानकारणमितिवत्कारणानां मध्ये कारणमिति संभवति ब्रह्मणश्श्रुति
द्धेह मायाशबलम् नहि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः विभाषेत्येव सिद्धे इदमुपादानत्व
प्रकारकबोधार्थं कारकपूर्वपदप्रकृतिस्वरार्थं चेत्याहुः विभाषेति योगविभागेन मानं पुत्रात्प्र
मोद इत्यादौ जायत इत्यध्याहारेण निर्वाहेत्येव गतिः एवं मन्यत्रापीति तत्त्वम् न चैवं पतितो वेत्यादि
पंचम्या निर्णयकत्वानापत्तिः अहमेव वक्तुस्यामित्यादौ सामानाधिकरण्यप्रवणाश्लिष्यति
तयाधारत्वलिंगात्तत्वन्तस्योपादानत्वनिर्णयेन पंचम्याश्रपि तेनैव प्रयुक्तत्वादिति तद्भावः तस्या
नित्यत्वेन जनिधात्वयोगे प्रवृत्तेश्च इति दिक् भुवः भवनं भूः संपदादित्वाद्भावे क्विप् जनिसाह
चर्यात् अत एव भूधातोर्न ग्रहणं समासे कद्वपामपि कर्तृग्रहणमनुवर्त्तनेत्वरितत्वात् त
ध्वनयन्नाह भूकर्त्तुरिति प्रभवत्यस्मादिति प्रभवः प्रभवनमत्र प्रथमप्रकाशः भवमप्येतदेव
हिमवतो गंगा प्रभवतीति भाष्योदाहरणात्तत्र प्रपाठे ग्रहणात्तु तदधिकरणमपादानमित्य
र्थः अधिकरणत्वं त्वत्र तत्पंचम्यर्थः प्रकाशत इत्यस्य योगे तु न तस्य प्रथमप्रकाशार्थत्वाभावात्
इत्यासत्याच तदर्थकधातुयोग एवास्य प्रवृत्तिः वेति तद्धेतुरपादानमिति सूत्रार्थः अधिकरण
त्वाविवक्षायां चेदम् तदविवक्षायां तु परत्वादधिकरणसंज्ञैव तद्ध्वनयन्नाह तत्र प्रकाशत इ।
त्यर्थ इति संबंधात्र पंचम्यर्थः एतेनाधिकरणत्वमेवैतत्पंचम्यर्थ इति परास्तं पर्यायार्थप्रभव
तियोगे न तस्मै प्रभवतीति निर्देशादित्याहुः यत्तु प्रभवतेः प्रथमप्रकाश एव शक्तिरिति तन्न।

श॰ शे॰

न्या

तस्मै प्रभवति रूपादेरसंगत्यापत्तेः ल्यब्लोपे इत्येवं न शब्दस्याज्ञानेरित्यर्थः कर्मणीति प्रत्यासत्त्या
ल्यबंतधात्वर्थस्येति बोध्यं प्रासादादिति आरोहणादिक्रियारूपार्थाध्याहारेण बोधः नन्वेवमाननं वि
प्रभविलोचनस्य वहरत्यत्राकर्मत्वस्यागकर्मकत्वाभावेनाप्राप्तात्मनेपदवत्तः प्राप्येत्यध्याहृत्य।
समाहितनतदसंगतेस्यात् अध्याहारस्यतत्रापि सत्वेन पंचम्यापत्तेः नचत्यं वंते विनेयत्र तदर्थाव
वगतिस्तत्रैव पंचमीति न दोषः प्रासादमारुह्येत्यपि वक्तुं शक्यत्वेन प्रासादादित्यत्राप्यनापत्तेरि
ति चेन्न शब्दाध्याहारे शब्दज्ञानसत्वेन लोपाभावात्तदप्रवृत्तेः अर्थाध्याहारे तु प्रकृतमुदाहरणं
बोध्यं अत्र ल्यपग्रहणं ल्यबर्थप्रत्ययप्रत्ययपरं तेनासने स्थित्वा पश्यतीत्यर्थेऽपि भवति अत ए
व भाष्याख्यानेन पत्यैकाभित्याहुः गम्यमानापीति शब्दानुपात्तापि गम्यत्वादिदृष्टापीत्यर्थः
यथा प्रत्यहदृष्टमागमनं मनसि निधाय कस्मात्वमित्यादि प्रश्नादौ अन्वयबोधपक्षे तु पदजन्यपदा
र्थोपस्थितेः शाब्दबोधानंगीकर्तृनये प्रत्यक्षदृष्टस्यैवोपस्थितस्यागमनस्य मतांतरे तु प्र
त्यक्षदृष्टार्थेनैव संबंधविधया तज्जपदाद्दुपस्थितार्थस्यैवेति बोध्यं अत्र मते गमानापीत्य
स्यानुच्चारितशब्दगम्यापीत्यर्थ इत्याहुः यतश्चेति यदवधित्वेनाध्वित्याध्वनः कालस्य वाति
मीणं परिच्छेदः प्रतिपाद्यते तत्तत इत्यर्थः तद्युक्तादिति तक्ष्यपरिच्छेद्यादित्यर्थः तेन पंचम्यंते
नार्थद्वारा प्रत्ययान् निर्मीयमाणाध्ववाचिनः प्रतियावनकालादिति नद्युक्तादित्यपेक्षातेऽन्यद्रत्य
र्थेति अन्यशब्दार्थे अभेदवान् अन्यप्रभावप्रधानः अन्यत्वार्थक इत्यर्थः अत एव घटाभेदो घ

राद्भिन्नत्वादिसिद्धिः नचैवं घटं पटो नेत्यादावपि पंचम्यापत्तिः तस्यापि भेदार्थकत्वादिति वाच्यं
अन्यार्थकस्य नञस्तदंशस्य लिंगसंख्यान्वय्यर्थप्रतिपादकस्य ग्रहणात् अत एव तदर्थकेनतरश
ब्दस्यावधुत्यानुवादः सहीदृशानामेव तदर्थकानां ग्रहणमिति बोधनार्थः नह्यूहपतिप्रपंचार्थमि
ति अत एव भेदशब्दयोगे घटस्य भेद इत्येव अत एव घटीयो भेद इत्यादि संगच्छते किंच नञो द्योत
कतया घटादिपदानामेव लक्षणा स्यादुक्तनिर्वंधनपंचम्याश्च प्राप्तेः पाठांतरं केचित्तु ध्रुव
मपायेऽत्रत्रापायशब्देन संबंधाभावसमनियतविभागस्येव भेदस्यापि ग्रहणं भेदेपि तस्य सत्वा
त् यथा च श्रमाद्धायातीत्यादेस्वस्वामिभावादिसंबंधसत्वेपि संयोगसंबंधाभावमादाय प्रयोग
स्तथैवात्रापि तादात्म्यसंबंधाभावसत्वादुपपत्तिः एवं च भेदभिन्नादिशब्दयोगेपादाने एव पंचमी
तस्यैव संबंधत्वेन विवक्षायां घटीयो भेद इत्याद्यपि साधुः अन्यशब्दार्थस्य तु धात्वर्थत्वाभा
वेनाक्रियात्वाभावान्न योगे एतद्विधानं एवं चार्थग्रहणे फलं चिंत्यम् अत एव भाष्येर्थग्रह
णं नोक्तं घटादेकदृत्यादि त्वसाध्वेव अत एवेतरग्रहणं चरितार्थमित्याहुः इत्यंत किंचन अर्थ
आरोपितत्वेन तु भेद इति न दोषः नचैवं घटीयो भेद इत्यादेरनापत्तिः षष्ठीसमर्थाद्धि हितक
स्यापाश्रवेरिति वाच्यं तत्र नञागत इत्यर्थकत्वेनोपपत्तेः नच भिन्नशब्दस्यान्यार्थत्वं दुरुपपादं घ
टभिन्नमित्यादाववयवविभागानुकूलव्यापारार्थकत्वेन क्तप्रत्ययादिसिद्धेः क्तस्य सत्वादिति वा
च्यं धातूनामनेकार्थत्वेन घटादिभिन्नपदं इत्यादिप्रयोगानुरोधेन चान्योन्याभावप्रकार
कज्ञानार्थकत्वस्यापि भिदे स्वीकारात् नचान्योन्याभावानुकूलव्यापार एवास्तु तस्य नित्य

१८१

प्रा॰ शे॰ 362

त्वात् अन्योन्याभावार्थकत्वेन कर्मण एव कर्तृत्वविवक्षायां घटाद्भिद्यते घटाद्भिन्न इत्यादिप्रयो
गाः नचैवं ध्रुवमपाये इत्यपादानत्वेनैवसिद्धिः विश्लेषावधेरेवतेनापादानसंज्ञाविधानेनात्राप्रा
प्तेः संबंधपूर्वकस्तदभावो हि विश्लेषः घटादन्य इत्यादौ क्रियायोगाभावेनाकारकतयाः स्वचा
रितार्थत्वाच्च प्रपंचार्थमिति नचनरत्वजातिनीचयोरितिनीचार्थकस्य ग्रहणं र्थमिनर ग्रहण
मस्त्विति वाच्यं विधिवाक्यानल्पनलाघवेनसाहचर्येण चान्यार्थस्यैव ग्रहणात् अस्मान्ना
दोमंदो वेत्यादिवत्पंचमीविभक्तिरित्येवसिद्धेश्च नचान्यार्थयोगे पितेनसिद्धिरिति वाच्यं निर्धा
रणप्रयोजकीभूतस्य धर्मस्यानभिधानात् परस्परप्रतियोगिकभेदस्य परस्परवृत्तित्वेनानिर्धार
कत्वाच्च यत्वितर ग्रहणं पृथक्त्वार्थं अत एव घटः पटात्पृथगित्यादौ पंचमी नचसोन्यार्थः
पृथक्त्वस्यातिरिक्तगुणस्यांगीकारादिति तन्न तस्य गुणत्वानंगीकारात् अत एव रूपं
रसात्पृथगित्यादिप्रयोगोपपत्तिः पृथग्विनेत्यादिना सिद्धत्वाच्च संबंधात्र पंचम्यर्थः आ
राच्छब्दः सममीपार्थः दूरान्तिकार्थैरिति प्राप्तं ऋते कृष्णादिति ऋतेशब्दयोगेन्यत्रापि
दृष्टपतरिति द्वितीयाग्रहणाद्द्वितीयापि अत एव प्रकृष्टराधनमृते इत्यादिसिद्धिः ऋतेशब्द
स्याभावोर्थः कृष्णादृतेऽप्यनङ्गत्यादौ लाक्षणिकः कृष्णभक्त्यभावप्रयोज्यदुःखमित्यर्थः
क्वचिद्भेदवानपि तदर्थः यथा कृष्णादृतेन धनुर्धरेण निरस्तायन्यत्र विस्तरः नन्वयं देश
वाचको न दिक्शब्दः इत्यत आह दिशिदृष्टः शब्दो दिक्शब्द इति शब्दग्रहणात् दृष्टेति शेषः तेनैन्द्र्यादयो

न ह्यस्यां ते दिशीत्यस्य दिग्विशेषे वृत्त्यर्थः । तेन ककुभादिदिग्वाचिनां न ग्रहणम् । नन्वेवमवयववा
चिपूर्वादीनामवयववृत्तिनिमित्तमाकाङ्क्ष्य । तत्त्वेन तद्योगे तद्वाचकादपि पंचमी स्यादतश्चा
ह । अवयववाचियोगे तु नेति अवयववाचकादिति योषः ज्ञापकस्य सज्ञीनीयापेक्षत्वात्
अत एवास्मादयं पूर्वो भागः कायस्येत्यादिकं संगच्छते पूर्वं कायस्येति अवयवे पूर्वत्वं मव
यवांतरापेक्षया पश्चिमकालोत्पत्तिकत्वेन बोध्यं पूर्वं पंचालादित्यादौ तूदयाचलसंनिहि
तत्वादिनेत्यवधेयम् । अंचूत्तरपदस्येति न च सध्र्यङ् इत्यादौ अदिग्वाचके पंचम्यर्थे तदस्त्वि
ति वाच्यं दिक्शब्दसाहचर्येण दिग्वाचकस्यैव तस्य ग्रहणात् । ध्वनितं चेदमत्रैव भाष्येवावधि
तु मिति परत्वात्पञ्चमीत्यादिः । ननु षष्ठ्यतसर्थेनेत्यत्र प्रत्ययाप्रत्यययोरिति परिभाष
या प्रत्ययेनैव प्रत्ययग्रहणे न श्रूयमाणप्रत्यये एव तत्प्रवृत्तिरित्यर्थस्य तत्र सूत्रे भाष्या ।
दौ स्पष्टतया कथमत्र तत्प्राप्तिरिति चेन्न इष्टापत्तेः । अत एव षष्ठ्यतसर्थेत्यत्र भाष्ये अप्रत्य
कृ त्ययग्रहणं किमर्थमिह माभूत् प्राच्यग्रामात् अंचूत्तरपदग्रहणस्याप्येतदेव प्र
योजनमुक्तं । न चान्यतरचकारमकर्तव्यमिति न तु लघुना प्रत्ययग्रहणेनांचूत्तरपदग्रहणप्र
त्याख्यानमेव न्याय्यं दक्षिणा ग्रामादिति दक्षिणस्यां दिशीत्यर्थे दक्षिणादाच् । आहि च
दूरे इत्यादाप्यामाज्जाही षष्ठ्यतसर्थेत्यस्यापवादः प्रभृतियोगे इति प्रभृत्यर्थकयोगे इ
त्यर्थः ततआरभ्येत्यर्थे इति कैयटात् तदाह आरभ्येति प्रभृतिरित्यारभ्येत्यर्थकमव्य

पा·शे· यम् आरंभश्चाघदृत्तणसंबंधस्तदनुकूलव्यापारो वा तत्र द्वितीये आरभ्यशब्दयोगे कर्मत्ववि
वक्षायां द्वितीया यथा प्रातःकालमारभ्येत्यादौ तदविवक्षायां षष्ठी वाधित्वा पंचम्येवेति बो
ध्यं अग्रिमे एकश्रुतिशब्दस्तु सत्त्ववाची प्रास्पृष्टनिष्ठित्यादौ यथा तद्योगे तु न पंचमी माना
भावात् ज्ञापकादिति अप परि वादिरिति पंचम्यंतेन समासविधानाज्ज्ञापकादित्यर्थः
अयंभावः अपपरीपरस्परसाहचर्यात् वर्जनार्थौ कर्मप्रवचनीयावेव गृह्येते तद्योगे पंचि घो
मयाङ्‌परिभिरिति वचनानुलक्षणपरिपदोक्तपरिभाषयाऽपपरिनिमित्तकस्तु वंतस्यैव गृहीतत्व
पंचम्येव सिद्धः समासः तत्साहचर्याद्युक्तपरिभाषयाचांचूतत्कर पदेनापि तन्निमित्तपंचम्येव सि
द्धः समासइति व्यर्थं पंचम्येति वहिः शब्देन पंचम्यंतेन समासविधानद्वारा तद्योगे पंचमी +
ज्ञापनार्थमिति एतेन पंचम्यन्यस्यापादियोगे चारितार्थ्यात्सामर्थ्येनान्यस्तु वं तेनैव समासो
स्त्वित्यपास्तं ज्ञापकसिद्धस्यासार्वत्रिकत्वाद्बकारस्य करभो वहिरिति सिद्धम् एतेन पंचमी
ष्प्रकरणे एव वहिर्ग्रहणं कर्तुं युक्तमित्यपास्तं वचनग्रहणादिति अयंभावः मर्यादेति षा
ष्ठुउच्यते यस्मिन्सूत्रे तत्र मर्यादावचनमाङ् मर्यादाभिविध्योरिति सूत्रे तत्र विद्यमानो यत्र आङ् इत्य
र्थः परिहरेरिति परेर्वर्जनेवाचनाभिनिवार्तिकात्यतेद्वित्वाभावः परिरत्रेति पंचमीविधा
वित्यर्थः वर्जनार्थोऽपसाहचर्यादितिभावः स्पष्टं चेदं कर्मप्रवचनीयुक्ते इत्यत्र भाष्ये यस्मादि
ति अस्मादेव निर्देशादाभ्यां योगे पंचमी यत्तु अनेन सूत्रेणैवेति तत्र एतद्दृष्टकीभूतप्रत्योपैति

निधाद्यर्थे कत्वाभावेन कर्मप्रवचनीयत्वाभावादित्याहुः यस्मादिति पंचम्यर्थः प्रतियोगित्वं प्रति
निधिप्रतिदानशब्दौ च कर्मणि किलयुक्तं नो एवं च प्रतिनिधिप्रतिदाने यत्प्रतियोगिकप्रतिनिधित्व
प्रतिदानकर्मत्वचनीनतः कर्मप्रवचनीययुक्तान्ये चमीत्यर्थः प्रतिनिधित्वं सादृश्यं प्रतिदानत्वं
दत्तप्रत्यर्पणमिति हरदत्तः भावकिलयुक्तं तावित्यन्ये यद्यपि दत्तमेव न प्रत्यर्प्यते किंतु द्रव्यांतर+
मिति दत्तप्रत्यर्पणं प्रतिदानमित्यसंगतम् तथापि तुल्यमूल्यत्वादिना तदेव प्रत्यर्पितमिति
प्रतिपत्तेरदोषः कर्त्रवर्तितमिति कर्तृसंज्ञारहितमित्यर्थः ज्ञानेनैव स्तु गम्या विषमा
नं निमित्तं न तु तृतीयावाच्यकोटिनिविष्टं हेतुतृतीयापवादोयं कर्त्रेरणत्वविवक्षायां तु तृ
तीयैव ज्ञानेनावधिनज्ञानमिह न प्रमर्णाय धार्यमाणत्वादृणं न तु योजकोहेतुरिति चान्यत्र
हेतुसंज्ञा विभाषा गुणे गुणे हेतुसंज्ञाक्रियाजातिव्यानिरित्तं धर्ममात्रम् योगविभागादिति इ
दं हेतुमनुष्येभ्यः इत्यत्र पदमंत्रर्थी स्पष्टं स्त्रियां चेति उणादयो बहुलमिति सूत्रस्य बाहुलकं
प्रकृतेस्तनुदृष्टेरिति वार्त्तिकनिर्देशोपीह ज्ञापकः समुच्चयार्थमिति उभयोसमुच्चयस्तु व्याख्या
तनादिति बोध्यं निपातनामनेकार्थत्वादिति भावः स्पष्टं चेदं भाष्ये एतेनान्यतरस्यामंगी
कारे इत्यर्थकं पदद्वयमेतत् यद्वा समासैकवचनमित्यादि परास्तं पंचमीद्वितीयेति तत्र मंडूक ६
प्लुत्या पंचमी द्वितीयानुसंनिहितैव न चानंतरा द्वितीयैव समुच्चीयेतेति वाच्यं पृथक्विना
नानाभिः तृतीयेति योगद्वयेनैव सिद्धे त्वान्तरस्यांग्रहणस्यावैयर्थ्यापत्तेः एतेन पंचम्या एव

हिदं विपृथग्ण
दृपं प्ताविकमि
नानत्वेवेति

१६०

शा॰ भो॰

समुच्चयः स्यादित्युपास्तं पक्षस्य तत्समर्थ्यत्वस्यैन वेत्यस्य च स्यलोमरेकानुशाकत्वेन योगविभागो।
नैव सिद्धेऽन्यतरस्यामिति वैयर्थ्यस्य स्पष्टत्वाच्च यद्यपि द्वितीयासमुच्चयो भाष्यादौ नोक्तस्तथापि
विनावातं विनावर्षं केनेमो यातितोदुमाविति श्र योगवाहुल्यादेवं व्याख्यानमित्याहुः वस्तुतो द्वि
तीयासमुच्चयेन फलं न तेऽपशब्दयोग इव तत्तोऽन्यत्रापि दृष्टव्यतरस्यानेन विनादिशब्दयोगेपि तृति
द्धेरिति बोध्यं नचान्यतरस्यां ग्रहणस्य समुच्चयार्थत्वे मानाभावः विकल्पार्थत्वेपि पक्षे षष्ठी साध
नेन तस्य वारितत्वादिति वाच्यं अन्यतरस्यां ग्रहणसामर्थ्यात्पंचमी भविष्यतीति भाष्याद्विधाना
त्वेन समुच्चयार्थत्वांगीकारात् अन्यारादितरर्त्ते नंतरं दूरान्तिकार्थैरन्यतरस्यामित्येव सिद्धे कर
णे च सप्तोकेत्यनंतरं गुरुतरन्यासेनात्र प्रकरणेऽन्यतरस्यां ग्रहणं षष्ठी प्रापकत्वाभावबोधना
र्थं अपवादानुवर्त्तनेनाम विषयः न चानुवर्त्तनादेव भवति किं तर्हि यत्नादिति सूत्रशेषस्य भाष्ये
ण मध्ये असंबंधस्यात्र सूत्रे च संबंधस्य प्रतिपादकेन तदर्थत्वबोधनाच्च अन्यथा प्रकृतेपि यत्नाभा
वेन तदसंगतिः स्पष्टैव अस्मान्मदन्यतरस्यां ग्रहणस्य प्रयोजनं पक्षे षष्ठीत्यादितस्तूत्तरग्रंथस्त्व
अथवान्यवचनादित्येतस्यार्थे तत्पूर्वपक्षैकदेशिग्रंथस्यैकदेशिनोक्तिः प्रत्युक्तिपरतयानेयः दूरान्ति
रदन्तादिशब्दमात्रेण तु करणे चेति करणे तृतीयायाः सिद्धत्वेन पक्षे पंचमीविधानार्थमिदं च
कारस्तृतीयान्यतरस्यामित्यनुकर्षणार्थः दूरान्तिमतेपि व्याख्यानाद्यत्र न द्वितीयासमुच्चयः चेति
अधिकारात् चकारं विनापि पंचम्याः सुलभत्वेन चकारात्तृतीयासमुच्चयः सन्निधौ श्रुतत्वात्कार

णसंबंधस्यान्तनीयात्कत्वाद्वेति भावः नच विभक्तिद्वयोच्चारणेनैव सिद्धे चकारादन्यस्याप्य ।
पिसमुच्चयः स्यादिति वाच्यं गौरवापत्तेः एतेनान्यतरस्यांग्रहणानुवृत्त्यैव सिद्धे चकारो व्यर्थ
इति परास्तं अर्थोधिकारस्याभ्यर्हितत्वेन विभक्तिद्वयसमुच्चया[illegible]वापत्तेरित्याहुः अद्र
व्येति षष्ठीगाधोष्टमिति वदद्रव्याभिन्नवचनेभ्य इत्यर्थः द्रव्याभिन्नविशेषणेभ्य इति यावत्
द्रव्यपदेन चात्र गुणक्रियाव्यतिरिक्तो जात्याश्रयो लक्षणया उच्यते उदाहरणे पन्नो विशेष्यः
सह्यात्मगुण इत्याहुः अन्ये तु स्तोकशब्दो यद्धर्मावेशाद्द्रव्ये स्तोकव्यवहारस्तद्धर्मपरः संबध
मोल्पादेशाद्वृत्तिनिमित्तमल्पत्वमेव शक्यादिवत् एते केवलवचनैर्धर्ममपि करणत्वेन
परंपरयान्तनीयार्थव्यापारे स्वाश्रयवृत्तित्वसंबंधेन प्रकृत्यर्थस्यान्वयः ईदृशार्थे एव च सा
धुत्वं सूत्रबलादनुमीयते स्पष्टं चेदमलघुत्वरपद इति सूत्रे कैयटे इत्याहुः करणे किं क्रियाविशे
षणे कर्मणि माभूत् स्तोकं चलति क्रियानद्रव्यं नच तस्याविशेष्यत्वे द्रव्यत्वापत्तिः अद्रव्येति
विशेष्यत्वेपि द्रव्यत्वाभावात् सर्वनामपरामर्शयोग्यत्वे सति विशेष्यतायामेव द्रव्यत्वांगी
कारात् लिंगसंख्याद्यनन्वयित्वाच्चेति दिक् दूरांतिकार्थेभ्यो अत्र दूरांतिकार्थैः षष्ठ्यन्यत
रस्यामिति पूर्वसूत्रात्समुच्चयार्थकान्यतरस्यांग्रहणानुवृत्त्यैवार्थाधिकारात् पंचम्याः
सिद्धत्वेन चकारो व्यावर्तनीयाप्यपिसमुच्चयार्थे इत्याशयः ननु दूरांतिकार्थैः षष्ठ्यन्यत
रस्यां तेभ्यो द्वितीया चेत्येव सिद्धे दूरांतिकार्थेभ्य इति व्यर्थमिति चेन्न गुरुनिर्देशस्य स्वार्थे वि।

सर्वनामपराम
र्शयोग्यत्वे सति
किंचिन्निरू
पितविशेष्य
तावत्त्वं येन

[illegible]नवराहचाम्प"न ।
मीनतमी येइति

१२२

३६५

शा० शे धानार्थत्वात् अयंभावः पूर्वविभक्तिवैलक्षण्यबोधनार्थं तयोक्तिः तेभ्य इत्युक्ते सुपः स्थिते +
शेषत्वपूर्वविषय एव प्रवृत्तिः स्यात् अर्थान्तरस्य चानिर्देशात्तस्यार्थ एव तदाह प्रातिपादिका
र्थमात्र इति एतेन पूर्वसाहचर्यात् शेषविषय एवास्य प्रवृत्तिरिति निरस्तं दूरदूरादिति इह सप्त
म्यपि वक्ष्यते किंच दूरान्तिकार्थेभ्य इत्यस्य सप्तम्यधिकरणे चेत्यत्रानुवृत्तेनादेभ्योधिकरणेपि वि
भक्तिचतुष्टयं बोध्यं अवसथस्य दूरे इत्यर्थे दूरादावसथात् सूत्रमिति प्रयोगात् इति बोध्यं अ
व्याख्या कथा सत्वेति असत्ववचने नेत्वं तु प्रागुक्तमेव उदाहरणे क्रियाविशेषणत्वेनासत्ववाचिता बोध्या ए
तस्यानुवृत्तिः तेन करणे सत्ववचनस्य च स्तोकाल्पेति सूत्रपि तु मुचितं मात्रालाघवात् न च सत्ववचनस्येति
छेद शंका स्यात् व्याख्यानेन निर्णयसंभवात् किंच नपान्वेस्यष्ठ प्रतिपन्नयेकरणे च सत्व
न वचस्येत्येवं सूत्रयेदित्यपास्तं उत्तरत्रानुवृत्तिबोधनायानेकरणात् सप्तम्यधिकरणे चेत्य
त्रानुवृत्तेस्तु नास्य संबंध इति बोध्यं स्पष्टं चेदं सर्वं दूरत्वादौ इति पंचमी शेषशब्दार्थमाह कार
केति न चैवं राहोः शिर इत्यादौ षष्ठी न स्यात् कारकप्रातिपादिकव्यतिरिक्तार्थाभावात् इति
वाच्यं नानावस्थायुक्तराहोरिदमेकावस्थायुक्तं शिर इति कालत्रयनिकावयवावयविभावमा
दाय तदुपपत्तेराद्ये नवतत्त्वे ब्रह्माकरे उक्तत्वात् स्वस्वामीति षष्ठी च विशेषणत्वेन विवक्षितादे
व विशेष्यप्रातिपदिकार्थे कारकार्थान्यतरत्वास्यावश्यकत्वया शेषत्वाभावात् शब्दश्रा
। त्तत्वभावाच्च तदुक्तं हरिणा सोप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते तत्राभिधीयमानस्तु प्रधाने

ष्युपयुज्यते इति परार्थत्वात् परं प्रति विशेषणत्वेन विवक्षितत्वात् व्यतिरिच्यते स्वामित्वादि
रूपषष्ठ्यर्थस्तत्रोद्भूततया प्रतीयते तत्र निधीयमानः प्रधाने ष्युपयुज्यते निरूपकस्यान्वस्य तत्र
प्रतीतिरिति तदर्थः अयं भावः प्रधानानुरोधित्वात् गुणानां नैव स्वान्वयसिद्धये संवंधावलंबनं
एतन्मूलक एव विशेषणनिष्ठः संवंध इत्युद्घोषः एवं च गुण एव संवंधस्योद्भूतत्वेन प्रतीते।
स्तदर्थिका षष्ठी प्रधानाम् एवं च राज्ञ इत्यत्र स्वामित्वं षष्ठ्यर्थः राज्ञि स्वामित्वं पुरुषे तन्निरू
पकत्वं विनानुपपन्नमिति तत्र तदप्याक्षेपगम्यं अत एव तत्र षष्ठी प्रयोजकान्तस्येति वेति + श
तिशेषस्तूक्तादन्यः स च तत्तद्रूपे सा स्वत्वादिः संवंधत्वेन रूपेण कर्मत्वादिषु तत्र कांचित्कारक सं।
विभक्तीनां कारक इत्यधिकारात्तज्जनकत्व समानाधिकरणाश्रयत्वेद्दपत्वावधित्वेन वोधकत्वं
कासांचित्तज्जनकत्वमात्रेण यथा कथितं चेत्यादि कर्मादिविभक्तीनां उभयत्रापि यथा प्रयोगं संवं।
धत्वेन विवक्षायां षष्ठी तद्रूपेण स्वत्वादि वोधादेव अत एव संयोगादि संवंधसत्वेपि स्वत्वादि सं
तात्पर्य वंधविशेषणे चैत्रस्येदं वासः इति प्रयुज्यते अत एवैकशतं षष्ठ्यर्था अस्तेरनंतरे समीपे वेति षष्ठी
स्थाने इति सूत्रस्थं भाष्यं षष्ठीस्थाने इति सूत्रे च संज्ञकत्वे संवंधविशेषप्रतीतिस्तु प्रकरणादिना वो
ध्या यत्तु अप्रधाने शेषः इति तन्न प्रातिपदिकार्थमात्रे प्रथमा घट इत्यादौ विशेषणे षष्ठी प्रसंगात्
न च प्रथमया वाधः तस्याः प्राधान्ये चरितार्थत्वात् एतेन गुणे षष्ठीति न्यासः परास्तः संख्या
न्वयस्य च प्रकृत्यर्थे यत्तु षष्ठ्यर्थे संवंधे समानपदोपात्तत्व क्रमात् संख्यान्वय इति तन्न एकराज

संबंधत्वेन संबंधमान इति यावत्

श्रा·श्रो· कीयसंबंधद्वयाद्यभिप्रायेण राज्ञोरित्याद्यापत्तेः संबंधमात्रविवक्षायामिति संबंधसामान्ये
नान्वयविवक्षायामित्यर्थः + प्रत्ययलोप इति सूत्रे कैयटे च सदन्ताख्यानाद्यसूत्रस्येति वा
र्त्तिकव्याख्याने सतो वा शास्त्रमनव्यापकमिति भाष्ये दर्शनात् शास्त्रकार्त्तृशेषत्वेन विव
क्षितमिति कैयटेन स्पष्टमेवोक्तं संयोगसंबंधावच्छिन्नाधारस्य न संबंधसामान्ये नान्वयवि
वक्षा अत एव मतुप् विधायके घटवद्भूतलमित्यादिप्रयोगसाधकमस्मिन्निति च वक्तव्य।
मिति तत्रैव भाष्ये स्पष्टम् यत्र क्रियाकारकभावमूलकः कश्चित्संबंधस्तत्रैव तथा न त्वत्र त
त्पूर्वकश्चित्संबंधोस्ति विपरीतं संयोगमूलक एवास इति मतुप्सूत्रे भाष्ये स्पष्टं + कर्त्तुरपि।
तथा विवक्षायां क्तस्य च वर्त्तमाने इति सूत्रे कात्रस्य हसितमित्यादिप्रयोगसिद्धये भाष्ये स्प
ष्टं इति बोध्यं एधोदकस्येति एधः कर्त्तृदकस्योदकस्येत्यर्थः उदकपर्यायोदकशब्दोपा
त्तिर्भुवनममृतं जीवनीयं दकं चेति हलायुधकोशात् हेतोर्योगेत्वे इति स्वनिष्ठजनकता
निरूपितजन्यतासंबंधेनेतरान्वये इत्यर्थः तेनात्रं हेतुं पश्यत्यादौ नेत्याहुः षष्ठी स्यादि
ति हेतुरू शब्दात्ततत्समानाधिकरणशब्दांतराच्चेत्यर्थः + विशेष्यत्वान्तत्र न सिद्धये प्र
योगे इति अन्यथा हेतोरित्येववदेत् हेतुशब्दविशेषणेन तु सुंदरं कामित्यादावविवतत्समानवि
भक्तिर्न्याय्यत एव सिद्धेति दिक् वेतिपाठः + यद्यपि हेतुशब्दविशेषणे सुंदरं कटमित्या।
दिवद्विशेष्यसमानविभक्तिर्न्याय्यत एव प्राप्नोति तथापि शब्दार्थस्य विशेषणत्वे नांता

स्या

देर्विशेषत्वेपि यथा(स्या)दित्येवमर्थमेवं व्याख्यानं सर्वनाम्नस्तृ सर्वनाम्न इति षष्ठीं न दाह सर्वना।
म्नः प्रयोगे इति पंचम्यां न हेतुप्राधान्यात् षष्ठीतृतीये न स्यातामिति भावः किंनिमित्तमिति प्रथमां
तं द्वितीयांतं च किंप्रयोजनमिति यद्यपि भाष्ये निमित्तकारणहेतुष्विति त्रय एव पठ्यते तथापि
तदुपलक्षणमिति भावः अत एव हेतुशब्दस्य घ्यंतत्वेप्यल्पाच्तरत्वेपि पूर्वनिपातो न कृतः अ।
विवक्षितत्वप्रदर्शनायेत्याहुः पर्यायांतरव्यावृत्त्यर्थं पर्यायांतरोपपादनमिकं नीति मतांतर
मपि केचित्पठीयेस्पष्टं अत्रापि हेतौ द्योत्य इति बोध्यं यद्यपीदं वृत्तौ सर्वनाम्नस्तृतीया चेत्यत्र पठितं तथा
पि भाष्ये हेतावित्यत्र पठितत्वादस्य सर्वनामविषयत्वमपि किंतु प्रायग्रहणात्तत्रत्यतृतीयादय एवेत्या
प्रायेणाह प्रायग्रहणात् सर्वनाम्न इत्यादि यत्तु सर्वनामसूत्रपाठे भाष्ये भवतः सर्वनामत्वेत्तृती
याप्रयोजनं सर्वनाम्नस्तृतीया चेति भवता हेतुना भवतो हेतोरित्यादि तन्न यथाश्रुतसूत्रमते अत
एव सूत्रोपन्यासः यत्तु तद्बलादिदं वार्त्तिकमपि सर्वनामविषयमिति तन्न कैयटादिविरोधात् प्र
योजनोपलक्षणतया तज्ज्ञापकत्वाद्धेतावित्यत्रोपन्यासस्य निर्बीजत्वापत्तेश्च कारणा
दिशब्देभ्यः प्रथमानापत्तेश्च कस्मात्कारणादित्यर्थे किंच कारणं न गृह्णीयादित्यत्र ऋणस्त्रा।
दिस्याभाष्यविरोधापत्तेश्च नत्वैवोत्तरे विचारभेदित्यत्र प्रश्नासमानार्थकत्वेपि पंचम्युपादानेन प्रथ।
ती माद्वितीययोरभावस्य बोधनाच्च एवं च षष्ठी हेतुप्रयोगे सर्वनाम्नस्तृतीया चेति सूत्रे गतार्थे इति
।वदंति षष्ठ्यतसप्रत्ययग्रहणप्रयोजनमन्यारादितरेत्यत्र निरूपितम् ततः पश्चात्तत्वं स्य

शा०श०

स्यान्नेद्धं स्यानन्विति प्रयोगात्तच्छायोगे पंचम्यपीत्याहुः सार्वविभक्तिकत्वं नात्रसिरित्यन्ये दिशि
रूढाभ्यां दिग्देशकालवृत्तिभ्यां प्रथमौ सप्तमी पंचम्यं ताभ्यां दक्षिणोत्तराभ्यां स्वार्थेऽतसुच् वि
धीयते अस्तात्यर्थे इति नोक्तं गौरवापत्तेः षष्ठ्यपीति स्पष्टं चेदं वृत्तौ ननु क्तान्तस्यैतत्त्वक
त्वादधिकारात्पंचम्याः संबंधोन्वाख्यात एव तत्रागारं ध्वनयति गृहाद्दूरेणस्मदीयमिति स्वा
धिकारात्परेणवा सरूपविधिर्नेति ततः परेणनायमनुवर्तते इत्यादि प्रयोगाः संगच्छंते ननु ष
ष्ठ्या इति च न अन्तसर्थे प्रत्ययेनेति षष्ठी प्रकरणे करणेनैव षष्ठ्याः संबंधसिद्धेः षष्ठीग्रहणे नोत्त
रत्र संबंधबोधनात् एतेन योगभागे मानाभाव इत्यपास्तं नचैवमेनया षष्ठी द्वितीये इत्येवमस्त्वतां
अतसर्थेति च षष्ठी प्रकरण एव कार्यं एवं च योगविभागो न कार्य इति लाघवमिति वाच्यं ए प
गिवनेति सूत्रेऽव्यवहितत्वाविशेषेण द्वितीयावत्षष्ठ्या अपि समुच्चयापत्तेः अधिकारात्परेणोत्प
त्तनीयाः ततः परेण षष्ठ्यन्तेन वा सरूपसंबंधो नेत्यर्थः ततः परेणोत्पत्त्र सार्वविभक्तिकः पा।
ष्ठ्यंतात्तसिः तत्रागारमिति वेति पाठः प्रागुक्तप्रयोगास्तु चिंत्या एव तत्रागारमिति श्लोके
ने नारणेत्यनेन समानाधिकरणं तृतीयांतमित्यपि वक्तुं शक्यमित्यन्यत्र विस्तरः दूरांतिकार्थैः
डपंचमी षष्ठीपदपेक्षया ‥ इत्यादिकं तत इति बोध्यं पंचमी चेति पाठांतरं व्याख्यानमात्रं पं
चम्या एव षष्ठ्याः समुच्चयो न तु षष्ठ्या द्वितीयोरपि समुच्चयः मनोरमायामपि विप्रकृष्टापि पं
चमी समुच्चीयते न तु द्वितीयातृतीये इत्येव सांप्रदायिकः पाठो न तु षष्ठीपदघटित इति बो

ध्यं इत्यंतं एष्वगिवेनेति साहचर्याद् अन्यतरस्यांग्रहणं समुच्चयार्थेन तत्रान्यतरस्यांग्रहणेन पं
चम्या एव समुच्चयात् व्याख्यानात् ग्रहणार्थत्वेन पंचमीतृतीयाद्वितीयानां अत्रापि तस्या एव।
समुच्चयः स्याद् इष्टं चेदं हरदत्तग्रंथे इत्यंतिकार्थेभ्य इत्यत्र भाष्ये च यत्तु अन्यतरस्यांग्रहणस्य।
समुच्चयार्थत्वेन पंचमीतृतीयाद्वितीयानां समुच्चय इति तत्र पंचमीप्रकरणात्वे चम्या वि
धानेन षष्ठीद्वितीयातृतीयानां च समुच्चयेनैव सिद्धेः षष्ठीग्रहणं वैयर्थ्यापत्तेः तोविदर्थो।
इति आरभ्य व्यवहरत्यंतस्य [illegible] सत्त्रीकृत्वोर्थ इति च न षष्ठीविधानार्थं अत्रापि शेष इ।
त्यस्य संबंधे न षष्ठी शेष इत्यव सिद्धेः अत एवाधीगर्थेति सूत्रे शेष इति वर्तते कर्मण +
श्चाविवक्षा शेष इति भाष्ये उक्तं किं त्वेतेयोग षष्ठ्या एव तत्र तल्लुक् प्रयोजकीभूतः समा।
स इत्यर्थकतया समासाभावार्थम् अत एव प्रति पदविधाना षष्ठी न समस्यत इति वार्त्तिकं
नार्थवे एतेनैतत्सूत्रकदंबसामर्थ्यात् लुक एव बाधो न समासस्येति परास्तं तथासति स
मासाभावाय यत्नेष्ठ च तस्यावश्यकत्वे लुकः शास्त्रेरवाभावेनैतत्प्रकरणवैयर्थ्यस्य तादव
वस्थ्यादित्याहुः नचैवं षष्ठीसमासनिषेधप्रकरणे एवैतानि पठ्यंतामिति वाच्यं अधीग
र्थेत्यादिभिः कृद्योगकर्मार्थक षष्ठ्यां समासनिषेधापत्तेः द्विवक्तदर्थस्येत्यत्र कर्मणीत्यस्य
कर्तव्यतापत्तेश्च न च शेषत्वाविवक्षायां कृद्योग षष्ठ्या समासस्य दुर्वारत्वेन वैकल्पिकत्वेन।
चाधीगर्थेत्यादीनां वैयर्थ्यमेवेति वाच्यं करणादिष्वपि तस्मरणादि शास्त्रेः कृद्योगषष्ठ्या

प्रा॰ शे॰

समस्ते कारकपूर्वत्वात्कृदुत्तरपदप्रकृतिस्वरः प्रोषषष्ठ्यास्समासे त्वं नोदात्तत्वमिति भेदात्
स्त्रादिकर्मणि कर्त्रि रिक्तप्रत्ययान्तप्रस्तुतादिभिर्नेलोके निनिषेधात् कारकषष्ठ्याभावे समासः।
भावस्यैव फलत्वाच्च एतेन मानुः स्मृतमित्यादौ यदि कर्मणि क्तस्तदा कर्मण उक्तत्वात् दधीगर्थे
त्वस्य विषय एव न भावे नुसकर्मकत्वात् कोदुर्लभः गत्याद्यर्थत्वाभावात्कर्तर्यपि दुर्लभ इत्य
पास्तं कर्मणः प्रोषत्वेन विवक्षायामपि वक्षितकर्मत्वेनाकर्मकत्वस्य सत्वाच्च वेति पाठः द्वि
तीयासमासस्तु न श्रितादिभिरेव तद्विधानात् नन्द कं हरिणाकारके व्यपदिष्टवत्स्तूयमानद्वि
ये पुनः प्रोक्ताः प्रतिपदं षष्ठी समासस्य निवृत्तये इति निष्ठायां कर्मविवक्षायां षष्ठी च प्रतिषिध्य
ते प्रोषलक्षणया षष्ठ्या समासस्तत्र नेष्यत इति च एवं च वृत्त्यादिषु पदेषां उदाहरणं च प्रत्युदाहरणं
ति ऽ-तं इष्यते तत्सर्वमुपलक्षणं बोध्यं तथ्य पत्राह सर्पिषो ज्ञानमिति स्वत्रकृत्रे ऽविदर्थस्ये
ति छेदः अन्यथा ऽसंदेहार्थे विदर्थस्य तु ः करणेत्येव ब्रूयात् उदाहरणे सर्पिः सबंधिनी प्रवृ
त्तिरित्यर्थः जानातेः प्रवृत्तौ लक्षणत्वात् अधीगर्थे दयीगर्थस्मृतिः कर्मणि किम् मातृ
गुणस्मरणं करणभूतगुणानां प्रोषत्वविवक्षायामनेन षष्ठ्यभावे समासो यथा स्यादिति
एधोदकस्येति एधश्च निपुष्यकापदं रुजार्थानां पद्यपि रुजाव्याधौ रूढस्तथापि भावकर्तृ
काणामित्यस्य नदीकूलानि रुजतीति भाष्योदाहरणात् लक्षणया सूत्रे धात्वर्थमात्रपरः
धातोर्भाववचनत्वाव्यभिचारेण समर्थ्यात् वचनइति कर्त्रिरिल्युट् भावग्राहेनच घञा

द्विवाच्यः सिद्ध एव उच्यते ल्युट्प्रकृत्यर्थो विवक्षितः तत्फलितमाह भावकर्तृकाणामिति ए
वमेवतु सूत्रयितुमुचितम् भावकर्तृकत्वं प्रकटयन्नुदाहरति रोगकर्तृकमिति भावकर्तृकाणां किं
श्लेष्माणः स्रोतः रुजायत्र श्लेष्माण भाव इति नाने नैव षष्ठी प्रसर्पिदोनाथनमिति सर्पिषो भूयादित्या
शासनमित्यर्थः जासिनिप्र जसनाडिनेजसनाटहिंसायामिति चुरादौ ग्रहणं ननु जसमोक्ष
इति देवादिकस्य जासीति निर्देशात् हिंसायामिति वचनाच्च निप्रायस्य द्वो हन्तो निप्रहणः
हन्तेरत्पूर्वस्येति णत्वं चुरादिरिति वृत्तिः नटनृत्तावित्यस्य घटादेर्ग्रहणं दीर्घनिर्देशात् क्रा
थनमिति क्रथहिंसायां घटादिः तस्येह निपातनाद्वृद्धिरिति वृत्तिः चिस्रमपुलोविति तु मि
त्विसामर्थ्यान्मत्वाच्च निपातनं बाधित्वा चिस्रमपुलिष्वेव प्रवर्तते तएव मत्र क्रौथेति विकृत नि
र्देशात्तत्तं नियोगशिष्टन्यायेन निपातनविषय एव वाने न शेषलक्षणा षष्ठी न तत्रैव समासाभा
व इत्याहुः समर्थयोरिति समपर्मापसंपृष्टेनसमासः पाकंधादित्वात्परनिपातं वा ब्राह्मणप
णनामिति श्रापयन्त्यायोर्वैकल्पिकत्वात्प्रकृतः उदाहरणेऽस्तु नावेवेति नियमादपि वैत्या ने
हुः दिवस्तत्कर्मणि षष्ठीस्यादिति शेषइति त्वत्र न संबध्यते उत्तरसूत्रद्वयारंभात् तथाहि
अत्र शेष इत्यस्य संबंधे विभाषोपसर्ग इत्यत्र शेष इति संबध्यते उत्तरत्र नाद्यः दिवस्तदर्थस्ये
त्यनेनैव समासाभावस्य सिद्धत्वेन सूत्रवैयर्थ्यापत्तेः न चपक्षे षष्ठी शेष इत्यस्य प्रवृत्त्या।
पक्षे समासप्रवृत्तिः फलं नोपसर्ग इति न्यासेन दिव इत्यस्य निषेध शेष षष्ठ्यां समासवि
कल्पेन तद्रूपद्वयस्य सिद्धतया विभाषाग्रहणस्य तथापि वैयर्थ्यापत्तेः नांत्यः वेदपिवि

प्रा॰ प्र॰ ३६९

भावोपसर्ग इति सूत्रेण कर्मणि द्वितीयायाः सिद्धत्वादापाद्यत्रुपस्य तत्राभावाद्द्वितीयाश्रासम
णाऽन्यस्यैव यष्ठ्यापत्तेः नच तन्निरूपसर्गे द्वितीयार्थमिति वाच्यं कर्मत्वविवक्षायां दिव इत्यस्या
प्रवृत्त्या कर्मणि द्वितीयेत्येव सिद्धत्वेन वैयर्थ्यस्य तदवस्थत्वात् नच द्वितीयाश्रासमणाऽ इति सूत्रे प्र
घ इत्यनुवर्तते तेन कर्मत्वाविवक्षायां द्वितीयार्थमिति वाच्यं विच्छिन्नत्वेनानुवृत्तेरयुक्तत्वात् वक्ष्य
माणोदाहरणे कर्मत्वस्यैव प्रतीतेश्च उभयथाप्यविशेषाच्च कतिचिदिदं न प्रवर्तते इति पुनर्विधानं
समासाभावायेत्यपि न वाच्यं अत एव द्वितीयाश्रासमणा इति सूत्रे किमुदाहरणं गां प्रतिदीव्यति पूर्वे
णाप्येतत्सिद्धं इदं तर्हि गामस्य तदहः सभायां दीव्येयुरिति सभायां दीव्येयुरिति भाष्यं अत्र दिवस्त
दर्थस्येति नित्यं षष्ठी प्राप्नोति इति कैयट[?] प्रसंगकृते नचयन्तूतिङ· तमुदाहरति ग्लानस्य दीव्यती ३६९
ति मनोरमायां तु अत एवेह त्रिस्रूत्र्यांतिङ· तमुदाहरतीत्युक्तं न च तृतीयसूत्रस्य वैदिकत्वमुप
न्यासः यद्यपि पूर्वसूत्रे दिवं पठित्वा तदर्थस्येति तु उक्तं शाकपते तथापि योगविभाग उत्तरार्थः शेष
इत्यस्यासंबंधार्थश्चेत्याहुः विभाषोपसर्गे इत्यत्र शेष इत्यस्य संबंधे ऽस्य वैयर्थ्यापत्तिः शेषषष्ठ्यै दीव्यत्युक्तुदाहरणं
व समासविकल्पेन रूपद्वयस्य सिद्धेर्विच्छिन्नत्वाच्च न तदसंबंध इत्याशयेनाह पूर्वयोगापवाद इति
स्पष्टं चेदं न वेतीत्यत्र भाष्यप्रघ्यवक्ताः इष्यते दैवादिकस्य लोएमध्यमपुरुषैकवचने प्रक्षिति न
त्साहचर्यात् तु विरपि तथाभूत एव अत एवेह शेष इति न संबध्यते तिङ· तेन समासस्याप्रस
क्तत्वात् यद्यपि कल्पवाधते समासप्रसक्तिरस्ति तथापि विशेषे तदंतग्रयोगाभावान्न दोषः तस्य
विच्छिन्नत्वाच्च अत एव वहुविधः प्रस्थितस्य नेति वक्ष्यामिति वार्त्तिकस्य प्रत्याख्यानं प्रेष्यत्युदा

१६

। हरणं भाष्योक्तं संगच्छते अन्यथा व्याप्त्यापत्तेः शेषत्वेन विशेषितत्वेन विवाचकान्पूर्वसूत्रवि
। षयेषु षष्ठीनिति तदर्थः इदं सूत्रं लोकेपि प्रवर्तते उत्तरसूत्रे कर्तृग्रहणादित्याहुः अत्रापरे ति
। कांगावयवीभूतवयासंबंधि हविर्भूतमेदः कर्मकमिति बोधः शेषे किमिति शेषत्वस्य वि।
। क्षितत्वादधिकरणकारक एव षष्ठीविधानं युक्तं नच क्तयोगात् षष्ठी समस्यते प्रतिपदविधा
नान समस्यत इत्युक्त्वा सर्वा प्रतिपदविधाना शेषलक्षणां वर्जयित्वेति भाष्योक्तेषु षष्ठीति
लक्षणभिन्नलक्षणविहितषष्ठ्याः समासाभावस्य बोधितत्वेनात्र शेषसंबंधस्यावश्यकत्व।
तिवाच्यं दिवसस्तदर्थस्येत्यादौ शेषपदासंबंधस्याभाव्यसंमतत्वेन तज्ज्ञाप्यस्य संकोचे चनव्या+
ख्येयत्वात् वर्जयित्वेति पर्युदासान्सर्वपदेन शेषपदसंबंधवस्यापवश्यहमिति भाष्याशय
मिति प्रश्नः छिरहनीति भत्त्यादि प्रमाणपादेवंविधबहुतरप्रयोगदर्शनाच्च दिवसस्तदर्थस्य प्रष्ठ्य
ब्रुवोरित्यत्र शेषपदासंबंधस्यमानोत्तरसिद्धतया तदज्ञाप्ये सर्वपदसंकोचेप्येतदंशे संकोचेमा।
नाभावाच्च मंडूकानुवृत्तिः स्वीक्रियन्ते इत्युत्तराशयः कर्तृकर्मणोः अत्र शेष इति न संबध्यते सूत्र
वैयर्थ्यापत्तेः नच समासनिवृत्त्यर्थं एवमपि न लोके तस्य प्रयोगे निषेधवैयर्थ्यापत्तिः पूरण
गुणेत्यनेन तद्योगे समासस्य नित्यनिषेधात् अतएव क्तयोगात् षष्ठी समस्यत इति भाष्यं सं।
गच्छत इत्याहुः कृतिरिति भावे क्तिन् कृतः कर्तृजगत इति कर्मेदं तच्चाकर्तृकत्वेन कर्मत्वात्।
ष्ठी अत्र कर्तृसाहचर्यात् कर्मापि धात्वर्थभेदेनान्वयोपेक्ष्यते तेन सत्त्वकं पाक इत्यादौ क्रिया

६
२००

370

प्रा॰ प्रो॰

विशेषणत्वेन षष्ठी ध्वनितं चेदं स्वरूपनात् ज्ञितमिति सूत्रे भाष्यकैयटयोः स्पष्टं च पदमंजर्या।
मित्याहुः गुणकर्मण्येवेति इदं चाकथितं चेति सूत्रे भाष्ये स्पष्टम् कुतः किमिति कर्तृकर्म
भ्यां क्रियासंनिधापनेन धातुरेव च क्रियावाची पूर्वोत्तरसाहचर्येण धात्वर्थक्रियाकर्तृकर्म॰
णोरेव ग्रहणात् एतेन देवदत्तेन शातेन क्रीतः शात्योश्च इत्यादिवारणाय कृतन् ग्रहणमाव
श्यकमित्यपास्तं धातोश्च हृद्ये प्रत्ययास्तिङः कृतश्च तत्र तन्निर्योगेन लोके तिनिषेधात्कृद्यो
ग एव भविष्यतीति किं तेन न च नलोके त्यत्र कृदव्ययस्य ग्रहणं यथा स्यादित्यर्थं तत्र विशेष
णार्थे न तु अव्ययार्थस्येव कर्तृकर्मणोर्नियुक्ते वान्याव्ययवारणात् न चोभयप्राप्तावित्यत्र व
हुव्रीह्यर्थं कृद्ग्रहणं अन्यथा तत्पुरुषः संभाव्येत तथा च मित्रक्रियाकर्तृकर्मणोः प्राप्ता
वयं नियमः स्यात् ओदनस्य पाको ब्राह्मणानां प्रादुर्भाव इति किं च करोतीति कृदिति
कृत्त्वेन कर्त्रोच्यते तत्र कर्तृकर्मणोरित्येव सिद्धे तन्न ग्रहणं गुणभूतेपि णिजर्थकृत्यर्थे।
कर्त्रीति यथा स्यादित्येतदर्थं यथा गेहे इकाद्देवदत्तस्य यज्ञदत्तस्य कारणानामितीति वाच्यं
एकाचो द्वे इत्यादावि वव्याख्यानेन वहुव्रीहिसंभवात् पाठान्तरं गुणभूतेकर्तरित्यतीयावत्
षष्ठ्याः स्वपि विनैव यत्नं सिद्धत्वेति प्रश्नः ध्वनितं कर्तृः सर्वत्र गुणत्वात् वकर्तृविषयः कर्त्रेति प्रधान
कर्तुरेव ग्रहणमित्यस्यापत्तेश्चेति प्रश्नः नह्येतदस्तीति कृतग्रहणसामर्थ्यात्कृदर्थं गुणीभू
तक्रियाकर्त्रादेरेव ग्रहणं नत्वतद्धितार्थे प्रत्ययेपि गुणीभूतायाः क्रियायाः तत्कर्तृकर्मणोर्ग्र

हणमित्यर्थस्त्राश्रीयत इत्यर्थः कृतत्वग्रहणेन स्वसजातीयस्य स्वशास्त्रबोधितप्रत्ययत्वव्याप्य
संज्ञावत् प्रत्ययस्यैवाधिकस्यावारणात् तेन तंडुलानां पाचकपुत्र इत्यादौ भवत्येव षष्ठी तंडुलानां पा
पाचकतर इत्यादौ च न च तद्धितार्थस्य क्रियां प्रति गुणत्वेपि क्रियायास्तदर्थे प्रतिगुणत्वा
भावात् अत एव कर्तरीष्यितत्तमपिति निर्देशः संगच्छते कृतग्रहणं वीनि स्यादेतत् प्रकृते क्तेनक
र्मणोभिहितत्वात्प्रत्यासत्तिभावं अनभिहिताधिकारात् एवं च द्वितीयाप्यनुचितैव ननु कृतशब्द
स्य सामान्यतः कर्मार्थत्वेपि कटेन सहनान्वयः तच्छिनार्थेन सहैकार्थीभूतस्य कृतशब्दस्य नि:
कृष्णकटेन संबंधाभावात् पाठांतरे तद्धिते इति कृतग्रहणात् कृदंतशक्तिप्रयोज्योपस्थिति
विषयक्रियान्वयिनोः कर्तृकर्मणोः षष्ठीत्यर्थः तंडुलानां पाचकतरः पाचकपु... इत्यादौ तु ष
ष्ठी तरवं तेन क्रियोपस्थितौ कृदंतशक्तिज्ञानस्यापेक्षणात् प्रकृते तु न षष्ठी सकर्मकप्रकृतिभाव
क्तांतस्येदृशवृत्तिमात्रविषयताया भाष्यसंमततया तस्य केवलस्याप्रयोगेण तत्र व्यवहाराभा
वाच्च क्तग्रहणस्य समुदायस्य न कृत्शक्तिज्ञानसहकारेणोपस्थित्यजनकत्वात् किं तु तद्धितां
तसमुदायशक्त्यैवास्य क्रियोपस्थापकत्वं तथा च भाष्ये तद्धितस्य ये कर्तृकर्मणी तत्र माभूदि
ति तद्धितांतशक्त्युपस्थाप्यक्रियायाः एव ये कर्तृकर्मणी तत्र माभूत् उदाहरणेन चैव ननु कृदंत
शक्तिज्ञानोपस्थाप्या कृदंतस्येदृशस्य क्तग्रहणं धातुशक्तिज्ञानस्य सहकारित्वेपि....
कृदंतशक्ति तथा च भाष्यांतरं यदा कृदंतं तदा प्रत्ययः यदा प्रत्ययः सामान्येन तदा वृत्तिरिति

371

प्रा॰ शे॰ तव्यदाद्यप्रत्ययः न तद्वाभावे प्रत्ययः धातोः सकर्मकत्वात् यदाद्यप्रत्ययः भावे इत्यर्थः तदा वृत्तिरेव वृत्तिर्न कदा
पि कर्मत्वात् तेनाह सामान्येनेति सामान्येनैव वृत्तिरित्यर्थः सामान्येनेत्यस्य कर्मविशेषस्य तत्तद्रूपेण
प्रागतयाविवक्षाविशिष्टो योऽर्थस्तदर्थकधातुप्रकृतिकक्तेनेत्यर्थः इदमेव कर्मणोऽविवक्षा नाम अ
नेन नाट्यशास्त्रं तस्य नवाक्ये प्रयोग इति स्पष्टमेवोक्तं प्रयोगानुरोधिनी हि विवक्षेति हि तदाद्याशयः इत्य
नेन तत्र तु कर्मयोगो भवत्येव तत्र चोक्तरीत्या षष्ठ्यभावेऽनभिहितत्वाद्द्वितीया भवत्येव एवं रीत्या साधुत्वे
इदमेव भाष्ये मानं पूर्वकर्मान्वयाभावाच्च सापेक्षत्वाद्वृत्तिर्न स्यादिति वक्तुमशक्यं न च वृत्तत्वमिवात्र
न लोकेति निषेधेन षष्ठ्यसिद्धिः निष्ठान्तोपस्थाप्यक्रियाकर्तृकर्मत्वाभावात् निष्ठान्तघटितोपस्थाप्यत्व
र्थे मानाभावात् न चाविवक्षितकर्मतया भावे क्तसाधनयत्नो विफलः नपुंसके भावे क्तेनैव सिद्धेरिति
वाच्यं तस्याप्यकर्मकेभ्य एवेष्टेः इत्थं तं गुणीभूतक्रियया पिकास्फारणं संबंधस्य कर्तृत्वेन तत्वानि
त्यादौ दर्शनेन सामानाधिकरण्येन क्तशब्दान्वयाभावाच्चानभिहितत्वेन षष्ठ्यं ग्रहणाच्छास्त्रे
कर्मणि द्वितीया स्यादेवेति चेन्न क्रियान्वयि फलाश्रय एवोक्तो नोक्त इति ज्ञाकाले तदर्थफले चितदर्थफले
चितस्य कर्तस्यानभिहितत्वाया वक्तुमशक्यत्वात् इति चेदत्राहुः अविवक्षितकर्मतया पूर्वं भावे भा
वेऽक्तेनात्र तेन च कर्मणोऽविवक्षा नाम तदन्वयायोग्यफलांशस्याविवक्षा तस्यां च सत्यां कर्मप
श्चात्कर्मान्वय इति वाच्यं भाष्यप्रामाण्येन फलांशस्य द्वयोर्भावारोपमात्रेण कर्मकत्वप्रयुक्त
कार्यस्वीकारात् न च नपुंसके भावे क्तेन निर्वाहः तस्याप्यकर्मकेभ्य एवेष्टेः तयोरेवेति सूत्रे भाव

वाकर्मकेभ्य इत्यनुवर्त्तनेन च वाक्यभेदेन संबध्यते कृत्यादयो ऽभावकर्मणोरेव भावे च कृत्यादयाः श
क्तास्तिकर्मकेभ्य एवेति न चात्रानुवादे क्तो ऽविशेषात्सर्व एव गृह्यते णेरध्ययने वृत्तमित्यादि सूत्रस्य
भाष्यके यद्यादि प्रामाण्यात् गतेनिरष्ठीनमनूरसारथ्येभ्यो तं देशमनेक दुर्गविषममित्यादिना विव
क्षितकर्मत्वेनैव साध्यं एवमेव च न इत्साभुक्तं मयूरस्य नर्त्तं कोकिलस्य व्याहृतमित्यादयः क्तस्य
च वर्त्तमाने इत्यादि सूत्रस्य भाष्यादि प्रयोगाः साधनीयाः प्रयोगानुरोधेनैव विवक्षायाः सत्वेन ना
तिप्रसंगः अन्यथा पूर्वेषां तु साधनेन युज्यत इति पक्षे विज्ञपतीति परस्मैपदापत्तिः अत एव वालि
क्षायामित्यादि चरितार्थे स्पष्टं चेदं यस्य शाब्दिके कौस्तुभे न चैवं नपुंसके भावे इति सूत्रे क्तग्रह
णं व्यर्थं निष्ठे सर्वसिद्धेः नपुंसके भावे ल्युडित्येव सूत्रेपि तु मुचितमिति वाच्यं क्तेः ल्युटोः
सर्वत्र समावेशार्थं तयोक्तेः एतेन कृतशब्दस्य कटसापेक्षितया वृत्तिर्दुर्लभेत्यापास्तं नित्यसापे
क्षत्वात् पूर्वं कृतमनेनेति विग्रहः पूर्वं कृतवानित्यर्थः सप्तमुपेतिपतिसमासः पूर्वादिनिः सपूर्वा
च्चेति कर्त्तरीनिः नह्विधौ श्राद्धमनेनेति सत्वादनेनेनिवर्त्तते स्यादेतत् कृतपूर्वी कटमित्यत्रन लोकेति
निषेधात्कथं षष्ठीनिषेधाप्राप्नोति निष्ठेनपदे धातुवाच्यक्रियापेक्षकर्त्तृकर्मणीतयोः प्रतिषेध इति नदर्थः या
प्र पत्तूवत्पूर्वविदुनिष्ठान्तमेव गृह्यत इति तत्र संकोचे मानाभावात् कटं कृतवानित्यत्र इत्यादौ षष्ठ्यापत्तेरे
ति चेन्न मतिचेन्न मतिबुद्धीत्यत्र च स्यान्नुक्त समुच्चयार्थत्वेन वर्त्तमान वर्त्तमान सामीप्ये इत्यस्यत्व
त्वेन च कृतशब्दे वर्त्तमानसमीपभूतार्थक क्तप्रयोगे क्तस्य चेत्तिन्तदपवादषष्ठीप्राप्तेः सत्वेनादोषा
त्

३९२

372

प्रा॰ श्रा॰ प्रकाशते सूत्रे फले तृतोऽदनं पाचकिः कर्तृयापूर्वे किटमित्यादि बोध्यं कर्षोर्हैयियेरामोदमुन्नमिति मद्रिरा

त्रिचेदत्याहुः अनित्यमिदं अनित्यत्वे प्रमाणं तदर्हमिति निर्देशः तथा हि तत्रवतस्य अर्हमिति सूत्रे प्रका

यं अर्हमिति सूत्रे योग्यतावलात्कर्मणि षष्ठी एवं च तस्य भाव इति सूत्रे तस्येति न वक्तव्यमिति महल्लाघ

वं एवं सिद्धे तदिति निर्देशात् समस्तद्वितीयान्तत्वबोधनार्थः एतेन सूत्रे कर्मोपपदाणि अन्यये उपप

द समासोऽङ्गं तस्य कर्मषष्ठ्यावा समासः इति निरस्तं अत एव द्वितीयासमर्थादिति व्याख्यायते राज्ञा

नमर्हतीति च विगृह्यते तत्फलत्वनित्यत्वबोधनमेवं + केचित्तु शक्तियोगेन भट्टिप्रयोगे द्वितीया नित्य

एव वा भट्टिप्रयोगः हेतुश्रुतिवत् अनित्यत्वेन तन्मानभाष्यानुक्तेः तदर्हमित्यत्र कर्मोपपदाणि

प्रत्यये नैव द्वितीयासमर्थादित्यर्थौ [illegible] लाभार्थमेव च तदुपादानं सामर्थ्यकमित्याहुः उभयोः

प्राप्तिर्यस्मिन्निति तेनैकनिमित्तकत्वलाभाद्विभिन्नवक्त्रिमित्तककर्तृकर्मणोः षष्ठी प्राप्तौ नायं नियम इ

ति भावः शक्तिपदेनत्वभयोः प्रयोग एवायं निषेध इति घ्वनितं स्त्रीप्रत्यययोरिति स्त्रियां क्तिन् इत्य

धिकारविहितयोरित्यर्थः नायं नियम इति तेन कर्तरि कर्मणि च षष्ठी च भवत्येवेति भावः भेदिके

या ति पर्यायोऽर्हल्लोऽव्ययत्वं सुप एव च धात्वर्थनिर्देशो एवुल्ता विभित्सेति सतां ताच्छीलिकप्रत्ययादित्यकारप्रत्य

यः सुरासीपुरो पृग्वाधानेति स्वतिप्रयोगे तु करणत्वविवक्षायां तत्रीयेति बोध्यं प्रोष इति नियमस्या

यं विकल्पः कदाचिद्भवति कदाचिन्नेत्यर्थः प्रोषश्चात्र विनिगमनाविरहादकाकारत्वमतिरिक्ता

क्तिन्नादिः कर्मव्यतिरिक्तउपस्थितकर्तृत्वपक्षप्रधनितं भाष्ये तदुदाहरति हरेर्हरिर्लोके इति

केचिद्विशेषणेति अकाकारभिन्नेकृन्मात्रइत्यर्थः स्पष्टंचेदंमनुद्ध्यंकैयटेऽनुशासनमिति
अनुशिष्यंतेऽसाधुभ्योविविच्यबोध्यंतेयेनेतिकरणेल्युट् रात्तामनस्तुति मतिबुद्धिपूजार्थे
भ्यश्चेतिवर्तमानेक्तः इदमेषामितिकर्तरिषष्ठीसकर्मकेभ्यस्त्वधिकरणेकर्तृकर्मणोर्द्वयोर।
पिषष्ठीअनभिहितत्वाविशेषात् इदमेषांभुक्तमोदनस्य उभयप्राप्तावितित्वनंतरस्येतिन्या
येनयेननाप्राप्तिन्यायेनमध्येऽपवादन्यायेनचकर्तृकर्मणोरित्यस्यैवनियमइत्याहुः नलोका
ननुलकारस्यक्वापिप्रयोगाभावेनलांतयोगेनत्पर्थासंभवः नचादेशस्थानिवद्भावेनलत्वेस
भेअल्विधित्वादनआहलादेशाइतिलपदंसामर्थ्यात्तदादेशलात्तलक्षणिकमितिभावःलादेशा
नप्राग्नूप्रतिपाद्यक्रियाकर्तृकर्मणोः षष्ठीनेति फलितोर्थः एवंलक्षणादिंस्यैवलप्रकृती
त्यपिवक्तुंशक्यत्वात् आदेशाभावत्तूपोऽभावरूपपक्षअलएवतंडुलंपाचयांचकारेत्यादे
आमेतस्यलिटमाश्रित्यकृदंतत्वेपितदाश्रित्यषष्ठीननिषेधान्कुर्वंतीति अत्रकर्मणिप्राप्नोति
कर्तृकृन्नत्वात् ननुलग्रहणंव्यर्थं कुर्वन्निमतशानुः त्वनामिति प्रत्याहारघटकतयानिषेध
सिद्धेनचतत्रशानूस्यनदघटकत्वेपिशानुर्नतनूघटकत्वमितिवाच्यं नमाश्रित्यैवनिषेधसिद्धे
रितिचेन्नलिडादेशक्वस्वादियोगेनिषेधार्थंतस्यावश्यकत्वात् उइतिलउउकउतिउकारोत्रप्र।
श्लिष्यते उश्चउकश्चेति द्वंद्वपश्चाल्लादिभिर्द्वंद्वः तत्रोकारेणअनुरबन्नकृतोविशेषणात्तदंतविधिः
व्यपदेशिवत्भावेनोकारस्यापितदाह दिदृक्षुरितिकरिष्णुरितिच सनाशंसभिक्षउःअलंकृञ्निरा

ग्रा॰ शो॰ कृतेति च विस्तृतम्न एवमलंकरिष्णुरित्युदाहरणं कश्चिद्व्याख्यो दृश्यते इति दिक् घाञ्चक
इति लक्षयतेत्यदस्याभूतवृषह इनेत्युक्तम् वृत्तिस्तत्त्वं कर्मेरिति उक्तान्तस्येत्यर्थः तथा
च वार्त्तिकमुक्तश्चति षेधे कर्मेरितिनिष्ठेति एतदपवाद तथा भाष्ये वार्त्तिकं पठ्यते नपुं
सके भावे क्तस्य योगे षष्ठ्या उपसंख्यानमिति छात्रस्य हसितम् कालसामान्येन पुंसके
भावे क्तः भूतत्वविवक्षायां तु निष्ठेत्यनेन न च तदापि परत्वादयमेव न्याय्यः तयोरेवेति
सूत्रे यत्रिशेति सूत्रविहितक्तस्यो यास्थित तस्य भावार्थे विधानं तस्या चारितार्थ्यात् तेन ह
दा छात्रेण हसितमित्येवरदं च वार्त्तिकं लक्षणप्रतिपदोक्तपरिभाषया नपुंसके भावे क्त
इति सूत्रविहितकालोदासीनक्तांतयोग एव प्रवर्त्तते अत एव वार्त्तिकेन पुंसके ग्रहणं
चरितार्थे शेषत्वविवक्षया च भाष्ये प्रत्याख्यानमित्युच्यत् पाठान्तरं आंतदेशमित्यादौ
द्वितीयात्तु गरत्यर्थाकर्मकेत्यनेन तत्र क्तः प्रवर्त्त्यानिर्बाधाय तु पदसंस्कारपक्षे पूर्वमवि+
त्तितकर्मत्वेनाकर्मकतयाभूतत्वविवक्षायाः सत्वेन च निष्ठेति सूत्रेणैवानेन स्याः प्रवृत्तेः
कर्तृकर्मणोरित्यस्य च न लोकेति निषेधाद प्रवृत्तौ द्वितीयेति तत्र तादृशारीत्याक्तप्रत्ययस्य
कृतपूर्वीत्यादि वृत्तिविषयतायाएव भाष्यकृतास्वीकारेणान्यत्राप्रवृत्तेरत एव घटं क्रि
यते घटं कृतमिति च न गत्यर्थाः कर्मकेत्यस्य क्तोधिकरणेत्यस्य च विषये तु न नपुंसके
इति क्तः परत्वेनानवकाशत्वेन च तयोरेव प्रवृत्तेः चेतन्नतनत्सूत्रोपात्तधातुभ्यस्त्वस्या।

पिभावकर्मणो विशेषणविहितत्वात् इति तद्योगेन वार्त्तिकप्रवृत्तिरत इहादेः स्तनमित्यादि अधिक
रणे वेत्यादिना भावे क्तविषये शेषत्वविवक्षायेव षष्ठीसाध्या निरूपयिष्यते चैतत् गत्यर्थाकर्मकेति
सूत्रे क्तः इदं तेषामासितं भुक्तमिदमेषामित्यादौ षष्ठी व्याप्ताऽत्र हि पदसंस्कारपक्षे पूर्वमविवक्षितकर्मक
तया भूतत्वविवक्षायाः सत्वेन च निष्ठेति सूत्रेणेव क्तस्य सत्वात् क्तोऽधिकरणे चेत्यादिविषये तु
नपुंसके इति क्तः परत्वेनानवकाशत्वेन च क्तोऽधिकरणे चेत्यस्यैव प्रवृत्तेः चेन तस्यापि भावकर्म
णोर्विशेषविहितत्वात् इति तद्योगेन वार्त्तिकप्रवृत्तिरतः ८ शेषत्वविवक्षायैव षष्ठीसाध्याध्य।
निते चेदं भाष्ये प्रत्याहार इति स्पष्टं चेदमत्रैव भाष्ये अधीयन्निति इङ्धार्योः शत्रकृच्छ्रिणीति
शानाद्दिवन्निति द्विषोमित्र इति शाला सर्वेषामिति धुनितं चेदं क्तस्य च वर्त्तमान इति सूत्रभाष्ये।
शेष षष्ठीत्विति एतेनेक्ष्वाकूणां दुराधर्षेऽत्वदधीना हि सिद्धयः अपि वागधिपस्य दुर्वचं वचनं
तद्विधीनविस्मयमिति व्याख्यातं यद्वा इक्ष्वाकूणां सिद्धय इति वागधिपस्य विस्मयं इति अन्व
यः केचित्तु नपुंसके भावे क्तस्येति वार्त्तिकात् कारकषष्ठीनिषेधविषये शेषत्वविवक्षानत
न्यत्याख्यानेत्वनभिधानात् क्तातिरिक्तविषये मान अतएव पूरणगुणेति सूत्रे सत्यग्रहणं
भाष्ये प्रत्याख्यातमित्याहुः अकेनो अत्र पर्यासं व्यंजेष्यत इतीहैव भाष्ये स्पष्टं तत्राकस्या।
धमण्येऽसंभवादाश्मभविष्यत्यकस्येति अत्र भविष्यदिति स्वरूपेनेतेन भविष्यदधिकारविहित
स्यान्तमुन एवुलादित्यस्येव ग्रहणं वर्षशतस्य पूरक इत्यादौ एवुलन्तं चावितिं एवुलि प्रदांतर

शा.शे. संबंधात् भविष्यत्वस्य गम्यमानत्वेपि षष्ठीभवत्येव एवमेतत्कर्मकयोर्नकर्त्तार इत्यर्थकेंगय
न्तं लक्ष्यंते स्य याज्ञकार इत्यादौ च षष्ठी ध्वनितं चेदं तु मुनुः एवुलाविति सूत्रे भाष्ये ग्रामं गमीति
भविष्यति गम्यादय इति सूत्रितः शतंदायीति आवश्यकाधमर्ण्ययोर्णिनिः अत्र केचित् आव
श्यकाधमर्ण्यशब्दौ अर्शआद्यजन्तौ तेनावश्यकाधमर्ण्ययोरिति सप्तम्ये विहितः इति णिनेर्गृह्यते तेना
वश्यके णिनि निषेधः अत एवावश्यंहारीति निर्देशः संगच्छत इत्याहुः अन्ये तु आवश्यके णिनि भ
विष्यत्येव भूतवर्तमानयोरावश्यकत्वबोधनस्य व्यर्थत्वात् एवं च भविष्यदर्थकत्वादेव सिद्धे
भविष्यतीत्यस्य स्वरितत्वं तु नास्त्येव शब्दशक्तिस्वाभाव्येन क्रियार्थक्रियानुपपदकाकाल
स्य भूतकालक्रियाकर्तृमात्रप्रतिपादकत्वमतो यत्र पदांतरसंबंधादिना भविष्यत्वप्रती
तिस्तत्रारोपितभूतत्वप्रतीतिः शब्दसाधुत्वफलिकेति नाकांताद्भविष्यत्वप्रतीतिरतो नाने।
न तत्र निषेध इति उक्तदोषाभावात् स्पष्टं चेदमपि तु मुनुः एवुलाविन्यत्र भाष्ये अवश्यंहारीति।
निर्देशाच्चास्य स्पष्टं चेदमवश्यंहारीत्यत्र पदं मंतव्योमित्याहुः कृत्यानां कर्त्तरि कर्त्तरिकर्मणोरिति।
नित्ये प्राप्ते विभाषेयं कर्मनिवृत्त्यर्थं कर्तृग्रहणं अनुवर्त्तत इति निषेधश्चायं कर्त्तरि कर्मणि च
न तु कर्त्तोभिन्न्यायस्तु न प्रवर्त्तते तत्स्यानुरोधादिति वृत्तिस्वरसः कृत्यानामिति बहुवचनं तु क
त्यर्थैकत्वे रधिकेत्यादि वत्तवाध्यं कर्त्तरि चेति तु उभयप्राप्तिविषयं सामर्थ्यात् पाठांतरे रि
ति यत्र हृदन्ताद् यः कैयटोप्येवमेव अन्ये तु उभयप्राप्ताविति संपूर्णसूत्रानुवृत्तेः कर्मण्येव निषेधः

विकल्पस्तूभयप्राप्तावुभयप्राप्त्योरुभयोरपीत्याहुः भो एवं दीनन्तूदासीनं + उभयप्राप्तौ पूर्वेणैक
त्रैवेति नित्यनिषेधात् नचत्रन्तमित्यत्र गुणकर्मणीति वक्तव्ये न इति विकल्पापत्तिः कृन्मात्रेति चेच्चरिता
र्थस्य दोग्धव्या गावः पयः कृष्णेनेत्यादौ गुणकर्मण्युक्तत्वान्नचरितार्थेनानेन परत्वाद्बाधात्
ध्वनितं चेदं सर्वं भाष्ये नचैवमानमिहितेनाधिकाराभावे कर्तव्यः कटं इत्यादौ द्वितीयातः परत्वात्प्रा
प्तामपि प्रथमां बाधित्वा परत्वात्कृद्योगलक्षणषष्ठीस्यादित्याकारविरोधः तदधिकाराभावे उभ
यप्राप्तेरपि सत्वेनानन्निषेधापत्तेरिति वाच्यं उदाहरणादिकप्रदर्शनार्थत्वात् भवतोलाभो अक
र्तृमुदाहरणं बोध्यं किंचाधिकाराभावे सर्वत्रैवोभयप्राप्तिविषयसत्वात्कर्मण्येव षष्ठ्यापत्तौ क
र्मणीतिसूत्रस्य कर्तृग्रहणस्योभयप्राप्ताविति सूत्रस्य च वैयर्थ्यापत्त्या स्वात्ममानेत्वस्ये
तिसूत्रस्थभाष्यप्रामाण्येन चोभयोः प्रयोग एवोभयप्राप्तिर्व्याख्यानात्तथा च प्रकृतेनोभयप्राप्ति
रितिनदोषः प्रकृतकृत्यानामिति विभक्तिसूत्रस्थाकष्टव्या ग्रामं प्राप्त्वेतिभाष्योदाहरणे क
र्तृपदमध्याहृत्योभयप्राप्तिर्निरूप्या तत्त्वार्थेयोगइति अन्तुलोपमाभ्यामिति पर्युदासात्तु
ल्यशब्दसाहचर्याद्वानव्ययेरित्यर्थः तेनेवशब्दयोगेन्तृतीयानकिंच षष्ठ्यर्थे इयं तृतीयानदर्थ
स्य संबंधः नत्रैवादीनां द्योतकत्वपक्षे व्यतिरेकाभावेन षष्ठ्यर्थाप्रसिद्धात्तृतीयापादनस्येवा
भावः स्पष्टं चेदं नत्रतस्येवेति सूत्रभाष्यकैटयोः तुलोपमाशब्दौ चकर्मसाधनौ अत एव सादृ
श्यानुयोगिवाचकतुल्यसदृसमानार्थेत्वमनयोरिति बोध्यं अत्र कृत्यानां कर्तरीत्यनोवक्त

श्रा॰ श्रे॰ नुवृत्त्यैव सिद्धे त्वनन्तरस्यां ग्रहणं स्पष्टार्थं उत्तरसूत्रे च कारो प्येवं स्फुटोयमंशूलिसिनेनेत्यादौ उपमा
श्राद्धो भावसाधनः कर्मसाधनो भयथापि समर्थ इति निवृत्तीया एवं तुल्यां प्रदारोहति निर्देशं निवास
सेत्यपि बोध्यं दिनापि तद्योगं निवृत्तीयायाउक्तत्वात् अर्थग्रहणमिति सूत्रेऽर्थशब्दः पृथक्कि
मित्तमिति भावः भाष्ये तु नेत दृश्यते इति षष्ठी आधारो कारक इत्यधिकारात्क्रियान्वयिन्ये
न त्ववृत्तिः एवं चाधार उपस्थितत्वात्क्रियाया एव तत्र साक्षात्क्रियाधारयोः कर्तृकर्मसंज्ञा
भ्यां बाधात्परं परया तदाश्रयस्य ग्रहणं न च कर्तृकर्मसंज्ञे एव परंपराधारस्य स्यातामिति वा
च्यं कर्तृक्रियाश्रयोन्यत्र द्योधकधातूपात्तफलशालित्वरूपस्य कर्तुरीप्सिततमत्वस्याभा
वात् स्वतंत्रपदसामर्थ्याच्च कर्तृसंज्ञासूत्रेपि तत्परं परात्क्रियाधारस्य ग्रहणं न चैवमपि
परंपरयाक्रियाधारस्य ग्रहणमस्तु कर्तृकर्मद्वारेत्यर्थेन मानमिति वाच्यं प्रकरणात्क्रियया
सर्वकारकाणामुपस्थितत्वेपि योग्यतावलेन लक्ष्यानुरोधेन व्याख्याने न च तयोर्ग्रहणादित्या
घ शंकानाह कर्तृकर्मद्वारेति न चैवं फलस्य कर्मतापाः पूर्वमुत्पादनात् कर्मभूतफलद्वारा क्रियाश्र
यस्य तंडुलादेरधिकरणत्वं दुर्वारमिति वाच्यं व्यापारजन्यफलाश्रयत्वस्यापि कर्मसंज्ञाप्रयोजक
त्वेन परत्वेन तयाबाधात् न च देवदत्तः पचतीति भवतीत्यादौ पाकादिद्वाराश्रधानीभूतभवनाश्रय
त्वविवक्षायामधिकरणत्वापत्तिः सत्यभिधाने इष्टापत्तेः वयव व्याप्तो व्यापकारत्वं साक्षात्तद
न्यतरसंबंधितयाधारे औपश्लेषिकत्वं उपश्लेषक्रियाद्वारेण तन्निरूपितमाधारत्वमौपश्ले

षिकमितितदस्मिन्नधिकमितिसूत्रस्थभाष्यस्वरसः उपश्लेषसंयोगेनसमवायेनवान्तदि
तरसंबंधेनाधारस्यवैषयिकत्वं अतएवसा तस्याविवक्षायांपाकाश्रयत्वस्यापिसत्वेनपरमा
कर्तृसंज्ञयाबाधात् अन्यथाऽनभिधानादेवनेतिबोध्यं मात्रेइत्युक्कास्थीन्दुइत्युक्कारूपकर्तृद्वार
कसंबंधेनास्तिक्रियान्वयविवक्षायांबोध्यं यदितुइत्युक्कापदार्थेन्वयस्तदाषष्ठ्येवमूलेवृक्षःक
पिसंयोगीत्यत्राप्यास्तिक्रियामध्याहृत्यतस्याः स्वकर्तृकपिसंयोगिद्वारामूलवृत्तित्वादाधारत्वं
तद्गुणसंविज्ञानमत्वर्थीयाश्रयणाद्वाकपिसंयोगस्यापिमूलवृत्तित्वं एवंचावच्छेद्यावच्छेदकभावः
फलतीतिबोध्यं वकारादितिप्रातिपदिकार्थेइतिशेषः त्रिधेति एतच्चसंहितायामितिसूत्रेभा
ष्यस्यष्टुंतत्रसंयोगसमवायान्यतरसंबंधेनसकलांमीपिकादेः पृथक्ग्रहणमितितत्सू
त्रस्थभाष्यैकपदस्वरसः चतस्रोत्रेति प्रातिपदिकार्थमात्रेइत्यर्थः सप्तम्यधिकरणेइतिसूत्रेण
धिकरणेसप्तम्याः सिद्धत्वात्तुकारेणांतरंगप्रातिपदिकार्थमात्रेइत्यर्थेसप्तमीविधीयतेसाचोपा
स्थितत्वात्तद्व्याख्यानाच्चदूरांतिकार्थेभ्यएव प्रागुक्ताश्चतिस्रइतिभावः अनयाचसप्तम्यानिरव
काशत्वात्परापि प्रथमाबाध्यतेइतिबोध्यं किंचदूरांतिकेतिसूत्रस्थेहानुवर्तनादधिकरणेप्यता
बोध्याइत्याहुः यद्यपिकर्तृकर्माधिकरणार्थकविभक्तीनामाश्रयमात्रमर्थस्तथापिनिरूपभे
दात् तत्तत्संज्ञोपलक्षितस्यैवाश्रयस्यतत्तद्विभक्तिशक्यत्वान्नासांवैलक्षण्यंबोध्यंसंज्ञाप्रा।
तुशब्दस्यप्रवृत्तिनिमित्तत्वात्तदुक्तिरितिदिक् क्तस्येन्विषयस्येति इनोविषयस्येतिविग्रहः इत्युक्त

धा॰ प्रो॰

तेः क्रान्तस्य कर्मणीत्यर्थः तेन कृतश्चीकटमित्यत्र न केचिन्नु इत्यनूद्यन्ते तः प्राप्तो विषयो द
त्रिभूमिर्यस्य क्रान्तस्येति यत्नु क्रान्तनिरूपित पराधीनाभिधायकत्वाश्रय इत्यत्र तः प्राप्त इत्य
र्थे इत्याहुः तत्र वक्तुर्ग्रीष्माश्रयणे फलं चिन्त्यं अधीतो व्याकरणे इति नाम्नुकर्मणि क्तः तथा
सति कर्मणोभिहितत्वात् पञ्चम्या सप्तमी न स्यात् किन्तु भावे क्त इत्याशयेनाह अधीतमनेने
ति अधीतवान् व्याकरणमित्यादाविव गुणीभूतक्रियायामविकारकान्वय इति भावः इ
त्यादिभ्यश्चेती निः प्राद्गुमनेन भुक्तमित्यत्रोनेनेति हि तत्र वर्तते व्याकरणकर्मकाध्ययन
कर्तृनिवाधः अत्रेदं चिन्त्यं कर्मणि क्तः प्रत्ययान्ताधीतशब्दाद् व्याकरणादिविशेषकर्मान्व
यित इत्यस्तु न पारोतरं अनेनेति इत्यत्र न्यपार्थ कर्तुः प्राधान्यानुरोधेन भावे क्तान्तेभ्य
एवेति प्रकृते तदा हि एतन्यकर्तृकाध्ययनकर्मनिवोधः स्यात् इत्येते अस्सामर्थ्यात् एते
न कर्मणि क्त प्रत्यये कर्मणोभिहितत्वाद् व्याकरणशब्दात् प्रथमैवेति निरस्तमिति मासम
धीतो व्याकरणे इत्यादौ व्याकरणरूपकर्मणः सत्वेनाकर्मकत्वाभावान्मासादीनां कर्म
त्वमेव न नच भावे क्तार्थे व्याकरणादिकर्मणोऽविवक्षायां मासादीनामन्वये कर्मत्वम
स्त्येव देशकालादिभिन्नकर्मरहितानामेव तयोरेवेत्यादावकर्मकग्रहणेन ग्रहणात्
भावे क्तोपि सिध्यति एवं च मासरूपे कर्मणि सप्तमी दुर्वारा किंच प्राकृतमेवेदं कर्मनिप्रा
गुपपादितं भाष्योक्तरीत्या कर्मत्वे हितीयावन्न सप्तम्यापि दुर्वारोतिवाच्यं लक्ष्यानुरोधेना